मदनपाल निघण्टु (or the Medical Dictionary) By राजा मदनपाल - Edited by पं. जीवानन्द विद्यासागर. Calcutta, 1875.

1340

16

सर्वौषधिनामगुणानाम् निघण्टुः

Bill No. 3/07-08

177.

2008-0343

Indira Gandhi National Centre for the Arts

gain is a the elections by providing them with all facilities. There are many professional

something as domestic observers have. International

मदनपालनिघण्टु

or Medical Dictionary

By

राजा मदनपाल

Ed. पं. जीवानन्द विद्यासागर

Indira Gandhi National Centre for the Arts

Calcutta, 1875

MADANA PALA NIGHANTU.

OR A

# MEDICAL DICTIONARY.

---

BY

## RAJAH MADANAPALA.

---

EDITED AND PUBLISHED BY

PANDIT JIBANANDA VIDYASAGARA B. A.

*Superintendent, Free Sanskrit College.*

Indira Gandhi National Centre for the Arts

*CALCUTTA:*

PRINTED AT THE KAVYAP...

*1875.*

*To b... had fro... Pandit Jibananda V...*
*...rint...dent, Free Sanskrit College of Calc...*

[illegible] ... गौतम [illegible]
[illegible] सानि
[illegible]
[illegible]
[illegible] [ संस्कृत [illegible] ] ...
[illegible] टीका [illegible]
[illegible] [ [illegible] ] ...
[illegible] [ [illegible] ] ...
[illegible] ...
[illegible] ...
[illegible] [ [illegible] ]
[illegible] तथा [illegible] —सटीक ......
[illegible] नाटक—सटीक
[illegible] नाटक—सटीक
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible] [ माघ ]
[illegible] —सटीक [ [illegible] ]
[illegible] —[illegible] सटीक ...
[illegible]
[illegible]
[illegible] [illegible] ]
[illegible]
[illegible] ...
Indira Gandhi National

# सर्वौषधिनामगुणानां

# निघण्टुः

मदनपाल-नृपतिना-विरचितः

बि, ए, उपाधि-धारिणा

श्रीजीवानन्द-विद्यासागर-भट्टाचार्य्येण

संस्कृतः

Indira Gandhi National
Centre for the Arts

कलिकातानगरे

काव्यप्रकाशयन्त्रे

मुद्रितः

ई° १८७५

DATA ENTERED
Date 27/06/08

KALANIDHI
Rare Book Collection
IGNCA
ACC No.: R-343
Date: 25-3-08
Indira Gandhi National Centre for the Arts

SANS
615.53603
MAD

श्रीगणेशाय नमः ।

धन्वन्तरये नमः ।

# मदनपालकृते

# सर्व्वौषधिनामगुणानां निघण्टुः ।

बीजं श्रुतीनां सुघनं मुनीनां
जीवं जड़ानां मकरदादिकानाम् ।
आग्नेयमस्त्रं भवपातकानां
किञ्चिन्महः श्यामलमाश्रयामि ॥ १ ॥
लुब्धाकपोल मधुवारिमधुव्रताली
कुम्भस्थली मधुविभूषणलोच्छिताङ्गी ।
माणिक्यमौलि रिव राजति यस्य मौली
विघ्नं स धूनयतु विघ्नपतिः सदानः ॥२॥
यो ध्वान्तसन्तति गभीरपयोधिमध्या-
न्निष्काशयत्यपरथं भवनं निमज्जत् ।
दत्त्वा जगत्त्रयहितः स्वकरावलम्बं
वाञ्छां स वो दिनकरः सफली करोतु ॥३॥
मिथ्याशनादि कृतदोषचये न कोपा-
न्मद्यम्बुवर्द्धित उपद्रवमकभेमे ।

रोगाम्बुधौ भवजन्तुस्य निमज्जतो यः
पोतः प्रयच्छतु शुभानि स काशिराजः ॥ ४ ॥

केचित्सन्ति निघण्टवोऽतिलघवः केचिन्महान्तः परे
केचिद्दुर्गमनामकाः कतिपये भावाः स्वभावोज्झिताः ।
तस्मान्नातिलघु र्नचातिविपुलः ख्यातादिनामासतां
प्रीत्यैद्रव्य गुणान्वितोऽय मधुना ग्रन्थो मया बध्यते ॥ ५ ॥

सर्वं कायेन संसाध्यं तस्यायुः स्थिति कारणम् ।
आयुर्वेदोपदेशस्तु कस्य न स्यात् फलावहः ॥ ६ ॥
तत्रापि पूर्वं ज्ञातव्या द्रव्यनाम गुणागुणाः ।
अतस्त एव वक्ष्यन्ते तज्ज्ञाने हि क्रियाक्रमः ॥ ७ ॥
हरस्य भवने जाता हरिता च स्वभावतः ।
हरयेत् सर्वरोगांश्च तेन प्रोक्ता हरीतकी ॥ ८ ॥
जीवन्ती पूतनापश्चादमृता विजयाभया ।
रोहिणी चेतकी सप्त भेदभिन्ना हरीतकी ॥ ९ ॥
जीवन्ती जीवनोद्योगात् पावनात्पूतनामृता ।
सुधावदमृता ज्ञेया विजया विजयप्रदा ॥ १० ॥
दद्यामभयदा यस्मादभया तत्प्रकीर्त्तिता ।
रोहिणी तु गुणारोहाच्चेतनाच्चेतकी मता ॥ ११ ॥
जीवन्ती स्वर्णवर्णाभा पूतनास्थिमतीमता ।
अमृता त्रिदला प्रोक्ता विजया तुम्बरूपिणी ॥ १२ ॥
पञ्चाङ्गीत्वभयाज्ञेया मृताहृत्तातु रोहिणी ।
त्र्यङ्गीतु चेतकीज्ञेया कर्म तासामथोच्यते ॥ १३ ॥
सर्वरोगेषु जीवन्ती प्रक्षेपे पूतनाहिता ।
शुद्धार्थममृता प्रोक्ता विजया सर्वरोगहृत् ॥ १४ ॥

अस्थिरोगेऽभयाशस्ता रोहिणी व्रणरोहिणी ।
चेतकी चूर्णयोगे स्यात् सप्तधैव प्रकीर्त्तिता ॥१५॥
नवा स्निग्धा घनावृत्ता गुर्वीक्षिप्ताचयाम्भसि ।
निमज्जेत्सा प्रशस्ता स्याद्रोगघ्नीति गुणप्रदा ॥१६॥
शोणाच्छिन्ना गुड़निभा किञ्चिदल्पाकषायणी ।
स्थूलत्वक् सरसाऽल्पबीजागुर्वी हरीतकी ॥१७॥
चर्विता वर्द्धयत्यग्निं पेषिता मलशोधिनी ।
स्विन्ना सङ्ग्राहिणी प्रोक्ता भृष्टापथ्यात्रिदोषनुत् ॥१८॥
ग्रीष्मे तुल्यगुडांसु सैन्धवयुतां मेघावनद्धेऽम्बरे ।
तुल्यां शर्करया शरद्यमलया शुण्ठ्यातुषारागमे ॥१९॥
पिप्पल्या शिशिरे वसन्तसमये क्षौद्रेण संयोजिता ।
राजन् ! प्राप्य हरीतकीमिव रुजो नश्यन्ति ते शत्रवः॥२०॥
[हरीतकी नामगुणाश्च] शिवाहरीतकीपथ्या चेतकी विजयाजया।
अव्यथा अभया मोघा कायस्था प्राणदामृता ॥ २१॥
जीवनीया हैमवती पूतनाऽमृतनाभया ।
वयस्था नन्दिनी श्रेया श्रेयसी रोहिणी तथा ॥२२॥
हरीतकी पञ्चरसा लवणातुवरोत्कटा ।
रूक्षोष्णा दीपनी मेध्या स्वादुपाका रसायनी ॥२३॥
सरा बुद्धिप्रदा वृष्या चक्षुष्या बृंहणी लघुः ।
श्वासकास प्रमेहार्शः कुष्ठशोफोदरान् कृमीन्॥२४॥
वैस्वर्य्यग्रहणी दोष विबन्धविषमज्वरान् ।
गुल्माध्मानव्रण छर्दि हिक्का कण्डूहृदामयान् ॥२५॥
कामलांशूलमानाहं प्लीहानं चापकर्षति ।
मधुराम्लतया वातं कषायस्वादुभावतः ॥२६॥

Centre for the Arts

पित्तं हन्ति कफं हन्ति कटुकेन हरीतकी।

हरीतकी नामगुणाः। आँवले नामगुणाः।

धात्रीफलाऽमृतफला मलकं श्रीफलं शिवम् ॥२७॥

तद्वद्धात्रीफलं द्रव्यं विशेषाद्रक्तपित्तजित्।

अम्लत्वात्पवनं हन्ति पित्तं माधुर्य्यशैत्यतः ॥२८॥

कफं रूक्षकषायत्वात् तस्मात् किमधिकं फलम्। [आंवले नामगु०]

[बहड़े नां गु०] विभीतकः कर्षफलो भूतावासः कलिद्रुमः ॥२९॥

वासन्तोच्चो वृक्षजातः स्वर्वर्त्तस्तिलपुष्पकः।

विभीतकः स्वादुपाकः कषायः कफपित्तनुत् ॥३०॥

उष्णवीर्य्यो हिमस्पर्शो भेदनः कासनाशनः।

रूक्षो नेत्रहितः केश्यो मज्जातोयदकारकः ॥३१॥

[त्रिफला ना० गु०] हरीतक्यास्त्रयोभागा शिवाद्वादशभागिका॥

षड्भागाः स्युर्विभीतस्य त्रिफलेयं प्रकीर्त्तिता ॥३२॥

पित्तं माधुर्य्यशैत्यन्तु कफं रूक्षकषायनुत्।

त्रिफलै तत्त्रयेण स्याद्वरा श्रेष्ठा फलोत्तमा॥

त्रिफलाकुष्ठमेहार्शः कफपित्तविनाशिनी ॥३३॥

चक्षुष्यारोपणी रूच्या वयसः स्थापिनी परा।

[भुइ आमले ना० गु०] भूधात्री बहुपत्रीस्यादमृतामलका शिवा ॥३४॥

भूधात्री वातकृत्तिक्ता कषाया मधुरा हिमा।

पिपासा कासपित्तास्त्र कृमिपाण्डुक्षतापहा ॥३५॥

[पाणि आवले ना०गु०] प्राचीनामलकी प्राची नागरं रक्तकं मतम्

तत्पक्वं पित्तकफकृत् उष्णं गुरुसमीरजित् ॥३६॥

अरूषाकेनात्र वासा वृषासिंहमुखी भिषग् [उत्पातातरूषकः।

सिंहपर्णी वृषो वासासिंहकोत्पाट रूषकः ॥३७॥
वासको वातकृत्स्वर्य्यः कफपित्तास्र नाशनः ।
श्वास कास ज्वर छर्दि मेह कुष्ठक्षयापहः॥३८॥ अमृते नामगुणाः।
[गुडूची नामगुणाः]। गुडूची कुण्डली छिन्ना वयस्था अमृतवल्लरी
छिन्नोद्भवा छिन्नरुहा अमृताज्वरविनाशिनी ॥ ३९ ॥
वत्सादनी चन्द्रहासा जीवन्ती चक्रलक्षणा ।
गुडूची कटुका लघ्वी स्वादुपाका रसायनी ॥ ४० ॥
संग्राहिणी कषायोष्णा बल्या तिक्ताग्निदीपिनी ।
कामला कुष्ठवातास्र ज्वरपित्त कृमीन् जयेत् ॥ ४१ ॥
घृतेन वातं सगुडाविबन्धं पित्तं सिताढ्या मधुना कफञ्च ।
वातास्रमुग्रं रुबुतैलमिश्रा शुण्ठ्यामवातं शमयेद्गुडूची ॥ ४२॥
[विल्वनामानि] विल्वः शलाटुः शैलूषो मालूरश्च सदाफलः ।
लक्ष्मीफलो गन्धगर्भः शाण्डिल्यः कण्टकी मतः ॥ ४३ ॥
विल्वं ग्राहि कषायोष्णं कटुदीपन पाचनम् ।
हृद्यं बालं लघु स्निग्धं तिक्तं वातकफापहम् ॥ ४४ ॥
पथ्यं गुरु त्रिदोषं स्याद्दुर्जरं पूतिमारुतम् ।
विदाहि विष्टम्भकरं मधुरं वह्निमान्द्यकृत् ॥ ४५ ॥
ग्रहणी कफवातास शूलघ्नी विल्वपेषिका ॥ ४६ ॥
अग्नि मन्थोमथः केतुरर्णिर्वैजयन्तिका ॥४७॥
अग्निमन्थः श्वयथु हृच्छ्रीर्य्योष्णः कफवातनुत्। [द्वर्णि नामगुणाः।
पाटला कामदूतिः स्यात् कुम्भिका कालवृन्तिका ॥४८॥
स्थल्यमोघामधोदूती ताम्रपुष्पाम्बुवासिनी ।
अन्या फलेरुहा श्वेताकुम्भिका कृष्णपाटला ॥ ४९ ॥
पाटला रुचिशोथास्र श्वास तृट् छर्दिनाशिनी ।

अन्याफलरुहाश्वेता कुम्भिका काष्टपाटला ।
पाटला रुचिशोफार्शः श्वासतृट् छर्दिनाशिनी ॥ ५० ॥
अत्युष्णा तुवरं स्वादु तत्पुष्पं कफरक्तनुत् ॥ ५१ ॥
पित्तातिसारदाहघ्नं फलं हिक्कास्र पित्तनुत् ॥ [पाटलि ना० गु० ।
[काश्मरीनां गु] काश्मरी सर्वतो भद्रा श्रीपर्णी कृष्णवृन्तिका ॥ ५३ ॥
गम्भारी काश्मरी हीरा काश्मर्य्या भद्रपर्णिका ।
काश्मरी ज्वरशूलघ्नी वीर्य्योष्णा मधुरा गुरुः ॥ ५२ ॥
तत्पुष्पं वातलं ग्राहि पित्तास्रक् प्रदरापहम् ।
फलं रसायनं केश्यं बृंहणं शुक्रलं गुरु ॥ ५५ ॥
वात पित्त क्षयतृष्णा रक्तमूत्र विबन्धनुत् ।

[ इति शिवनाक नामगुणाः ]

श्योनाकः पृथुशिम्बिः स्यात् शुकनाशः कुटं नटः ॥ ५६ ॥
भूतहृच्च कट्वङ्गः टुंटुकः शल्लकोरलुः ।
मयूरजङ्घो भल्लूकः प्रियजीवः कटम्भरः ॥ ५७ ॥
श्योनाको दीपनः पाके कटुस्तुवरको हिमः ।
ग्राहीतिक्तोऽनिलश्लेष्म पित्त कास विनाशनः ॥ ५८ ॥
टुण्टुकस्य फलं बालं रूक्षं वात कफापहम् ।
हृद्यं कषाय मधुरं लघु रोचन दीपनम् ५९ [श्योनाक ना० गु०]
बिल्वादिभिः पञ्चभिरेभिरेतत्स्यात्पञ्च मूलं महदग्निकारि ।
लघूष्ण तिक्तं रसतः कषायं मेदः कफश्वास समीरहारि ॥६०॥

[ इति महत्पञ्च मूलनामगुणाः ]

त्रिकण्टकः कण्टफलो गोक्षुरः स्वादु कण्टकः ।
गोकण्टको भक्षटकः त्रिकण्टो व्यालदंष्ट्रकः ॥ ६१ ॥
श्वदंष्ट्रा स्थूलशृङ्गाटः षडङ्गः क्षुरकस्त्रिका ।

गोक्षुर: शीतल: स्वादुर्बलकृद्बस्ति शोधन: ॥ ६२ ॥
प्रमेह श्वास कासास्र क्षच्छ्र हृद्रोगवातजित् । [गोक्षुर ना० गु०]
शालपर्णी ध्रुवा सौम्या त्रिपर्णी पीतनि स्थिरा ॥ ६३ ॥
विदारिगन्धांशुमती दीर्घमूलांशुमत्यपि ।
शालपर्णी गुरु: छर्दि ज्वरश्वासाति सारनुत् ॥ ६४ ॥
शोषदोषत्रयहरा बृंहत्युष्णा रसायनी । [शालपर्णी ना० गु०]
पृष्टपर्णी क्रोष्टुपुच्छा धावनी कलशाह्वा ॥ ६५ ॥
श्रृगालवृन्ताङ्घि तिलाष्टयक् पर्णी च पर्णिका ।
पृष्टपर्णीलघुरुष्णा मधुरोष्णा विनाशयेत् ॥६६॥
रक्तातिसारदाह तृट् दोषत्रयवमि ज्वरान् । [पीठवन ना० गु०]
बृहती स्थूलभण्टाकी विपदा च महोत्कटा ॥ ६७ ॥
वृन्ताकी महती सिंही कण्टकी राष्ट्रकाकुली ।
बृहती ग्राहिणी हृद्या पाचनी कफवातजित् ॥ ६८ ॥
उष्णा कुष्ठज्वर श्वास शूलकासाग्निमान्द्यजित् ।
इति बडीभटकटाई नामगुणा: ।
कण्टारिका कण्टिकिनी कण्टकारिर्निदग्धिका ॥६९॥
दु:स्पर्शा धावनी क्षुद्रा व्याघ्रीदु:प्रहर्षिनी ।
शिताक्षुद्रा चन्द्रहासा लक्ष्मणा क्षेत्रदूतिका ॥ ७० ॥
कण्टकारी सरातिक्ता कटुका दीपनी लघु: ।
रूक्षोष्णा पाचनी कास श्वास ज्वर कफानिलान् ॥ ७१
निहन्ति पीनसं पार्श्व पीड़ाकृच्छ्र हृदामयान् ।
तद्वत्प्रोक्ता शिता क्षुद्रा विशेषात् गर्भकारिणी ।
इति श्वेतकटाई नामगुणा: ।
ह्रस्वाख्यं पञ्चमूलं स्यात् पञ्चभिर्गोक्षुरादिभि: ।

बल्यं पित्तानिलहरं नात्युष्णं स्वादु बृंहणम्॥७३॥ [लघु पंचमूलः]
एताभ्यां पञ्चमूलाभ्यां दशमूलमुदाहृतम्
दोषत्रय श्वास कास शिरःपीड़ापतन्त्रकान् ॥ ७४ ॥
तन्द्रास्वेद ज्वरानाह रुचिपार्श्व रुजो जयेत् ।[दशमूल ना० गु०]
ऋद्धिः सुखं युगं लक्ष्मीः सिद्धिः सर्वजनप्रिया ॥ ७५ ॥
ऋषिसृष्टाह्वयाङ्गं स्यान्माङ्गल्यं श्रावणी वसुः ।
योग्यं युग्या तुष्टिराशि वृद्धिरप्येतदाह्वया ॥ ७६ ॥
ऋद्धिर्बल्या त्रिदोषघ्नी शुक्रला मधुरा गुरुः ।
वृद्धिर्गर्भप्रदा शीता वृष्या कासक्षयास्रनुत् ॥[ऋद्धिवृद्धि ना०गु०]
काकोली मधुरा धीरा कायस्था क्षीरशुक्लिका ।
ध्वांक्षोली वा पसोली स्यात् स्वादु मांसी पयस्विनी ॥७८
द्वितीया क्षीरकाकोली स्वराह्वा क्षीरिणी सता ।
पीवरी मद्दशस्कन्धः स क्षीरः स सुगन्धकः ।
क्षीरकाकोलिकाख्यातः पित्तदोष ज्वरापहः ॥ ७९ ॥
काकोली युगलं शीतं शुक्रलं मधुरं गुरु ।
जयेत्क्षमीरदाहास्र पित्तशोष तृषा ज्वरान् ॥ ८० ॥
[ इति काकोली क्षीरकाकोली नामगुणाः ।]
मेदाह्वया शालपर्णी वृष्या मेदोभवा धरा ॥ ८१ ॥
महामेदा वसुच्छिद्रा त्वदन्ता दैवता मणिः ।
मेदायुगं गुरुस्वादु वृष्यस्तन्य कफापहम् ॥ ८२ ॥
बृंहणं शीतलं रक्तं पित्तक्षय समीरनुत् ।[मेदामहामेदा ना० गु०]
जीवको मधुरः शृङ्गी ह्रस्वाङ्गः कूर्चशीर्षकः ॥ ८३ ॥
ऋषभो वीर इन्द्राक्षो विषाणी दुर्द्धरो वृषः ।
जीवकर्षभकौ बल्यौ शीतौशुक्र कफादौ ॥ ८४ ॥

हरत: पित्तदाहास्त्र कास वात क्षयामयान् । [जीवकर्षभक]

अष्टवर्गोऽष्टभिर्द्रव्यैरेतै: शीतोऽति शुक्रल: ॥ ८५ ॥

बृंहण: पित्तदाहास्र शोषघ्नस्तन्य गर्भकृत् । [अष्टवर्गगुणा:]

जीवन्ती जीवनी जीवा जीवनीया यशस्करी ॥ ८६ ॥

शाकश्रेष्ठा जीवभद्रा माङ्गल्या जीववर्द्धनी ।

जीवन्ती शीतला स्वादु स्निग्धा दोषत्रयापहा ॥ ८ ॥

रसायनी बलकारी चक्षुष्या ग्राहिणी लघु: । [जीवन्ती ना० गु०

मधुयष्टी क्लीतनकं यष्टी मधु मधूलिका ॥ ८८ ॥

यष्ट्याह्वं मधुकं यष्टि मधूकं जलजामधू ।

मधुयष्टी गुरु: शीता बल्या वृट् छर्दिपित्तजित् ॥ ८९

इति मुलहठी नामगुणा: ।

माषपर्णी कृष्णवृन्ताकाम्बोजी हयपुच्छिका ।

मांसमाषा सिंहमुखी स्वादुमाषा महासहा ॥ ९० ॥

मुद्गपर्णी क्षुद्रसहा सूर्य्यपर्णी कुरङ्गिणी ।

वनजारिङ्गिणी शिंबी सिंही मार्जार गन्धिका ॥ ९१ ॥

माषपर्णी हिमा तिक्ता रूक्षा शुक्रबला सकृत् ।

मधुराग्राहिणी शोफ वातपित्तज्वरास्त्रजित् ॥ ९२ ॥

तद्वद्वन्मुद्गपर्णीत्वदोषाघ्नीरालघु: ।

इति माषपर्णीमुद्गवनी नामगुणा: ।

जीवन्तीसूर्य्यपर्णीयुक् काकोल्यो जीवकर्षभौ ।

मेदोयष्टीति मधुरो जीवनीयगणो गुरु: ॥

शुक्रकृद्बृंहण: शीत: स्तन्यगर्भकफप्रद: ।

रक्तपित्ततृषाशोष ज्वरदाहक्षतापह: ॥ [जीवनीयगुणा:]

एरण्डो दीर्घदण्ड: स्यात्तरुणो वर्द्धमानक: ॥ ९३ ॥

चित्रः पञ्चाङ्गुलो व्याघ्रः पुच्छोगन्धर्वहस्तकः ।
रक्तैरण्डो हस्तिकर्णो व्याघ्रो व्याघ्रतरो लघुः ॥
उत्तानपत्र उरवु वातवैरी च चुञ्चुला ॥९४॥
एरण्डयुग्मं मधुर मुष्णं गुरु विनाशयेत् ।
शूलशोफ कटीवस्ति शिरः पीड़ोदरज्वरान् ॥ ९५॥
ब्रध्नश्वास कफानाह कासकुष्टाममारुतान् ।
तत्फलं भेदनं स्वादु क्षारमुष्णं समीरजित् ॥९६॥

[ इति एरण्डरक्त एरण्ड नाम गुणाः । ]

शारिवाशारदास्फोता गोपकन्या प्रतानिका ।
गोपाङ्गना गोपवल्ली लताच्वाकाष्टशारिवा ॥८ ॥
शारिवान्या कृष्णमल्ली भद्राचन्दनशारिवा ।
भद्राचन्दन गोपा च चन्दनाकृष्णवल्ल्यपि ॥९८॥
सारिवायुगलं स्वादु स्निग्धं शुक्रकरं गुरु ।
अग्निमान्द्यारुचिश्वास वमिकास विषापहम् ॥९९॥
दोषत्रयाश्रप्रदर ज्वरातीसारनाशनम् । [शारिवा द्वयनामगुणाः]

[इति काष्ठसारि वा कृष्णसारि वा । ]

यासो मरुद्भवोऽनन्तो दीर्घमूलोयवाशकः ॥१००॥
बालपत्रः समुद्रान्तो दूरमूलोऽति कण्टकः ।
धन्वयासस्ताम्रमूलीदुःस्पर्शास्यात् दुरालभा ॥ १०१ ॥
यासकः कच्छुराताम्र मूली धन्वयवासकः ।
यासः स्वादु रसस्तिक्तो हिमः पित्तहरो लघुः ॥ १०२ ॥
हन्ति रक्तकफभ्रान्तीस्तद्वन्यय वासकः ।

[इति यवासाधमासा नामगुणाः । ]

मुण्डी भिक्षुः परिव्राजी पावनी स्यात् तपोधना ॥ १०३

श्रावणी श्रीमती मुण्डी तिक्ता श्रावणशीर्षका ।
मुण्डी तिक्ता कटुः पाके वीर्य्योष्णा मधुरा लघुः ॥ १०४
मेध्यागण्डापची कृच्छ्र कृमियोन्यर्त्ति पाण्डुजित् ।
[ इति मुण्डी नामगुणाः । ]
महामुण्डी लोभनीया छिन्न ग्रन्थीनिकास्मृता ॥ १०५ ॥
भूतघ्नः कुलहलो लम्बु गालूकदम्बकः ।
कदम्बपुष्पमुण्डीवत् गुणैर्भूमि कदम्बकः ।
[इति कोटिमुण्डीभुइ कदम्ब नामगुणाः । ]
अपमार्गस्तु शिखरी किणही खरमञ्जरी ॥ १०६ ॥
अधः शल्यः शैखरिकः प्रत्यक् पुष्पी मयूरका ।
अपामार्गः सरस्तीक्ष्णो दीपनः कफवातजित् ॥ १०७
निर्हन्ति दद्रुश्विधमार्शः कण्डूशूलोदरारुचीः । लटजीरा ना०गु०
अन्यो रक्तो हस्तफलीवशिरः कपि पिप्पली ।
अपामार्गोऽरुणो वात विष्टम्भी कफनाशनः ॥
ऊनं पूर्वगुणै रुक्षस्तत्पत्रं रक्तपित्तनुत् ॥ १०८ ॥
[ इति रक्तलटजीरा नामगुणाः । ]
काम्पिल्यो रेचनो रक्तचूर्णको व्रणशोधनः ॥ १०९ ॥
लोहितो रक्तशमनो रेचीरं जनको मतः ।
काम्पिल्यः कफपित्तास्र क्रिमिगुल्मोदरव्रणान् ॥ ११०
हन्ति रेची कटूष्णश्च तच्छाकं ग्राहि शीतलम् ।
[ इति कपीला नामगुणाः । ]
दन्तीगुणप्रिया नागदन्ती शीघ्रानुकुलकः ॥ १११ ॥
उपचित्तानुकुम्भीस्त्राहिशल्योदुम्बरच्छदा ।
आखुपर्णी वृषैरण्डा द्रवन्ती सर्वरीमता ॥ ११२ ॥

मूषकाह्वासुतश्रेणी प्रत्यक् श्रेणी च फञ्जिका।
दन्तीद्वयसरं पाक रसयोः कटु दीपनम् ॥
तीक्ष्णोष्णं हन्ति पित्तास्रकफशोफोदरान् क्रमीन्। [दन्तीना०गु०]
जयपालो दन्ति बीजं ख्यातन्तत् तित्तिरीफलम् ॥ ११३
जयपालो गुरुस्निग्धो रेची पित्तकफापहः। [जयपाल ना ०गु०
त्रिवृत् कुम्भोऽरुणात्वक्च भण्डीकूटरवाहिनी ॥ ११४ ॥
सर्वानुभूतिस्त्रिवृता त्रिपुटा सरलासिता।
त्रिवृत्तिक्ता सरारूक्षा स्वादु उष्णा समीरकृत् ॥ ११५ ॥
कटुः पाके ज्वरश्लेष्म पित्तशोफोदरापहा। श्वेतनिसोत
त्रिवृत्कालाकालमेषी कालपर्ण्यर्द्धचन्द्रिका ॥
सुखेनास्यान्मालि विक्रामसूरा विदलान्विता।
त्रिवृत्कालाहीनगुणातस्यास्तीव्रविरोचिनी।
मूर्च्छादाहमदभ्रान्तिवान्तिकार्षणकारिणी॥११७[कालानिसोत
इन्द्रवारुण्यथेन्द्राह्व इषभाची गवादिनी।
ऐन्द्रवारु क्षुद्रफला विषालैन्द्री हषादिनी ॥
अन्येन्द्रवारुणीचित्र फलाचित्र महाफला।
आत्मरक्षा नागदन्ती त्रपुसी गजचिरभटी ॥ ११८ ॥
श्वेतपुष्पी मृगाक्षी च तथा पञ्चसुरामृता।
मरुद्भवाक्रमिगुहा चित्रदेवी च कीर्त्तिता ॥ ११९ ॥
ऐन्द्रवारुद्वयं तिक्तं कटुपाके शरं लघुः।
वीर्योष्णं कामलापित्त कफश्रीहोदरापहम् ॥ १२० ॥
[ इति इन्द्रवारुद्वन्दावनद्वयं एनारुफल। ]
आरग्वधोराजवृक्षः शम्याकः कृतमालकः।
व्याधिघातः कर्णिकारः प्रग्रहश्चतुरङ्गुलः ॥ १ ॥

आरोग्यसिम्बी स्वणाट: कर्णी दीर्घफलो मत: ।
कुण्डली हिमपुष्पा च कलिख्यातो नृपद्रुम: ॥ १२१ ॥
स्वर्णशोफालिकाख्यावा कुष्ठसूदननाम तत् ।
स्वर्णख्यात्यापित्तला च सुवर्णद्रुम ईरित: ॥ १२२ ॥
आरग्वधो गुरु: स्वादु शीतलो स्रदुरेचन: ।
ज्वर हृद्रोगपित्तास्र वातोदावर्त्तशूलजित् ॥ १२३ ॥
तत्पुष्पं वातलं ग्राहि तिक्तं पित्तकफापहम् ।
तन्मज्जा मधुरापाके तिक्त: पित्त समीरजित् ॥ १२४ ॥
[इति कीरवारो अमलता ।]
नीलिनी नीलिका ग्राम्या श्रीफलाभारवाहिनी ।
रञ्जनीकलिकामेला व्रणोरूचाविशोधिनी ॥ १२५ ॥
नीलिनीरचनी तिक्ता केश्या मोहभ्रमापहा ।
उष्णाहन्त्युदरीह वातपित्तकफानिलान् ॥१२६॥ [नीलिनीनाम]
कटुकारोहिणी तिक्ता चक्राङ्ककटुरोहिणी ।
मत्स्यपित्तापाण्डरहा कृष्णभेदाद्विजाङ्गिका ॥ १२७ ॥
अशोकारोहिणीमत्स्या स्कुला सकुलादिनी ।
कटुकी कटुपाके च तिक्तारूक्षा सरा लघु: ॥ १२८ ॥
हिमाहन्ति क्रमिश्वास दाहपित्त कफज्वरान् । [कटुकीना०गु०]
अङ्कोल्लकस्ताम्रफल: पीतसारोनिरोचक: ॥ १२९ ॥
गुप्तस्नेहो विरेचीस्यात् भूषितो दीर्घकीलक: ।
अङ्कोलक: कटुस्निग्धतीक्ष्णोष्णस्तुवरो लघु: ॥ १३० ॥
रेचन: क्रमिशूला मशोफश्लेष्मविषापह: ।
तत्फलं शीतलं स्वादुश्लेष्मलं वृंहणं गुरु ।
बल्यं विरेचनं वातपित्तदाह क्षयास्रजित् ॥ [अङ्कोल्लकना०गु०]

सेहुण्डो वज्रतुण्डस्तु गाण्डीरीवज्रकण्टकः ॥१३१॥
स्नुहीसमन्त दुग्धोऽसिपत्रो वज्री महातरुः ।
सेहुण्डो रेचनस्तीक्ष्णो दीपनो कटुको गुरुः ॥ १३२ ॥
शूलामाष्ठीलिकाध्मान गुल्मशोफोदरानिलान् ।
हन्तिदूषीविषञ्चैव कुष्ठोन्मादाश्मपाण्डुतान् ॥ १ ३॥ [सेहुण्ड]
निम्बोनियमनोनेतारिष्टः स्यात्पारिभद्रकः ।
सुतिक्तः सर्वतोभद्रः पिचुमन्दः प्रभद्रकः ॥ १३४ ॥
कुष्ठहाद्देवदत्तश्च रविसन्निभ सूर्य्यकः ।
निम्बः शीतो लघुः ग्राही कटुपाकोऽग्निवातकृत् ॥ १३५॥
व्रणपित्तकफच्छर्दि कुष्ठहृल्लासमेहकृत् ।
निम्बपत्रं स्मृतं नेत्र्यं क्रमिपित्तविषप्रनुत् ॥
तत्फलं भेदनं स्निग्धमुष्णं कुष्ठहरं लघु ॥ १३६ ॥
अपक्वं पाचयेन्निम्बः पक्वञ्चापरिशोषयेत् । [निम्बनामगुणाः]
महानिम्बोनिम्बकरः कामुकोविषमुष्टिकः ॥ १३७ ॥
रम्यको गिरिकोद्रेकाचारः स्यात्केशमुष्टिका ।
माहानिम्बो हिमोरूक्ष स्तिक्तोग्राही कषायकः ॥१३८॥
कफपित्तक्रमिच्छर्दि कुष्ठहृल्लासरक्तजित् । [वकाइननामगुणाः]
किराततिक्तः कैराती भूनिम्बोरामसेनकः ॥ १३९ ॥
किराततकोऽन्योनैपालो नाडितिक्तो ज्वरान्तकः ।
काण्डुतिक्तोर्द्धतिक्तः स्यान्निद्रारिः सन्निपातहा ॥१ ०॥
किराती वातलोरूक्षः शीतल स्तिक्तको लघुः ।
सन्निपातज्वरश्वास कासपित्तास्रदाहनुत्२१[चिराइतानाम गु०]
कुटजोमल्लिकापुष्प कलिङ्गोगिरिमल्लिका ।
वत्सकः कुटजः कोटिहचकः शक्रभूरुहः ॥ १४२ ॥

कुटजः कटुकोरूक्षो दीपनस्तुवरो लघुः ।
अर्शोऽतिसारपित्तास्रकफतृष्णामकुष्ठनुत् ॥ १४३ ॥
तत्पुष्पं वातलं शीतं तिक्तं पित्तातिसारजित् [कुरैयाकुडा न०
ऐन्द्रोयवस्तस्य फलं कालिङ्गः कौटजोमतः ॥ १४४ ॥
शक्राह्वः पुरुह्लतश्च प्रोक्तो भद्रयवस्तथा ।
ऐन्द्रयवस्त्रिदोषघ्नः सङ्ग्राही शीतलः कटुः ॥ १४५ ॥
ज्वरातिसाररक्तार्श क्रिमिवीसर्पकुष्ठनुत् । [इन्द्रजवनामगुणाः]
मदनः छर्दनः पिण्डीराटपिण्डान्तकं फलम् ॥ १४६ ॥
करहाटश्च तरगः शल्यको विषपुष्पकः ।
मदनो वमनस्तिक्तो वीर्य्योष्णो लेखनो लघुः ॥ १४७ ॥
रूक्षः कुष्ठकफानाह शोफगुल्म व्रणापहः । [मदनं नामगुणाः]
कङ्कुष्ठ कङ्काकुष्ठं रेचनं रङ्गनामकम् ।
शोधनं पुलकं हासं वराङ्गं कुञ्जवालुकम् ॥
कङ्कुष्ठं रेचनं तिक्तं कटुष्णं वर्णकारकम् ।
क्रिमिशोफोदराध्मान गुल्मानाहकफापहम् । [कङ्कुष्ठनामगुणाः]
हेमाह्वा कनकक्षीरी हेमपुष्पहिमावती ॥ १४८ ॥
क्षीरणी काञ्चनक्षीरं कटुपर्णी चिकर्षणी ।
तिक्तदुग्धा हैमवती पीतदुग्धा हिमाद्रिका ॥
हेमाह्वा रेचनी तिक्ता मन्दाग्न्युत्क्लेदकारिणी ।
क्रिमिकण्डुकफानाह विषकुष्ठविनाशनी ॥१४९॥ चोपनामगुणाः]
सातला विरला सारी सप्तला बहुफेनका ।
चर्मसाह्वा चर्मकाशा फेनादीप्ता च नालिका ॥१५०॥
सातलाकटुकापाके वातलः शीतलो लघुः ।
तिक्ताशोथ कफानाह पित्तोदावर्त्त रक्तजित् १५१[सातलाना गु०]

अश्मन्तो मालुकापत्रो युग्मपत्रोऽम्लपत्रकः ।
सूक्ष्मत्वगश्मयोनिः स्यात् कुशलीपापनाशनः ॥ १५२ ॥
अश्मन्तस्तुवरोग्राही शीतोष्णः कफवातजित् ।
निहन्ति गण्डमालाश्च गलगण्डगलामयान् ॥ १५३ ॥
तत्फलं लेखनं ग्राहि गुरुश्लेष्मानिलापहम् । [अश्मन्तकनाम]
काञ्चनारः काञ्चनकः पाकारी रक्तपुष्पकः ॥१५४॥
कोविदारोऽस्य भेदः स्यात् कुदालः कुड़लीकुली ।
आस्फोतोद्दालकः स्वल्पकेसरश्चमरीमता: ॥ १५५ ॥
काञ्चनारोहिमग्राही तुवरः श्लेष्मपित्तनुत् ।
क्रिमिकुष्टगुदभ्रंश गण्डमालाव्रणापहः ॥ १५६ ॥
कोविदारोऽपि तद्वत्स्यात् पुष्पं शीतं तयोर्लघु ।
रूक्षं संग्राहिपिताश्च प्रदरक्षतकासनुत् ॥ १५७ ॥ [कचनार]
निर्गुण्डीश्वेतकुसुमः सिन्दुकः सिन्दुवारकः ।
भूतकेश्यापरी नीलसिन्दुकः पुष्पनीलकः ॥ १५८ ॥
शेफालिका शीतभीरु वनकोऽनिलमञ्जरी ।
निर्गुण्डीस्मृतिदातिक्ता कषायाकटुका लघु ॥ १५९ ॥
केश्या नेत्र हिताहन्ति शूलशोथाममारुतान् ।
क्रिमिकुष्ठरुचिः श्लेष्मव्रणानीलापि तद्विधा ॥ १६० ॥
[इति निर्गुण्डीद्वय नाम गुणाः ।]
मेषशृङ्गी मेषवल्ली सप्तदंष्ट्राजशृङ्गिका ।
अन्या तु दक्षिणावर्त्ता वृश्चिकालीविषाणिका ॥१६१॥
मेषशृङ्गी रसेतिक्ता वातलाकासनाशनी ।
रूक्षापाके कटुः पित्तव्रणश्लेष्माक्षिशूलनुत् १६२ [मेढाशृङ्गीनाम]
पुनर्नवा श्वेतमूला शोथीको दीर्घपत्रकः ।

विषाद्दीर्घवर्षाभू पुनर्भूमण्डलच्छदा ॥१६३॥
पुनर्नवा सरा तिक्ता रूक्षोष्णा मधुरा कटुः ।
पुनर्नवारुणा तिक्ता रक्तपुष्पा कटिल्लका ॥ १६४ ॥
क्रूरकः क्षुद्रवर्षाभू वर्षकेतुः शिवाटिका ।
शोफानिलव्रणश्लेष्महरा रुच्या रसायनी ॥ १६५ ॥
पुनर्नवा वरा तिक्ता कटुपाका हिमा लघुः ।
वातला ग्राहिणी श्लेष्मरक्तपित्तविनाशनी १६६ [पुनर्नवाद्वयनाम]
रास्ना रस्यायुक्तरसा रसना गन्धनाकुली ।
सुगन्धमूलाति रसा श्रेयसी सुवरारसा ॥ १६७ ॥
रास्नामपाचनी तिक्ता गुरूष्णा श्लेष्मवातजित् ।
शोफश्वाससमीरास्र वातशूलोदरापहा ॥१६८ [रास्नानामगुणाः]
अश्वगन्धा तुरङ्गाह्वा गोकर्णी श्वावरोहकः ।
वराहकर्णी वरदा बल्या वाजीकरीष्टपा ॥ १६९ ॥
अश्वगन्धानिलश्लेष्म शोफश्वित्र क्षयापहा ।
बल्या रसायनी तिक्ता कषायोष्णाऽतिशुक्रला ७० [अश्वगन्धना० गु०]
प्रसारणी राजबला चारुपर्णी प्रतानिका ।
सरणी सारणी भद्रपर्णी सुप्रसरा सरा ॥ १७१ ॥
प्रसारणी गुरुर्वृष्या सन्धानबलकृत्सरा ।
वीर्य्योष्णा वातनुत्तिक्ता वातरक्तकफापहा १७२ [प्रसारणीना० गु०]
शतावरी द्वीपिशत्रुर्द्विपकाधरकण्टका ।
नारायणी शतपदी शतपादङ्कपत्रिका ॥१७३॥
शतावरी गुरुः शीता स्वादुः स्निग्धा रसायनी ।
शुक्रस्तन्यकरा बल्या वातपित्तास्र शोफजित् ७४ [शतवर्यीना० गु०]
शतावर्य्यूर्ध्वकण्ठान्या पीवरी भीवरीवरी ।

अभीरुर्वंकपत्रा च महापुरुषदन्तिका ॥
सहस्रवीर्य्या केशीस्यात्तुङ्गिनी सूक्ष्मपत्रिका ।
महाशतावरीमेध्या हृद्या वृष्या रसायनी ॥ १७५ ॥
शीतवीर्य्या निहन्त्यार्शं ग्रहणीनयनामयान् ।
तदङ्कुरस्त्रिदोषघ्नो लघुरर्शःक्षयापहः ॥ १७६ ॥
इति शतावरी महाशतावरी नामगुणाः ।
बलावाट्यालकः शीतपाकीवाट्योदराह्वया ।
भद्रौदनीसमङ्गास्यात्खरमांसा खरयष्टिका ॥१७७॥ [खिरिहिटी]
महाबलावीरपुष्पी सहदेवी वृहद्बला ।
वाट्यायनीदेवसहा वाट्यास्यात्पीतपुष्पिका७८ [सहदेवीना० गु०]
बलाकाति बलाभारद्वाजीस्याद्वृष्यगन्धिनी । पिटारिणी ना० गु०]
गङ्गेरुकीनागबला विश्वदेवा गवेधुका १७९ [गङ्गेरुकी ना० गु०]
बलाचतुष्टयं शीतं मधुरं बलकान्तिकृत् ।
स्निग्धं ग्राहिसमीरास्रपित्तास्रक्षतनाशनम् ॥१८०॥
आसां वृहद्बलाकृच्छ्रं हन्तिवातानुलोमनी ।
गुर्वीनागबलावृष्या विशेषाद्रक्तपित्तजित् ॥१८१॥
बल्यारसायनीपुंस्त्व वर्द्धिनी वृंहणी तथा ।
तस्याफलंहिमस्वादु स्तम्भनं गुरुलेखनम् ॥ १८२ ॥
विबन्धाध्मानजननं रक्तपित्तविवर्द्धनम् । [बलाचतुष्टयं]
ज्योतिष्मतीवह्निरुचिः कङ्गुणीकटुभी तथा ॥१८३॥
ज्योतिष्मती कटुस्तिक्ता सराकफसमीरजित् ।
अत्युष्णावामनी तीक्ष्णा वह्निबुद्धिस्मृतिप्रदा ॥१८४॥
[इति ज्योतिष्मती मालकांगुनि नामगुणाः ।]
तेजस्विनी तेजवती तेजिन्या लघुवल्कला ।

महौजसिपारिजाता शीतातितक्तातितेजिनी ॥
तेजस्विनी कफश्वास कासशूलामवातजित् ।
पाचन्युष्णा कटुस्तिक्ता रुचिवह्निप्रदीपनी । [तेजवती]
देवदारु सुराह्वास्यादिन्द्रदारु सुरद्रुमः ।
भद्रकाष्ठं स्नेहवृक्षः ऋमिलं शक्रदारु च ॥१८५॥
देवदारुकटुस्निग्धं तिक्तोष्णं लघु नाशयेत् ।
आध्मानज्वरशोथामहिक्का कण्डुकफानिलान् १८६ [देवदारुनां गु०]
सरलोनन्दनोव्रीड़ा नमेरुद्विकवृक्षका ।
पतिदारुपीतवृक्षो महादीर्घकलिद्रुमा ॥१८७॥
सरलः कटुकः पाकरसयोर्मधुरो लघुः ।
उष्णास्निग्धा समीराघ्निकण्ठकर्णामयापहा ८८ [सरलाना० गु०]
पौष्कराह्वं पद्मपत्रं पौष्करं पुष्कराह्वकम् ।
काश्मीरं पुष्करजटा मूलवीरं सुगन्धिकम् ॥१८६॥
पौष्करं कटुकं तिक्ता मुष्णवातकफज्वरान् ।
हन्ति शोफारुचिश्वासान् विशेषात् पार्श्व शूलजित् ॥१६०

इति पुष्करमूल नामगुणाः ।

कुष्ठं रोगाह्वयं दिव्यं कौवेरं पारिभद्रकम् ।
पारिहार्य्यं पारिभाव्यमुत्पलं पारिभद्रकम् ॥ १६१ ॥
कुष्ठमुष्णं कटु स्वादु तिक्तं शुक्रप्रदं लघु ।
हन्ति वातास्त्रवीसर्पं कुष्ठकास मरुत्कफान् ॥१६२ [कुष्ठनामगुणाः]
शृङ्गीकुलीरशृङ्गीस्याद्वक्रा कर्कटशृङ्गिका ।
कर्कटाख्या महाघोषा शृङ्गनाम्नी नताङ्ग्यपि ॥ १६३ ॥
शृङ्गीकषाय तिक्तोष्णाहन्ति हिक्कावमिज्वरान् ।
तृष्यावमि कफश्वास चयकासोर्ध्व मारुतान् १६४ कर्कटशृङ्गीनां गु

कट्फलं कुमुदाकुम्भी श्रीपर्णीसोमपादपः ।
सोमवल्को महाकुम्भी भद्राभद्रवती शिवा ॥ १९५ ॥
कट्फलं तुवरं तिक्तं कटुवात कफज्वरान् ।
हन्ति श्वास प्रमेहार्श कास कण्ठामयारुचि [कायफलनामगु०]
रौहिषं कत्तृणं भूतिर्भूतिकं सरलं तृणम् ।
श्यामलं शुष्मकं पौरं व्यापकं देवगन्धकम् ॥ १९७ ॥
रौहिषे कटुकं पाके तिक्तोष्णं तुवरं जयेत् ।
हन्ति मारुतपित्तास्रव्रणात् श्वास कफज्वरान् ॥१९८॥
[इति रौहिष नामगुणाः ।]
भार्गी ब्रह्मजवापद्मा कासघ्नी गन्धपर्वणी ।
खरशाकं शुक्रमाता भञ्जी ब्राह्मणयष्टिका ॥ १९९ ॥
भार्गीरूक्षी कटुस्तिक्ता रुच्योष्णा पाचनी जयेत् ।
शोथकास कफ श्वास पीनस ज्वरमारुतान् २००[भार्गी नाम गु०]
पाषाणभेदः पाषाणोऽश्मरीभेदोऽश्मभेदकाः ।
शिलाभेदो ह्यश्मभेदो नागभिन्नाङ्गभेदनः ।
पाषाणभेदस्तुवरः शीतलो वस्ति शोधनः ॥ २०१ ॥
सरस्तिक्तः प्रमेहार्शः कृच्छ्राश्मरीरुजो जयेत्[पाषाणभेदना०गु०]
मुस्तं वारिधरो मुस्तो मेघाख्यः कुरुविन्दकः ॥ २०२ ॥
वराहोऽब्दो घनो भद्र मुस्तं राजकसेरुकः ।
पिण्डमुस्तं विषध्वंसी नागरोऽन्यः प्रकीर्त्तितः ॥ २०३॥
मुस्तं कटु हिमग्राही तिक्तं दीपन पाचनम् ।
कषायंक्रमिपित्तास्रकफतृण्ज्वरापहम् २०४[नागरमोथानांगु०]
धातकी कुञ्जरा सिन्धु पुष्पीप्रमदिनीमदा ।

पार्वतीया ताम्रपुष्पी सुभिक्षा मेघवासिनी ॥ २०५ ॥
धातुकी कटुकाशीता मन्दोष्णातुवरा लघुः ।
तृष्णातीसार पित्तास्र विषकृमि विसर्पजित् ॥०६ [धातुकीधापटी]
मार्चिका वालिकाम्बष्ठा शठी दन्तशठाम्बिका ॥
अम्बष्ठकी सूचिमुखी कषाया सा कण्ठमुखी ।
मार्चिकोष्णा रसे पाके कषायो शीतलो लघुः ।
पक्कातीसारपित्तास्र कफकण्ठामयापहा ॥ [मयनफलनां०गु०]
विदारिका वृक्षवल्ली इक्षुकन्दा विदालिका ।
शृङ्गालिका कन्दवली स्वादुकन्दा फलाशका ॥ २०७ ॥
अन्या शुक्ला चारशुक्ला चारवल्ली पयस्विनी ।
इक्षुवल्ली महाश्वेता चीरकन्देक्षु गन्धिका ॥ २०८ ॥
विदारी मधुरा स्निग्धा बृंहणीसन्य शुक्रदा ।
गुरुपित्तास्र पवनदाहान् हन्ति रसायनी ॥ २०९ ॥
[इति विलाइकन्दद्वय नामगुणाः ।]
वाराही माधवी गृष्टिः शौकरी वनमालिका ।
तस्याः कन्दकिटि क्रोडनाम्ना सम्बरकन्दकः ॥ २१० ॥
वाराही मधुरा कन्दे कटुस्तिक्तातिशुक्रला ।
बल्या शुक्रकरा वातकफमेह कृमीन् जयेत् ॥ २११ ॥
इति वाराहीकन्द नामगुणाः ।
पाठाम्बष्ठा हस्तिक्ता प्राचीनाम्बष्ठका रसा ।
वरातिक्ता पापवेली श्रेयसी वृद्धकर्णिका ॥ २१२ ॥
पाठोष्णा कटुका तीक्ष्णा वातश्लेष्महरा लघुः ।
हन्ति शूलज्वरच्छर्दि कुष्ठातीसारहृद्रुजः ॥ २१३ ॥
दहाकण्डू विष श्वास कृमि गुल्मगरव्रणान् । [पाठानामगुणाः]

मूर्वा देवी मधुरसा देवश्रेणी मधुस्रवा ॥२१४॥
स्निग्धपर्णी पृथक्पर्णी मोरटी पीलुपर्णिका । [मुरहरानाःगु०]
मञ्जिष्ठा विजया रक्ता रक्ताङ्गी कालमेषिका ॥ २१५ ॥
रक्तयष्टी ताम्रवल्ली समङ्गा वस्त्रभूषणा ।
मञ्जूला विकसाभङ्गी छत्रिका ज्वरनाशिनी ॥ २१६ ॥
मञ्जीष्ठा मधुरा तिक्ता कषाया स्वरवर्णकृत् ।
गुरुरुष्णा विषश्लेष्म शोफयोन्यक्षिशूलनुत् ॥ २१७ ॥
रक्तातीसारकुष्ठास्र विसर्प व्रणमेहजित् ।
ताच्छकं दीपनं स्वादु स्निग्धं पित्तानिलापहम् ॥२१८॥ [मञ्जिष्ठा]
हरिद्रा रजनी गौरी रञ्जिनी वरवर्णिनी ।
पिण्डा पीता वर्णवती निशावर्णा विलासिनी ॥ २१९ ॥
हरिद्रा कटुका तिक्ता रूक्षोष्णा श्लेष्मपित्तनुत् ।
वर्ण्या त्वग्दाहमेहास्र शोफपाण्डु व्रणापहा ॥ २२० ॥ [हरिद्रा-
अथवनहरिद्रा] दार्वी दारुहरिद्राऽन्या पीतदारु च पञ्चधा ।
कटं कटेरी पित्तद्रुः स्वर्णवर्णा कटङ्कटि ॥ ४२१ ॥
दार्वी तद्वद्विशेषात्तु नेत्रकर्णास्यरोगनुत् । [दारुहरिद्रा]
प्रपुन्नाटस्त्वेडगजश्चक्रमर्दः प्रपुन्नटः ॥ २२२ ॥
दद्रुघ्नो मर्दको मेघ कुसुमः कुष्ठकृन्तनः ।
प्रपुन्नाटो लघुः स्वादुः रूक्षः पित्तानिलापहः ॥ २२३ ॥
हृद्यो हिमकफश्वास कुष्ठदद्रु कृमिं जयेत् ।
हन्त्युष्णं तत्फलं कुष्ठ कण्डू दद्रु विषानिलान् ॥ २२४ ॥
वातरक्तापहन्तस्याः शाकं कफकरं लघु । [चकवडनाम]
वाकुची चन्द्रिका सोमवल्ली पूतिफलावरा ॥ २२५ ॥
सोमराजी कृष्णफला वल्गुजा कालमेषिका ।

चन्द्रलेखा तथा सोमः कुष्ठघ्नी सामतापरा ॥ २२६ ॥
वाकुची मधुरा तिक्ता कटुपाका रसायनी ।
विष्टम्भिनी हिमा रुच्या सराश्लेष्मास्त्र पित्तनुत् ॥२२७॥
रूक्षा हन्ति कफश्वास कुष्ठमेह ज्वरक्रमीन् ।
तत्फलं पित्तकृच्छ्रेन कुष्ठवातकफापहम्॥२२ [वाकुची]
भृङ्गराजो भेकराजो मार्कवः केशरञ्जकः ।
अङ्गारको भृङ्गराजो भृङ्गाह्वः सूर्य्यवल्लभः ॥२२९ ॥
भृङ्गराजः कटुस्तिक्तो रूक्षोष्णः कफवातकृत् ।
दन्त्यो रसायनस्त्वच्यः कुष्ठनेत्रशिरोऽर्त्तिजित् ॥२३०॥ [भङ्गरा]
पर्पटः कवचो रेणुः पित्तघ्ना वरकण्टकः ।
वरतिक्तः पर्पटकः श्वियकश्चर्मकण्टकः ॥ २३१ ॥
पर्पटो हन्ति पित्तास्त्रभ्रमतृष्णा कफज्वरान् ।
संग्राही शीतलस्तिक्तो दाहनुद्वातलो लघुः ॥
रक्तपुष्पोऽतिसारश्च वरको ज्वरनाशनः ।
पर्पटः पित्तहृद्दाह ज्वरजित् श्लेष्म शोषणः ।
तिक्तशीतौ ज्वरहरौ लघु भूनिम्बपर्पटौ॥२३२॥[पापडा]
शणपुष्पी माल्य पुष्पी धावनी शणवल्लिका ।
बृहत्पुष्पी स्वल्पघण्टा घण्टाशब्दा तु पुष्पिका ॥ २३३॥
शणपुष्पी कटुः पित्त श्लेष्मजिच्छर्दिकारिणी ।
त्रायमाणातु कृत्राणा त्रायन्ती गिरसानुजा ॥ २३४ ॥
वज्रभद्रा कृतत्राणा वार्षकं त्रायमाणिका ।
त्रायमाणा शरापित्त ज्वरश्लेष्मास्र शूलजित्॥२०॥[त्रायमाणा]
महाजालनिकाचर्म रङ्गः स्यात् तिलपुष्पिका ।
आवर्त्तकी विन्दुकिनी विभाण्डी रक्तपुष्पिका ॥ २३५ ॥

महाजालिनिका तिक्ता रेचनी कफपित्तजित् ।
हन्ति दाहोदरानाह शोफकुष्ठ क्रिमि ज्वरान्॥ महाजालि
अति विषा शुक्ला कन्दाविषा प्रतिविषापरा ।
श्यामकन्दा शिताशृङ्गी भङ्गुरोपविषारुणका ॥ २३६ ॥
विषोष्णा पाचनी तिक्ता श्लेष्मपित्तातिसारजित् ।[अति विषा]
श्यामकन्दा चोपविषा सा विज्ञेया चतुर्विधा ॥ २३७ ॥
रक्ता श्वेता भृशं कृष्णा पीतवर्णा तथैव च ।
यथा पूर्वं विज्ञेया बल्या श्रेष्ठा गुणोत्तमा ॥ २३८ ॥
सर्वदोषहराऽग्रत्वाल्लेपाच्छु यशुनाशिनी ।
श्लेष्मजान् विंशतिरोगान् सद्यो हन्यात् रसायनी ॥ २३९
काकमाची ध्वाङ्क्षमाची कामची जघनी फला ।
रसायनवरा सर्वतिक्ता स्यात् काकिनी कटुः ॥ २४० ॥
काकमाची त्रिदोषघ्नी स्निग्धोष्णा स्वरशुक्रदा ।
हृद्या रसायनी शोफ कुष्ठार्शो ज्वरमेह जित् २४१ [काकमाची]
काकजङ्घा नदी कान्ता काकतिक्ता सुलोमसा ।
परावतपदीकाका मदान्या छर्दिकारिणी ॥२४२॥
काकजङ्घा हिमा हन्ति रक्तपित्त कफ ज्वरान् । [काकजङ्घा]
रोध्रस्तिरीटः कानीनस्तिलकः सन्ततोद्भवः ॥ २४३ ॥
अन्यो घनत्वाल्लावरकः श्वेतलोध्रोऽक्षिभेषजम् ।
रोध्रो विरेचकः शीतश्चक्षुष्यः कफपित्तनुत् ॥ २४४ ॥
कषायो रक्तशोफासृग् ज्वरातीसारनाशनः ।
तत्पुष्पं मधुरं ग्राहि सतिक्तं श्लेष्मपित्तजित् ॥ २४५ । [लोध्रद्वय
हृद्दारुर्महाश्यामा जाङ्गलो जीर्णवल्कलः ।
अन्या कोटरपुष्पी स्यादावेगी च्छागलान्त्यपि ॥ २४६ ॥

वृद्धदारः कषायोष्णः सरस्तिक्तोरसायनः ।

वृष्योवातामवातास्र शोफमेह कफाञ्जयेत् [वृद्धदारुद्वयं] ॥२४७॥

देवदाली वृत्तकोशोदेवताड़ोगरागिरी ।

जीमूतस्तारका वेणीजालिन्याऽऽयुर्विषापहा ॥२४८॥

देवदालीरसे तिक्ता कफार्शः शोफपाण्डुताः ।

नाशयेदामनीतीक्ष्णाक्षयहिक्काक्रिमि ज्वरान् ॥ २४९ ॥

देवदाली च कटुका प्रमेह कामलापहा । [देवदाली]

हंसपादीहंसपदीरक्त पादी त्रिपादिका ॥२५० ॥

प्रह्लादिनी कीटमारी कीटमाता मधुस्रवा ।

हंसपादी गुरुः शीता हन्ति रक्त विषव्रणान् ॥२५१॥

विसर्पदाहातीसार लूतभूताग्नि रोपणी । [हंसपादी]

सोमवल्ली यज्ञनेता सोमक्षीरी द्विजप्रिया ॥ २५२ ॥

सोमवल्ली त्रिदोषघ्नी कटुस्तिक्ता रसायनी । [सोमवल्ली]

SANS
615.53603
MAD

## अथ आकाशवल्ली ।

आकाशवल्ली तु बुधैः कथिताऽमरवल्लरी ।

खवल्ली ग्राहिणी तिक्ता पिच्छिलाक्ष्याऽऽमयापहा॥[इति ना०गु०]

नाकुली समहासर्प गन्धिनी गन्धनाकुली ॥ २५३ ॥

नकुलेष्टा महासर्प नेत्रा रोचकपत्रिका ।

नाकुली तुवरा तिक्ता कटुकोष्णा विनाशयेत् ॥ २५४ ॥

विषलूता वृश्चिकाखु सर्पाणाञ्च क्रिमि व्रणान् । [नाकुलीगुणाः]

वटपत्री मोहिनी स्याद्दीपनी रेचनीमता ॥२५५॥

वटपत्री योनिगदान् कषायोष्णा विनाशयेत् ।



IGNCA RAR
R-343
ACC. No.

तत्फलं स्तम्भनं शीतं वातलं कफपित्तजित् ॥ [वटपत्री] ॥ २५६॥

लज्जालुर्मोहिनी सूक्ष्माखदिरी गन्धकारिणी
नमस्कारी समीपत्रा समङ्गा रक्तपादिका ॥ २५७ ॥
लज्जालुः शीतला तिक्ता कषाय श्लेष्म पित्तजित् ।
रक्तपित्तमतीसारं योनि रोगान् विनाशयेत् ॥२५८॥ [लज्जालु]

मुसली खलिनी तालपत्री काञ्चन पुष्पिका ।
महावृष्या वृचकन्दः खर्जूरी तालमूलिका ॥ २५९ ॥
मुसली मधुरा वृष्या वीर्योष्णा बृंहणी गुरुः ।
तिक्ता रसायनी हन्ति गुदजाननिलं तथा ॥ २६० ॥ [मुसली]

कपिकच्छूः स्वयं गुप्ता कण्डूला दुरवग्रहा ।
चण्डालगुप्ता लाङ्गूली मर्कटी स्यात् प्रहर्षणी ॥२६१॥
कपिकच्छूः परं वृष्या मधुरा बृंहणी गुरुः ।
तद्बीजं वातशमनं वाजीकरणमुत्तमम् ॥२६२॥ [केवाच]

पुत्रजीवो गर्भकरो यष्टीपुत्रोऽर्थसाधनः ।
पुत्रजीवो गुरुर्वृष्यो गर्भदः श्लेष्मवातजित् ॥ २६३ ॥ [पुत्रजीवा]

बन्ध्या कर्कोटकी देवी कुमारी विषनाशिनी ।
मनोज्ञा नागदमनी वन्ध्या योगीश्वरी मता ॥ २६४ ॥
बन्ध्या कर्कोटकी लघ्वी कफव्रणशोधनी ।
सर्पदंष्ट्रहरा तीक्ष्णा विसर्प विषनाशिनी ॥ २६५ ॥ [वन्ध्या]

विष्णुक्रान्ता नीलपुष्पी जयावस्थापराजिता ।
विष्णुक्रान्ता कटुर्मेध्या क्रिमि व्रणकफाञ्जयेत् २६६ [विष्णुक्रान्ता]

शङ्खपुष्पी शङ्खनाम्नी किरीटी कम्बुमालिनी ।
शङ्खपुष्पी स्मृतिहिता मेध्यावर्णविलासिनी ॥ २६७ ॥
शङ्खपुष्पी सरा मेध्या मता चेतोविकारिणी ।

रसायनी कषायोष्णा स्मृतिदा मोहनाशिनी २६७ [मण्डूकपुष्पी]

दुग्धिका मधुपर्णी स्यात् चीरिणी स्वादुपुष्पिका ।

दुग्धिकोष्णा गुरू रूक्षा वातघ्ना गर्भकारिणी ॥ २६८ ॥

स्वादुर्विष्टम्भिनी वृष्या कफ कुष्ठक्रिमीन् जयेत् ।[दूग्धी]

अर्कपुष्पी क्रूरकन्दा जलकामाभिरण्डिका ॥ २६९ ॥

अर्कपुष्पी क्रिमि श्लेष्ममेह पित्त विकारजित् । [अन्धाहोली]

भल्लातको नभोभल्ली वीरवृक्षोऽग्निवक्त्रकः ॥ २७० ॥

आरुष्करस्तथा रूक्षस्तपनोऽग्निमुखीधनुः ।

भल्लातकः कषायोष्णः शुक्लो मधुरो लघुः ॥ २७१ ॥

वातश्लेष्मोदरानाह कुष्ठार्शोग्रहणी गदान् ।

हन्ति गुल्म ज्वरश्वित्र वह्निमान्द्य क्रिमिज्वरान् ॥२७२॥ [भेलावा]

चरपोटा दीर्घपत्रा कुन्तली तिक्तकामता ।

चरपोटा हिमारूक्षा भेदिनी श्वास कासजित् २७३ [चरपोटा]

द्रोणपुष्पीश्वसनकः पालिन्दी कुम्भयोनिका ।

छत्राणि छत्रको द्रोणा कौडिन्यो वृत्तसारकः ॥२७४॥

द्रोणपुष्पी गुरू रुक्षा स्वादूष्णा वात पित्तकृत् ।

भेदनी कामला शोफ कफ क्रिमिहरा कटुः २७५ [द्रोणपुष्पीना०

ब्राह्मी सरस्वती सोमा सत्याह्वा ब्रह्मचारिणी ।

मण्डूकपर्णी मांडूकी त्वाष्ट्रीदिव्या महौषधी ॥ २७६ ॥

कपोतविट्कामुनि का लावण्या सोमवल्लरी ।

ब्राह्मी हिमा सरा स्वादुर्लघुर्मेध्या रसायनी ॥ २७७ ॥

स्वर्य्यास्मृतिप्रदा कुष्ठ पाण्डु मेहास्र कासजित् ।

विष शोफ ज्वरहरा तद्वन् मण्डूकपर्णिणी [ब्रह्मीब्राह्मी मण्डूकी]

सुवर्चलाऽर्ककान्ता स्यात् सूर्य्यभक्ता सुखोद्भवा ।

सूर्य्यावर्त्ता रवि प्रीता त्वन्या ब्राह्मसुवर्चला ॥ २७९ ॥
सुवर्चला गुरुः शीता मूत्रला कफवातजित् ।
अन्योष्णाः कुष्ठमेहास्म कृच्छ्रज्वरहरा लघुः २८० [सोचल ब्रह्मसोचल]
मत्स्याची वालिका मत्स्य गन्धीमत्स्यादनी तथा ।
मत्स्याची ग्राहिणी शीता कुष्ठ पित्त कफास्रनुत् २८१ [माछ्भी]
तोयपिप्पल्यम्बुवल्लीपल्लूरः कच्छटः तथा ।
जलपीपल्यका हृद्या चक्षुष्या शुक्रला लघुः ॥ २८२ ॥
संग्राहिणी हिमा रूक्षा रक्तदाह व्रणापहा । [जलपिप्पली]
गोजिह्वा गोजिका गोभी दार्विकाखर पर्णिनी ॥२८३॥
गोजिह्वा वातला शीता ग्राहिणी कफपित्तनुत् ।
हृद्या प्रमेह कासास्र व्रणज्वरहरा लघुः ॥२८४॥ [गोभी]
नागाह्वा दमनी नाग गन्धा भुजगपर्णिनी ।
स्यान्नागदमनी वर्णालूता सर्प विषापहा २८५ ॥ [नागदमनी]
गुञ्जा शिखण्डिका ताम्रा रक्तिका ककणन्तिका ।
श्वेतान्या चक्रिका चूडा दुर्मुखा काकपीलुका ॥ २८६
गुञ्जाकेश्या बलकरा त्वच्या पित्त कफापहा ।
नेत्रामयहरा वृष्या हन्ति कण्डूग्रह व्रणान् ॥२८७॥
क्रिमीन् प्रलुप्त कुष्टानि तद्वच्छ्वेतापि शस्यते । [गुञ्जानाम]
वेल्लन्तरो दीर्घपत्रो वीरद्रु र्वेल्लवारकः ॥ २८८ ॥
वेलन्तरोऽश्मनुद्ग्राही कफ कृच्छ्रानिलार्त्तिजित् [वखेला]
वन्दाकं स्याद्वृक्षरुहा शेखरी कामवृक्षकः ॥ २८९ ॥
हृत्यादनी कामतरुः काम्निज्यापदरोहिणी ।
वन्दाकः कफवातास्र वृष्यो व्रणविषापहः ॥२९०॥ [वन्दा]
पिण्डारः करहाटः स्यात् तीक्ष्णकोलः कुरङ्गकः ।

पिण्डारो मधुरः शीतः शोथ पित्त कफापहः॥२९२॥ [पिण्डारः]

छिक्किकाच्चवकः क्रूरो नासा संवेदना पटुः।

छिक्किका पित्तजा कुष्ठ क्रिमि वात कफापहा॥२९३॥ [छिक्नी]

रोहितो दाडिमी पुष्पो रोहितः कूटशाल्मलिः।

शीहारी रोहिणी रोहो रक्तघ्नः पारिजातकः॥२९३॥

रोहितकः सरो गुल्म यकृत्प्लीहोदरापहः। [रुहेडो]

मेचकः स्यान्मोचरसः शाल्मली वेष्टकः स्मृतः॥ २९४॥

मोचनिर्यासकः पिच्छा मोचास्रावी च वेष्टकः।

मोचकः शीतलो ग्राही गुरुष्योऽति सारजित्॥२९५॥

प्रवाह कासपित्तास्त्र कफ दाह निवर्हणः। [मोचरस]

अजगन्धा वस्तु गन्धा कवरी पूतवर्वरः॥ २९६॥

अजगन्धा लघूष्णा हृद्या तु कफवातनुत् [ववई]

सौरेयकः सहचरः सौरेयः किङ्करातकः॥ २९७॥

दासी सहचरः किण्टी शैर्यको खदु कण्टकः।

रक्तपुष्पः कुरुवकः पीतो ज्ञेयः कुरण्टकः॥ २९८॥

नील आर्त्तगलः प्रोक्तो वाणश्चोदनपाक्यपि।

सौरेयः कुष्ठवातास्त्र कफकण्डू विषापहः॥ २९९॥

तिक्तोष्णो मधुरः केश्यः सुस्निग्धः केशरञ्जनम्। [कट्सेरवा]

श्वेतस्यन्दाश्वेतपुष्पा कटभिर्गिरिकर्णिका॥ ३००॥

सितापराजिताश्वेता विषघ्नी मेह नाशिनी।

नीलस्यन्दाव्यक्तगन्धा नीलपुष्पागवादिनी।

श्वेतस्यन्दाद्वयं शीतं ग्रहघ्नं दृष्टिकण्ठकृत्।

कुष्ठशूल त्रिदोषाम शोफ व्रणविषापहम्॥३०२॥ [गिरिकन्दा]

इक्षुरः क्षुरमेधाख्यः कोकिलाक्षः क्षुरः स्मृतः॥

तैलकण्डस्विच्वरिचुर्बालिका चेचु गन्धिका: ॥ ३०३ ॥
चुरक: शीतलो हृष्यो गुरुर्वात कफास्रजित् । [माखुरेण]
कर्पास: पटशूलच्छादनीवादर: पिचु: ॥ ३०४ ॥
कर्पासको लघु: कोष्णो मधुरो वातनाशन: ।
तद्बीजं स्तन्यदं हृष्यं स्निग्धं कफकरं गुरु ३०५ [कर्पास]
आराम शीतला देवी गन्धा कुक्कुरमर्दन: ।
आरामशीतला शीता कटु पित्तकफास्रजित् ३०६ [आरामशीतला
कुकुरद्रुस्ताम्र चूडस्सूक्ष्मपत्रो मृदुच्छद: ।
कुक्कुरद्रु: कटुस्तिक्तो ज्वर रक्त कफापह: ३०७ [कुक्कुरद्रु:]
वामी शङ्खधरा वारि ब्राह्मी च हिलमोचिक: ।
वामी शोफहरा कुष्ठ पित्त श्लेष्मानिलापहा ॥ ३०८ ॥ [वामी]
शरपुङ्खा कालशाकं श्रीहारि कालकामत: ।
शरपुङ्खा यकृत्प्लीह दुष्टव्रणविषापहा ॥ ३०९ ॥
तिक्ता कषाया कासास्र श्वास ज्वरहरा लघु: । [शरपुङ्खा]
बलामोटा जया सूक्ष्म पत्रा ज्ञेया पराजिता ॥ ३१० ॥
बलामोटा विष श्लेष्मा कच्छनु द्विजयप्रदा । [बलामोटा]
सुदर्शना सोमवल्ली चक्राङ्का मधुपर्णिका ॥
सुदर्शना स्वादुरुष्णा कफशोफास्र वातजित् । [इति सुदर्शनाम]
मयूराख्या शिखा ज्ञेया साहस्री मधुकच्छदा ॥ ३११ ॥
मयूराह्वशिखा लघ्वी पित्त श्लेष्मातिसारजित् । [मयूरशिखा]
लक्ष्मणा पुत्रदा रक्ता विन्दुपत्रा च नागिनी ॥ ३१२ ॥
गोक्षीर सदृशं पुष्पं रोमवल्लि समन्वितम् ।
रक्तविन्दु समं पत्रं लक्ष्मणाकारमुच्यते ॥
लक्ष्मणा गर्भदा शीता ... हृष्या त्रिदोषनुत् । [लक्ष्मणा]

मांसरोहिण्यतिवृद्धा वृत्ता चर्मकसाकसा ॥ ३१३ ॥
स्यान्मांसरोहिणी वृष्या सरादोषत्रयापहा ।[मांसरोहिणी]
अस्थि संहारको वज्र वल्लरी कोष्ट घण्टिका ॥ ३१४ ॥
वज्राङ्गी ग्रन्थिमान् वज्र प्रोक्तास्यादस्थि शृङ्खला: ।
अस्थि संहारक: शीतो वृष्यो वातहरोऽस्थि युक् ३१५ [हरजीर]
अर्क: सूर्य्याह्वय: क्षीरो सदापुष्पो विकीरण: ।
मन्दारो वसुकोलर्को राजार्को द्वे श्वेतपत्रक: ॥ ३१६ ॥
अर्कद्वयं यक्ष वात कुष्ठ कण्डू विष व्रणान् ।
निहन्ति शीह गुल्मार्शो यकृत्श्लेष्मोदरक्रिमीन् ॥ ३१७॥[आक]
करवीरोऽश्वहाश्वेत पुष्पास्याच्छतपुष्पक: ।
रक्तपुष्पो परश्चण्डो लगुड: करवीरक: ॥ ३१८ ॥
करवीरद्वयं नेत्र शोफकुष्ठ व्रणापहम् ।
लघूष्णं क्रमि कण्डूघ्नं भक्षितं विषवन्मतम् ॥३१९॥ [करवीर]
धत्तूर: कितवो धूर्त्तो देवता मदन: शठ: ।
उन्मत्तो मातलस्तूरी तरक: कनकाह्वय: ॥ ३२० ॥
धत्तूरो मदवर्णाग्नि वान्ति कुज्वर कुष्ठनुत् ।
उष्णो गुरुव्रणश्लेष्म कण्डू क्रमि विषापह:३२१[धतूरा]
कलिकारी वह्निमुखी लाङ्गली गर्भपातिनी ।
विशल्या हलिनी शीरी प्रमाता शुक्लपुष्पिका ॥३२० ॥
विद्युदुल्काऽग्निजिह्वा च कथिता पुष्पसौभरा ।
वह्निशिखाग्निका ज्ञेया नलरन्ध्री च सा स्मृता ॥३२३॥
कलिकारी शरा कुष्ठ शोफार्शो व्रणशूलजित् ।
तीक्ष्णोष्णा क्रिमिनुल्लघ्वी पित्तला गर्भपातिनी३२४[करिहारी]
कुमारी मण्डला माता गृहकन्याति पिच्छला ।

रसायनी कटिकिनी स्थवराख्या वनोद्भवा ॥
कुमारी मेदनी सीता यकृत्प्लीह कफ ज्वरान् ॥२२५॥
निहन्ति ग्रन्थि विस्फोट पित्तरक्त त्वगामयान् । [घीकुमारी]
भङ्गाङ्गजा मातुलानी मोहिनी विजया जया ॥२२६॥
भङ्गा कफहरा तिक्ता ग्राहिणी दीपनी लघुः ।
तीक्ष्णोष्णा पित्तलानोह मदकृद्वाऽग्निवर्द्धिनी ॥२२७॥ [भाङ्ग]
काञ्चनिः शोणफलिनी काकायुः काकवल्लरी ।
काञ्चनी स्तन्यदा मूर्द्ध व्यथा दोषत्रयापहा ॥२२८ [काञ्चनि]
दूर्वाशस्याः शीतकरी गोलोमी शतपर्विका ।
अन्या श्वेता श्वेतदण्डा भार्गवी दुर्मताऽऽह्वा ॥ २२९ ॥
दूर्वा हिमा विसर्पास्त्रतृड् पित्त कफदाहजित् ।[दूर्वा]
गण्डदूर्वा मत्स्यगन्धा मत्स्याक्षी शकुलादनी ॥ २३० ॥
गण्डदूर्वा हिमा लोह द्राविणी ग्राहिणी लघुः ।
दाहतृष्णा बलासास्त्र कुष्ठ पित्त ज्वरापहा ॥ २३१ ॥[गण्डदूर्वा]
काशः सुकाण्डकाशेक्षुः इषीकः श्वेतवासरः ।
इक्षारिकेतु काशश्च स चैवेक्षु रसः स्मृतः ॥ २३२ ॥
कासकृच्छ्राश्मदाहास्त्र पित्तक्षयहरो हिमः । [काशः]
दर्भो वर्हि कुशस्तीक्ष्णः सूच्यग्रो यज्ञभूषणः ॥ २३३ ॥
दर्भकृच्छ्राश्मतृट् पित्त वस्तिनुत्कफ रक्तजित् । [कुश]
मुञ्जः क्षुरा स्थूलदर्भो बाणाह्वो ब्रह्ममेखलः ॥ २३४ ॥
मुञ्जाऽनुष्णो विसर्पास्त्र मूत्र वस्त्यक्षिरोगजित् । [मुञ्ज]
नलो रन्ध्री पुष्पकृत्युर्दमनोऽनन्तकः पिटः ॥ २३५ ॥
नलो मूत्रार्त्तिदाहास्त्र कफपित्त विसर्पजित्। [नरकट]
वंशो वेणु कीचकः स्यात्कर्मारस्त्वचि सारकः ॥ २३६॥

वंश: सरो हिम: पित्त कफदाहास्र शोफजित् ।
तत्करीरो गुरुर्भेदी श्लेष्मलो वात पित्तजित् ॥३३७॥
तथा च भेदकोऽत्युष्ण: कफघ्नो वात पित्तजित्। [बांस]
जवानी जवनी तीव्रा तुरुष्का मदकारिणी ॥ ३३८ ॥
जवानी जीवनी रूक्षा ग्राहिणी मादिनी गुरु: । [जवाइनि]
तिलभेद: खसतिल: शुभ्रपुष्पो लसत्फल: ॥ ३३९ ॥
हृष्यो बल्य: खसतिल: श्लेष्मलो वातजिद्गुरु: ।
वल्कलस्तत्फलोद्भूतो रूक्षो ग्राही विशेषक: ॥ ३४० ॥[खसखस]
आफूकन्तद्रसोद्भूत महिफेनं सफेनकम् ।
आफूकं शोषणं ग्राहि श्लेष्मघ्नं वात पित्तलम् ॥ ३४१ ॥[अफीम]
छिलिहिण्टो महामूल: पाताल गरुडाह्वय: ।
छिलिहिण्टापनं हृष्या श्लेष्मला पवनापहा॥३४२॥[छिरिहिटा]
यो रत्नां मुखतिलक: कटारमल्लस्तेन श्रीमदनृपेण निर्मितेऽत्र।
ग्रन्थेऽभून्मदनविनोदनाम्नि पूर्णो वर्गोऽयं ललितपदाङ्कितोभयादि
॥ ३४३ ॥ [प्रथम: ] ।

ॐ तद्विराजितमध्यमनन्तं श्रीरुचिपरं परमक्षरमेकम् ।
श्रीमदनक्षितिनाथसदा ते विष्णुपदं विपदं विनिहन्तु ॥३४४
शुण्ठी विश्वौषधं विश्वं कटुभद्रं कटूत्कटम् ।
महौषधं शृङ्गवेरं नागरं विश्वभेषजम् ॥ ३४५ ॥
शुण्ठीरुच्यामवातघ्नी पाचनी कटुका लघु: ।
स्निग्धोष्णा कटुका पाके कफ वात विबन्धनुत् ॥३४६॥
हृष्या श्वयथुवमि श्वास कास शूलहृदामयान् ।
हन्ति श्लीपदशोफार्शमानाहोदरमारुतान्३४७[शुण्ठी]
कटूष्ण दीपनं हृष्यं रुच्यमार्द्रकमागरम् ।

श्वास कास वमी हिक्का वात श्लेष्म विबन्धनुत् ॥३४८॥
पाचनं रोचनं हृद्यं कटूष्णं वह्निदीपनम् ।
वातप्रकोपशमनं पाचनं शोथ हृत्परम् ॥ ३४९ ॥
भोजनादौ सदा पथ्यं जिह्वाकण्ठ विशोधनम् ।
अव्यक्त रसवीर्य्यत्वां तत्परन्तु कफापहम् ॥ ३५० ॥
काञ्जिकार्द्रं स लवणं दीपनं पाचनं परम् ।
वात प्रकोपशमनं हर्षणं लवणार्द्रकम् ॥३५१॥
[अन्योऽपि] आर्द्रकं शृङ्गवेरन्तन्महौषधमुदाहृतम् ।
आर्द्रकं नागरगुणं भेदनं दीपनं गुरु ३५२ [आर्द्रकम्]
मरिचं वह्निजं तीक्ष्णं मलिनं श्यामभूषणम् ।
मरीचं कटुकं तीक्ष्णं दीपनं कफ वातनुत् ॥ ३५३ ॥
उष्णं पित्तकरं रूक्ष श्वास शूल क्रिमीञ्जयेत् ।
तदार्द्रं मधुरं पाके नात्युष्णं कटुकं गुरु ॥ ५४ ॥
किञ्चित्तीक्ष्णगुणं श्लेष्म प्रसेकी स्यादपित्तलम्। [मरीचा]
पिप्पली चपला कृष्णा मागधी मगधाकणा ॥ ३५५ ॥
विश्वोपकुल्या वैदेही शौण्डी स्यात्तीक्ष्णतण्डुला ।
पिप्पली दीपनी हृद्या स्वादु पाकरसायनी ॥ ३५६ ॥
अत्युष्णा कटुका स्निग्धा कफ वातहरा लघुः ।
पित्तला रेचनी हन्ति श्वास कासोदर ज्वरान् ॥ ३५७
कुष्ठ प्रमेह गुल्मार्शः प्लीह शूलाममारुतान् ।
आर्द्रा कफ प्रदा स्निग्धा शीतला मधुरा गुरु.३५८ [पिप्पली]
विश्वोपकुल्यामरिचैः त्र्यूषणं कटुकं कटु ।
व्योषं कटु त्रयं तत् स्यात् स ग्रन्थि चतुरूषणम् ॥३५९
त्र्यूषणं दीपमं हन्ति श्वास कास त्वगामयान् ।

गुल्ममेह कफ स्थौल्य मेदः श्लीपदपीनसान् ३६० [त्र्यूषणं चतुरूषणं

कणामूल कटु ग्रंथि पिप्पली मूलभूषणम् ।

षट्‌ग्रन्थि ग्रन्थिकं मूलं मागधं चटिकाशिरः ॥ ३६१ ॥

दीपनं पिप्पलीमूलं कटूष्णं पाचनं लघु ।

रूक्षं पित्तकरं भेदी कफ वातोदरा पहम् ३६२ [पिप्पलीमूलं]

चव्यं चवणमुच्छिष्टश्चविकाकोलवल्लिका ।

पिप्पली मूलवत् तस्या विशेषाद्‌गुदजापहम् ॥ ३६२ ॥

चव्यपुष्पज्वरश्वास कासक्षय विनाशनम् । [चव्य]

तत्फलं श्रेयसीहस्ति मागधा गजपिप्पली ॥ ३६३ ॥

गजकृष्णा कटुर्वात श्लेष्मनुदग्निवर्द्धिनी ।

उष्णा निहन्त्यऽतीसारं श्वास कण्ठामयक्रिमीन् ३६४ [गजपिप्पली

चित्रकोऽहत् भुग्व्यालो दारुणो दहनोऽरुणः ।

अग्निमाली हविःपाची वह्निनामा विशेषतः ॥ ३६५ ॥

चित्रकः कटुकः पाके वह्निकृत्पाचनो लघुः ।

रूक्षोष्णो ग्रहणी कुष्ठ शोफार्शः कृमि कासजित् ॥ ३६६

श्लेष्मानिलहरो ग्राही तच्छाकं श्लेष्मवातनुत् । [चित्रक]

पिप्पली मगधा मूल चव्य नागरचित्रकैः ॥ ३६७ ॥

पञ्चकोलं कफानाह गुल्मशूलारुचीव्जयेत् ।

मरिचेभयुतं तत्तु षडूषणमुदाहृतम् ३६८ [पञ्चकोलषडूषणम्]

शतपुष्पा शत व्योषा शताह्वा कारवीमिसिः ।

अवाक्पुष्पीत्वचि छत्रा शेतिका मागधी परा ॥ ३६९ ॥

शतपुष्पा लघुस्तीक्ष्णा पित्तकृद्दीपनी कटुः ।

उष्णा ज्वरानिलश्लेष्म व्रणशूलाक्षि रोगजित् ॥ ३७० ॥

शेतिका तद्‌गुणा प्रोक्ता विशेषाद्योनि शूलहृत् [सौआ बडी सौम्फ

मिश्रेया मिश्रिशालीनौ शाली शीतशिवा मता ॥३७१॥
मिश्रेया दीपनी हृद्या बद्ध विड् क्रिमि शुक्रनुत् ।
रूक्षोष्णा तत्फलं काश वमि श्लेष्मानिलाञ्जयेत्॥३७२॥ [मेथी]
मेथका वल्लिका शैलुरक्षित्यो वनमेथिका ।
अक्षित्योऽल्पगुणास्तस्माद्वाजिनां स तु पूजित: ३७३ [वनमेथी]
अजमोदाऽत्युग्रगन्धा मोदाहस्ति मयूरक: ।
खराह्वा कारवी वल्ली वस्तमोदा च मर्कट: ॥ ३७४ ॥
अजमोदा कटुस्तीक्ष्णा दीपनी कफ वातनुत् ।
उष्णा विदाहिनी हृद्या वृष्या बद्धमला लघु: ॥३७ ॥
नेत्रामय क्रमि छर्दि हिध्मवस्तिरुजञ्जयेत् । [अजमोदा]
जीरकं दीर्घकं शुक्लमजा जीकण जीरकम् ॥ ३७६ ॥
जीरकं जरणं कृष्णं वर्षाकाली सुगन्धिकम् ।
कालिका वाष्पिका कुञ्चिकारवीचोपकुञ्चिका ॥ ३७७ ॥
पृथ्वीका सुखवी पृथ्वी स्थूलजान्युपकालिका ।
जीरकं त्रितयं रूक्षं कटूष्णं दीपनं लघु ॥ ३७८ ॥
संग्राहि पित्तलं मेध्यं गर्भाशयविशुद्धिकृत् ।
चक्षुष्यं पवनाध्मान गुल्मछर्दि बलासजित् ॥ ३७९ ॥
[श्वेतजीर कालजीरकलौञ्जी ।]
जवानी दीप्यको दीप्यो दीपनीया जवानिका ।
जवसाह्वोग्रगन्धा स्याज्जवाह्वा भूकदम्बक: ॥ ३८० ॥
जवानी पाचनी रूक्षा तीक्ष्णोष्णा कटुका लघु: ।
वातश्लेष्मोदरानाह गुल्मप्लीहक्रिमीञ्जयेत् ॥ [जवाइन]
जवानीया जवानी स्यात्तो हारोऽजन्तु नाशन: ।
चौहारस्तद्गुणः प्रोक्तो विशेषात् क्रिमिनाशन:३८१[चौहारीजव०

अजगन्धा पूतिकीटा बर्बरी पूतिबर्बरः ।
कारवी खरपुष्पा च तुङ्गी पूतिमयूरकः ॥ ३८२ ॥
अजगन्धा कटुस्तीक्ष्णा रूक्षा हृद्याऽग्निवर्द्धिनी ।
दृष्टिमान्द्यप्रदा लघ्वी शुक्रवातकफापहा ॥३८३॥
[वचनाम] वचोग्रगन्धा गोलोमी षड्ग्रन्था जटिला मता ।
जटिला शतपर्वाऽन्या लोमशा हैमवत्यपि ॥ ३८४ ॥
वचोष्णा कटुका तिक्ता वामनी स्वरवह्निकृत् ।
अपस्मारकफोन्मादभूतशूलानिलान् जयेत् ॥३८५॥ [वचा]
हपुषा वपुषा विस्रा विगन्धा विस्रगन्धिका ।
हपुषा दीपनी तिक्ता कटूष्णा तुवरा गुरुः ॥ ३८६ ॥
पित्तोदरसमीरार्शोग्रहणीशोफगुल्मजित् । [दालमी शोफ]
विड़ङ्गं जन्तुहननं क्रिमिघ्नं क्षुद्रतण्डुलाः ॥ ३८७ ॥
भूतघ्नी तण्डुला घोषा कराला मृगगामिनी ।
विड़ङ्गं कटु तिक्तोष्णं रूक्षं वह्निकरं लघु ॥ ३८८ ॥
गुल्माध्मानोदरश्लेष्मक्रिमिवातविबन्धनुत् । [विड़ङ्ग]
धान्याकं धान्यकं धान्यं धानेयं च वितुन्नकम् ॥ ३८९ ॥
कुस्तुम्बुरु तदार्द्रं तु धानी धानेयकालुकाः ।
धान्यकं तुवरं स्निग्धमवृष्यं मूत्रलं लघु ॥ ३९० ॥
हृद्यं रूच्यं बद्धविट्कं स्वादु पाके त्रिदोषनुत् ।
पाचनं श्वासकासास्रतृष्णामर्शःक्रिमीन् जयेत् ॥ ३९१ ॥
आर्द्रीका तद्गुणा स्वादुर्विशेषात्पित्तनाशिनी । [धनीया धाणा]
हिङ्गुपत्री पृथुस्तन्वी पृथ्वीका चारुपत्रिका ॥ ३९२ ॥
वाष्पिका कारवी तन्त्री विल्विका दीर्घिका तथा ।
हिङ्गपत्रा परा वेणुपत्री हिङ्गु शिवाटिका ॥ ३९३ ॥

जन्तुका रामठो नाड़ी पिण्डा हिङ्गुफला मता।
हिङ्गुपत्रीद्वयं हृद्यं तीक्ष्णोष्णं पाचनं कटु ॥ ३९४ ॥
हृद्बस्तिरुग्विबन्धार्शःश्लेष्मगुल्मानिलापहम्। [हिङ्गुपत्री]
हिङ्गु वाह्लीकमत्युग्रं रामठं भूतनाशनम् ॥ ३९५ ॥
अगूढ़गन्धा जरणं जन्तुघ्नं सूपभूषणम्।
हिङ्गूष्णं पाचनं रुच्यं तीक्ष्णोष्णं कफवातनुत् ॥ ३९६ ॥
शूलगुल्मोदरानाह क्रिमिजित्पित्तवर्द्धनम्। [हिङ्गु]
वंशजा वैणवी क्षीरी त्वक्क्षीरी वंशरोचना ॥ ३९७ ॥
तुगाक्षीरी तुगा वंशी वंशक्षीरी शुभा सिता।
वंशजा बृंहणी वृष्या शीतला मधुरा जयेत् ॥ ३९८ ॥
तृष्णाक्षयज्वरश्वासकासपित्तास्रकामलान्। [वंशलोचन]
सैन्धवं सिन्धुजं शुद्धं पाणिमन्थं पटूत्तमम् ॥ ३९९ ॥
सैन्धवं मधुरं हृद्यं दीपनं शीतलं लघु।
चक्षुष्यं पाचनं स्निग्धं वृष्यं दोषत्रयापहम् ॥४००॥ [सैन्धव]
[सिन्धुगुण] सौवर्च्चलं सुगन्ध्याख्यं रुचकं हृद्यगन्धकम्।
सौवर्च्चलं वह्निकरं कटूष्णं विशदं लघु ॥ ४०१ ॥
उद्गारशुद्धिदं सूक्ष्मं विबन्धानाह शूलजित्। [सौवर]
विड़ं कृत्रिमकं षाक्यं धूर्त्तं द्राविड़मासुरम् ॥ ४०२ ॥
विड़ं लघूष्णं विष्टम्भि शूलहृद्गौरवारुचीः।
हन्त्यानाहकफौ शूलमधो वाताऽनुलोमनम् ॥४०३॥ [विड़म्]
सामुद्रं वारिसम्भूतमक्षीवमसुरं तथा।
सामुद्रं दीपनं स्वादु नात्युष्णं भेदनं कटु ॥ ४०४ ॥
श्लेष्मलं वातनुत्तिक्तमरूक्षं नातिपित्तलम्। [सामुद्रकम्]
औद्भिदं भूमिजं भौमं पार्थिवं पृथिवीभवम् ॥ ४०५ ॥

औद्भिदं रक्तलं सूक्ष्मं लघु वातानुलोमनम् । [औद्भिदम्]

गण्डाख्यं रोमलवणं रोमशाकम्भरीभवम् ॥ ४०६ ॥

गण्डाख्यं लघुवातघ्नमत्युष्णं भेदि मूत्रलम् । [गण्ड]

क्षारं पांशुभवं त्वौषमौषरं पांशवं वसु ॥ ४०७ ॥

क्षारं गुरु कटु स्निग्धं श्लेष्मलं वातनाशनम् । [क्षारम्]

[सोरानाम] काचं त्रिकूटं पाक्याह्वं लवणं काचसम्भवम् ॥ ४०८

काचं दीपनमत्युष्णं रक्तपित्तविवर्द्धनम् । [काचलवणम्]

यवक्षारः सूकपाक्यो यवसूको यवाग्रजः ॥ ४०९ ॥

स्वर्जिका स्वर्जिकापाक्यसुखपाक्यसुवर्चिका ।

यवक्षारोऽग्निकृद्धातश्लेष्मश्वासगलामयान् ॥ ४१० ॥

आमार्शोग्रहणीगुल्मयकृत्प्लीहरुजो जयेत् ।

स्वर्जिकाऽन्यगुणा तस्माद्विशेषात् गुल्मशूलनुत् ॥ ४११ ॥

[यवाच्छारसाजो] टङ्कणो मालतीजाती द्रावी लोह विशुद्धिदः ।

टङ्कणोऽग्निकरो रूक्षः कफघ्नो वातपित्तजित् ॥ ४१२ ॥

[सोहागा] सुधाह्वयं सुधा सौधभूषणं कटु शर्करा ।

सुधाक्षारोऽग्निसङ्काशः पाकी क्लेदी विदारणः ॥४१३॥[सुधाक्षार]

[चूनानाम] पलाशतिलनालश्वदंष्ट्रकाकदलीभवः ।

अपामार्गोऽर्कसेहुण्डा मोचकादिसमुद्भवः ॥ ४१४ ॥

क्षारो वह्निसमाः सर्वे पाचना भेदिदारुणाः ।

लघवः क्लेदिनस्तीक्ष्णाः शुक्रजा दृष्टिनाशनाः ॥ ४१५ ॥

रक्तपित्तकरा घ्नन्ति विबन्धानाहपीनसान् ।

यकृत्प्लीहबलासामगुल्मार्शोग्रहणीक्रिमीन् ॥४१६॥[सर्वक्षारा]

यो राज्ञां मुखतिलकः कटारमल्ल-

स्तेन श्रीमदननृपेण निर्मितेऽत्र ।

ग्रन्थेऽभून्मदनविनोदनाम्नि पूर्णः
शुण्ठ्यादिः खलु भिषजो हिताय वर्गो द्वितीयः २ ।

आरोग्यपाणौ नववल्लवीभिर्बालं विनोदात्परिचुम्बितास्यम् ।
ओष्ठं पिबन्तं प्रतिबद्धदन्तमाश्चर्य्ययुक्तं हरिमाश्रयामि ॥१॥

कर्पूरः स्फटिकश्चन्द्रः सिताभ्रो हिमबालुकः ।
हिमोपलः शीतरजो भूतिकस्तु हिमाह्वयः ॥
हिमाभ्रो घनसारश्च चन्द्राह्वश्चापि गीयते ।
कर्पूरः शीतलो वृष्यश्चक्षुष्यो लेखनो लघुः ॥
कफदाहास्यवैरस्यमेदःशोथविषापहः ॥ ३ ॥ [कर्पूर]

कस्तूरिको मृगमदो वेदमुख्या मृगाण्डजः ।
मृगनाभिरथाऽन्या स्याल्लता कस्तूरिकामदः ॥ ४ ॥
कस्तूरी शुक्रला गुर्वी कटुकः कफशीतजित् ।
उष्णा हन्ति विषच्छर्दिशोकदौर्गन्ध्यमारुतान् ॥ ५ ॥
लता कस्तूरिका तद्वच्चग्रा शीता लघुस्तथा॥ ६॥ [कस्तूरिकाद्वयं]

मार्जारी पूतिका पूतिकचा स्याद्गन्धचेलिका ।
मार्जारी वान्ति माधत्ते चक्षुष्या कफवातजित् ॥७॥ [जिवादि]

चन्दनं तिलपर्णं स्यान्महार्हं श्वेतचन्दनम् ।
भद्रश्रयं मलयजं गोशीर्षं गन्धसारकम् ॥ ८ ॥
चन्दनं शीतलं रूक्षं तिक्तमाह्लादनं लघु ।
हृद्यं वर्ण्यं विषाश्लेष्मतृष्णापित्तास्रदाहजित् ॥९॥ [चन्दन]

रक्तचन्दनमुद्दिष्टं लोहितं क्षुद्रचन्दनम् ।
ताम्रसारं रक्तसारं ज्योतिः सोमश्च रञ्जनम् ॥ १० ॥
रक्तं शीतं गुरु स्वादु च्छर्दितृष्णास्रपित्तनुत् ।
तिक्तं नेत्रहितं वृष्यं ज्वरघ्नं विषापहम् ॥११॥ [रक्तचन्दन]

कालीयकं पीतसारं पीतं नारायणप्रियम् ।
कालीयकं रक्तगुणं विशेषात् पवनापहम् ॥१२॥ [मलेन्द्री]
कृष्णा गुरु स्यादगुरु राजार्हं विश्वरूपकम् ।
जोगकं शीतमलिनं क्रिमिजग्धमनन्तकम् ॥ १३ ॥
कृष्णा गुरूष्णं कर्णाक्षिरोगनुत्पित्तलं लघु । [कृष्णागुरु]
कुङ्कुमं चारु वाह्लीकं वर्ण्यमग्निशिखं वरम् ॥ १४ ॥
काश्मीरं पीतमभ्राह्वं सङ्कोचं पिशुनांशुकम् ।
कुङ्कुमं कटुकं हिध्माशिरोरुग्व्रणजन्तुजित् ॥
उष्णं हास्यकरं वर्ण्यं व्यङ्गदोषत्रयापहम् । [कुङ्कुमम्]
सिह्लकः कपिजो धूम्रस्तुरुष्कः पिण्डतः कपिः ॥ १५ ॥
सिह्लकः कुष्ठकण्डूघ्नः स्निग्धोष्णः शुक्रकान्तिकृत् । [सिह्लारस]
एलवालुकमैल्वालु वालुकं हरिवालुकम् ॥ १६ ॥
एल्वालु शीतलं हन्ति कण्डूकुष्ठकफक्रिमीन् ।
तृट्छर्दिकफपित्तास्रहृन्मूत्रगदजिल्लघुः ॥ १७ ॥ [एलवालुक]
जातीफलं जातीसूतं शालूकं मालतीसुतम् ।
जातीफलं लघु स्वर्य्यं हृद्यं दीपनपाचनम् ॥ १८ ॥
उष्णं कफानिलच्छर्दिक्रिमिपीनसकासजित् ॥१९॥ [जाइफल]
जातीपत्री जातिपर्णी मालतीपत्रिका तथा ।
जातीपत्री लघूष्णा स्यात्कफक्रिमिविषापहा ॥२०॥[जातीपत्री]
लवङ्गशिखरं दिव्यं लवं चन्दनपुष्पकम् ।
श्रीपुष्पं देवकुसुमं भृगारं वारिसम्भवम् ॥ २१ ॥
लवङ्गं लघु चक्षुष्यं हृद्यं दीपनपाचनम् ।
शूलानाह कफश्वासकास छर्दिक्षयापहम् ॥ २२ ॥ [लवङ्ग]
कङ्कोलं कटुकं कोलमारीचं माधवोषितम् ।

कङ्कोलमुष्णं हृद्रोगकफवाताग्निमान्द्यजित् ॥२३॥ [कङ्कोलम्]

एला त्रुटिश्चन्द्रबाला बहुला निष्कुटिस्त्विषा ।
कपोतवर्णा सूक्ष्मैला कोनटि द्राविड़ी मदी ॥ २४ ॥
एला सूक्ष्मा कफश्वासकासार्शोमूत्रकृच्छ्रनुत् । [एला]
स्थूलैला त्रिपुटा कन्या भद्रैला त्रिदिवोद्भवा ॥
स्थूलैला रोचनी तीक्ष्णा लघूष्णा कफपित्तजित् ।
हृल्लासविषवस्त्यास्यशिरोरुग्वमिकासनुत् ॥ २६ ॥ [स्थूलैला]

त्वचं वराङ्गं सकलं त्वक्कोचं तनुकं वरम् ।
लाटपर्णं घनं भृङ्गं गुरुत्वक् स्वर्णभूमिकम् ॥ २७ ॥
त्वचं लघूष्णं कटुकविषदं स्वादु पित्तलम् ।
हृद्वस्तिरोगवातार्शःपीनसक्रिमिशुक्रनुत् ॥ २८ ॥ [त्वचम्]

पत्रं दलाह्वन्ताम्रमन्तमालं रोम रोमशम् ।
पत्रमुष्णं लघुस्निग्धहृल्लासार्शोऽनिलापहम् ॥२९॥ [तेजपत्र]

नागकेशरकं नागं चाम्पेयं केशरञ्जनम् ।
नागकेशरकं रूक्षमुष्णं लघ्वामपाचनम् ॥
दौर्गन्ध्यकुष्ठवीसर्पकफपित्तविषापहम् ॥ ३० ॥ [नागकेशर]

एला द्विविभिरुद्दिष्टं त्रिजातं त्रिसुगन्धकम् ॥
चतुर्जातं सनागं तत् द्वयं वातकफापहम् ३१ [त्रिजातं चतुरजातम्]

तालीसपत्रं तालीसं धात्रीपत्रं सकोदनम् ।
अपरं ग्रन्थिकापत्रं पात्राढ्यं तुलसीच्छदम् ॥ ३२ ॥
तालीसं लघु तीक्ष्णोष्णं श्वासकासकफानिलान् ।
निहन्ति रुच्यं गुल्मामवह्निमान्द्यक्षयामयान् ३३ [तालीसपत्रम्]

सरलो मदनश्चण्डो नमेरुः पीतद्रुचकः ।
सरलः कण्ठकर्णाक्षिगदघ्नोष्णो लघुः कटुः ॥३४॥ [सरल]

श्रीवासो वेष्टको दासो श्रीनिवासः कलिद्रुमः ।
श्रीवासः कफमूर्च्छांच्छिरोगवातहरः सरः ॥ ३५ ॥ [श्रीवास]
बालकं वारि ह्रीवेरम्पिङ्गमाचमनं कचम् ।
उदीच्यं वज्रमन्याह्वयवरिष्टङ्गन्धमूलकम् ॥ ३६ ॥
बालकं शीतलं रूक्षं लघु दीपनपाचनम् ।
रक्तपित्तज्वरश्लेषदाहतृष्णाव्रणापहम् ॥ ३७ ॥ [बालकं]
मांसीजटाभूतकेसीक्रव्यादानलदं शिखा ।
कृष्णान्या पूतना केशी गन्धमांसी पिशाचिका ॥ ३८ ॥
मांसी हिमा त्रिदोषास्रदाहवीसर्पकुष्ठजित् । [ छडा ]
उशीरमभयं सेव्यं वारं वीरणि मूलिका ॥ ३९ ॥
उशीरपाचनं शीतं स्तम्भनं कफपित्तजित् ।
तृष्णास्रविषवीसर्पदाहकृच्छ्रव्रणापहम् ॥ ४० ॥ [उशीर]
रेणुका कपिला कौन्ती पाण्डुपत्री हरेणुका ।
रेणुका पित्तला मेध्या वह्निकृद्गर्भपातिनी ॥ ४१॥ [रेणुका]
प्रियङ्गुः फलिनी श्यामा कान्ताह्वा नन्दनीलता ।
प्रियङ्गुः शीतला वान्तिदाहपित्तज्वरास्रजित् ॥ ४२ ॥
मुखकान्तिप्रजननं गात्रदौर्गन्ध्यनाशनम् ॥ ४३ ॥ [प्रियङ्गु]
पारिपेलप्लवं वन्यं शुकाह्वं परिपेलकम् ।
परिपेलं हिमं कण्डूकुष्ठास्रकफपित्तजित् ॥ ४४ ॥ [परिपेलु]
शैलेयं स्थविरं वृद्धं शिलापुष्पं शिलोद्भवम् ।
शैलेयं शीतलं हृद्यं कफपित्तहरं लघु ॥ ४५ ॥ [शैलेयं]
लामज्जकं जलाधारं दीर्घमूलं जलाशयम् ।
इष्टकापथकं शीघ्रमस्मृणालं सुनालकम् ॥ ४६ ॥
लामज्जकं हिमं कृच्छ्रदाहदोषत्रयास्रजित् । [ वजा ]

कुन्दरुर्मेचकः कन्दः खपुरो भीषणो बली ॥

कुन्दरुः स्वेदपवनश्लेष्मत्वग्ज्वरापहः ॥ ४७ ॥ [कुन्दरु]

गुग्गुलुः कालनिर्यासो महिषाक्षः पलङ्कषः ।

जटायुः कौशिको धूर्त्तो देवधूपः शिवः पुरः ॥ ४८ ॥

गुग्गुलुर्विशदस्तिक्तो वीर्य्योष्णो मधुरः सरः ।

भग्नसन्धानकृद् वृष्यः सूक्ष्मः स्वर्य्यो रसायनः ॥ ४९ ॥

दीपनः पिच्छलो बल्यः कफवातव्रणापचो ।

मेदोमेहाश्ववातासृक्क्लेदकुष्ठाममारुतान् ॥ ५० ॥

पिटिकाग्रन्थिशोफार्शोग्रन्थिगण्डक्रिमीन् जयेत् ।

स नवो वृंहणो वृष्यः पुराणस्त्वतिलेखनः ॥ ५१ ॥ [गुग्गुलु]

रालसर्ज्जरसो यक्षधूपसर्जोऽग्निवल्लभः ।

खषकः सालनिर्य्यासो लाक्षा स्याल्ललनो रवः ॥ ५२ ॥

राला हिमा गुरुस्तिक्ता कषाया ग्राहिणी जयेत् ।

ग्रहास्रस्वेदवीसर्पविषव्रणविपादिका ॥ ५३ ॥ [ राल ]

स्थौणेयकं वर्हिचूड़ं शुकवर्णं शुकच्छदम् ।

स्थौणेयं शीतलं वृष्यं सेध्यन्दोषत्रयास्रजित् ॥५४॥ [थुणेरा]

चौरकः कितवश्चन्द्री दुष्पुत्रः शङ्कितो रिपुः ।

चौरः स्वादुर्लघुः शीतः कुष्ठवातकफास्रजित् ॥ ५५ ॥ [चौरक]

मुरा गन्धवती दैत्या गन्धाढ्या सुरभिः कुटिः ।

मुरा शीता लघुः कुष्ठग्रहपित्तानिलास्रजित् ॥ ५६ ॥ [ मुरा ]

कर्च्चूरो द्राविड़ो गन्धमूलको दुर्लभः शटी ।

कर्च्चूरो दीपनो रुच्यः कुष्ठार्शोव्रणकासजित् ॥ ५७ ॥

उष्णो लघुर्जयेच्छ्वासगुल्मवातकफक्रिमीन् । [कर्च्चूर]

शटी पलाशी षड्ग्रन्था सुव्रता गन्धमूलिनी ।

शटी सीता ज्वरामास्रकासजिद्‌ग्राहणी लघुः ॥ ५८ ॥ [सटी]

स्पृक्कास्पृग्ब्राह्मणीदेवी निर्म्माल्या कुटिका बधूः ।

स्पृक्का स्वादुर्हिमा वृष्या कुष्टा लक्ष्मीस्त्रिदोषनुत् ॥ ५९ ॥ [स्पृक्का]

ग्रन्थिपर्णी नीलपुष्पः शुकपुष्पं शुकच्छदम् ।

ग्रन्थिपर्णी लघुस्तिक्तो रुच्योष्णः कफवातजित् ॥६०॥ [गण्ठिवना]

नलिका नर्त्तकी शून्या निर्म्मला धमनी नटी ।

नली पित्तास्रजिच्छीता चक्षुष्या कुष्ठकृच्छ्रजित् ॥६१॥ [नली]

पद्मकं मयलस्त्वारुपीतरक्तश्च सुप्रभः ।

पद्मकं दाहविस्फोट कुष्ठश्लेष्मास्र पित्तहृत् ॥ ६२ ॥

गर्भसंस्थापनं शीतं तृष्णा वीसर्प दाहजित् ॥ ६३ ॥ [पद्मक]

प्रपुण्डरीकः पौण्ड्राह्वः शतपुष्प सुपुष्पकम् ।

पुण्ड्राह्वं शुक्रलं शीतं चक्षुष्यं श्लेष्मपित्तजित् ॥६४ [पुण्डरीकम्]

तगरं वर्हिणं जिह्मं वक्राह्वं नहुषं नतम् ।

अपरं पिण्डतगरं चौनं कटु महोरगम् ॥ ६५ ॥

तगरं मधुरं स्निग्धं तिक्तोष्ण लघुभूतजित् ।

विषापस्मार मूर्द्धाक्षिरोगदोषत्रयापहम् ॥६६॥ [तगर]

गोरोचनारुचिर्गौरी रोचना पिङ्गला मता ।

मङ्गल्या गोतमी मेध्या बन्ध्या गोपित्त सम्भवा ॥ ६७ ॥

रोचना शीतला वश्या गर्भस्राव ग्रहास्रजित् । [गोरोचना]

नखाह्वो नखरः शुक्तिहनुर्नागहनुः खरः ॥ ६८ ॥

शुक्तिशङ्खो व्याघ्रनखमन्यद्व्याघ्रतलं पदम् ।

नखद्वयं ग्रहश्लेष्म वातास्र ज्वरकुष्ठजित् ॥ ६९ ॥

लघूष्णं शुक्रलस्वल्यं हृद्यं स्वादु विषापहम् । [नखद्वयम्]

पतङ्गं पटरागं स्याद्रक्तकाष्ठं कुचन्दनम् ॥ ७० ॥

सुरङ्गकं जगत्याह्वं पत्तूरं घटरञ्जकम् ।
पतङ्गं मधुरं शीतं पित्तश्लेष्म व्रणास्रजित् ॥ ७१ ॥ [पतङ्ग]
लाक्षा निर्भत्सरी रक्ता द्रुम व्याधिपलं कषा ।
क्रिमिजा जतुदोषाह्वा जावकोलक्कोमतः ॥ ७२ ॥
लाक्षा वर्ण्या हिमा बल्या स्निग्धा श्लेष्मास्र पित्तजित् ।
व्रणोरःक्षतवीसर्प क्रिमिकुष्ठग्रहापहा ॥ ७३ ॥
अलक्तको गुणैस्तद्वद्विशेषद्व्यङ्गनाशनः । [लाक्षा अलती]
पर्पटी रजनी कृष्णा जतुका जननी जनी ॥ ७४ ॥
पर्पटी वर्ण्दा शीता कफपित्तास्र कुष्ठजित् । [पापड़ी]
पद्मिनी विशिनी ज्ञेया नलिनी सूर्य्यवल्लभा ॥ ७५ ॥
कुमुद्वती कैरविणी कुमुदिन्युडुपप्रिया ।
पद्मिनी शीतला गुर्वी पित्तश्लेष्मा विषास्रजित् ॥ ७६ ॥
रूक्षा विष्टम्भनी स्वादुस्तद्वत् कुमुदिनी मता ।[पद्मिनी कैरविणी]
पद्मचारिण्यति चरा पद्माह्वा चारटी मता ॥ ७७ ॥
पद्मा हिमा लघुश्लेष्म कृच्छ्रजित् स्तनदाहकृत् । [पद्मचारिणी]
कमलं श्वेतमम्भोजं सारसं सरसीरुहम् ॥ ३८॥
सहस्रपत्रं श्रीगेहं शतपत्रं कुशेशयम् ।
पङ्केरुहन्तामरसं राजीवं पुष्कराह्वयम् ॥ ७९ ॥
अब्जमम्भोरुहं पद्मं पुण्डरीकं च पङ्कजम् ।
नलं सरोजं नलिनमरविन्दमहोत्पलम् ॥८०॥ [श्वेतकमल]
रक्तोत्पलं कोकनदं हल्लकं रक्तसन्धिकम् ॥ [रक्तोत्पल]
नीलोत्पलं कुवलयं भद्रमिन्दीवरं मतम् ॥ ८१ ॥
एतदेव सितं किञ्चित् कुमुदं कैरवं कुमुत् । [नीलोत्पल]
कमलं शीतलं वर्ण्यं मधुरं कफपित्तजित् ॥ ८२ ॥

तृष्णादाहास्र विस्फोट विषवीसर्पनाशनम् ।
तस्मादल्पगुणं किञ्चिदन्यद्रक्तोत्पलादिकम् ॥८३॥ [कमल]
कह्लारं ह्रस्वपाथोजं सौम्यं सौगन्धिकं महत् ।
कह्लारं ग्राहि विष्टम्भि रुजं गुरु सुशीतलम् ।८४॥[कह्लार]
किञ्जल्कः केशरं गौरमापीतं काञ्चनाह्वयम् ।
किञ्जल्कः शीतलो ग्राही रक्तार्शः कफपित्तजित् ॥८५॥ [केसरा]
पद्मबीजं तु कालेयं पद्माक्षं पद्मकर्कटी ।
पद्मबीजं हिमं स्वादु गर्भसंस्थापनं गुरु ॥ ८६ ॥
कफवातहरं बल्यं ग्राहि पित्तास्रदाहजित् । [पद्मबीजम्]
मृणालं विषमम्भोजं नालञ्च नलि नीरुहम् ॥ ८७ ॥
पद्मादिमूलं शालूकं शालीनं करहाटकम् ।
मृणालं शीतलं वृष्यं पित्तदाहास्रजिद् गुरु ॥ ८८ ॥
संग्राहि मधुरं रूक्षं शालूकमपि तद्गुणम् । [बिषशालूकम्]
जाती प्रियम्बदा राज्ञी मालती सुमना मता ॥ ८९ ॥
पीता जात्यपरा पीत पुष्पा काञ्चन पुष्पिका ।
जाती लघूष्णा मूर्द्धाक्षि दन्तार्त्ति व्रणरक्तजित् ॥ ९० ॥
( इति जातीस्वर्ण जातीचम्बेली । )

मल्लिका मोदिनी मुक्त बन्धनामदयन्तिका ।
मल्लिकोष्णा लघुर्वृष्या वातपित्तास्यरोगजित् ॥ ९१ ॥ [मालती]
यूथिका हरिणी बाला पुष्पगन्धा शिखण्डिनी ।
स्वर्णयूथा परा पीता गणिका स्वर्णपुष्पिका ॥ ९२ ॥
यूथी हिमास्रमूर्द्धाक्षिरोगजित्कफवातकृत् । [यूथिका]
कुब्जका भद्रतरुणी बृहत्पुष्पा महासहा ॥ ९३ ॥
शतपत्री तरुण्युक्ता कर्णिका चारुकेशरा ।

रक्ता परारक्तपुष्पा लाचा पुष्पाऽतिमञ्जुला ॥ ९४ ॥

शतपत्री हिमा हृद्या ग्राहिणी शुक्रला लघुः ।

दोषत्रयास्रजिद्वर्ण्या कुब्जकोऽपि च तद्गुणः ९५ कुब्जसेवती गुल्लाव

केतकी सूचिका पुष्पो जम्बूकः क्रकचच्छदः ।

सुवर्णकेतकी चान्या लघुपुष्पा सुगन्धिनी ॥ ९६ ॥

केतकी कटुका स्वादु र्लघुस्तिक्ता कफापहा । [केतकी स्वर्णकेतकी

वासन्ती सारवी कुन्दा प्रहसन्ती वसन्तजा ।

वासन्ती शीतला लघ्वी तिक्ता दोषत्रयास्रनुत् ॥ ९७ ॥ [वासन्ती]

नैपाली ग्रैष्मिका लूता लापिनी वनमल्लिका ।

वार्षिकी त्रिपुटा त्वन्या श्रीमती षट्पद प्रिया ॥ ९८ ॥

नैपाली शीतला तिक्ता लघ्वी दोषत्रयापहम् ।

कर्णाक्षि मुखरोगघ्नी तद्गुणा वार्षिकी मता ॥९९॥

[ वननैपाली त्रिपुटावेल ]

माधवी मण्डपः कामी पुष्पेन्द्रोऽभीष्टगन्धकः ।

माधवी मधुरा शीता लघुर्दोषत्रयापहा ॥ १०० ॥ [माधवी]

चम्पकः कांचरो रम्यश्चाम्पेयः सुरभिस्त्वलः ।

चम्पकः शीतलः कृच्छ्रकफपित्तास्र वातजित् ॥१०१॥ [चम्पक]

पुन्नागः पाटलीपुष्प केशरः षट्पदालयः ।

पुन्नागो मधुरः शीतो रक्तपित्तकफापहा ॥१०२॥ [पुन्नाग]

वकुलः केशरो मध्वगन्धः सिंहो विशारदः ।

वकुलः शीतलः श्लेषपित्त दन्तमदापहः ॥१०३॥

तत्फलं वातलं ग्राहि कफपित्त हरं हिमम् । [मौलसिरी]

वृषोवुकः स्थूलपुष्पो वसुकश्चिव सोधकः ॥ १०४ ॥

वकः शीतो विषश्लेषपित्तकृच्छ्राश्मदाहहृत् ।

[इति वगहुल] कुन्दः शुक्लः सदापुष्पो भृङ्गबन्धु र्मनोरमः १०५
कुन्दः शीतो लघुः श्लेष्मशिरोरुग्विषपित्तजित्। [कुन्द]
मुचुकुन्दः चेत्रवृक्षश्चिवुकः प्रतिविष्णुषः ॥ १०६ ॥
मुचुकुन्दः शिरःपीड़ापित्तास्रसुखनाशनः। [मुचुकुन्द]
भूमण्डलोविचच्छिन्नो द्विपदाष्टपदौ तथा।
शीतो लघुर्विचच्छिन्नः कफपित्तविषापहः ॥१०७॥ [विलु]
तिलकः क्षुरकः श्रीमान् विचित्री मुखमण्डनः।
तिलकः कफनुत्कुष्ठहरोऽत्युष्णो रसायनः ॥१०८॥ [तिलक]
गणेरुकः कर्णिकारः कर्णश्च गणकारिका।
गणेरुःशोधनी शोफश्लेष्मा स्रव्रणकुष्ठनुत् ॥१०९॥ [गणियारी]
बन्धुजीवः शरत्पुष्पो बन्धूबन्धूक रक्तकः।
बन्धूकः कफकृद्ग्राही वातपित्तहरो लघुः॥११०॥[बन्धूकपुष्प]
जपापुष्पं जपारक्तं त्रिसन्ध्या त्वरुणा सिता।
जपासंग्राहिणी केश्या त्रिसन्ध्या कफपित्तजित् ॥१११[जपापुष्प]
सिन्दूरी रक्तवीजा स्याद्रक्तपुष्पा सुकोमला।
सिन्दूरी कफपित्तास्रतृष्णावान्तिहरा हिमा ॥११२॥[सिन्दूरी]
तुलसी सुरसा गौरी भूतघ्नी बहुमञ्जरी।
तुलसी कटुका तिक्ता हृद्योष्णा दाहपित्तकृत् ॥ ११३ ॥
दीपनी कुष्ठकृच्छ्रास्रपार्श्वरुक्कफवातजित्। [तुलसी]
मरुमरुवकस्तीक्ष्णा खरपुष्पः फणिज्जकः ॥ ११४ ॥
महदग्निप्रदो हृद्यस्तीक्ष्णोष्णः पित्तलो लघुः।
वृश्चिकादिविषश्लेष्मवातकुष्ठक्रमीञ्जयेत् ॥११५॥ [मरुवा]
मदनो मदना दान्तो दमो मुनिसुतो मुनिः।
गम्भोत्कटो मदनको विनीताकुलपुत्रकः ॥ ११६ ॥

मदनोऽग्निप्रकुष्ठास्रभेदकण्डूत्रिदोषजित् । [मदना]
वर्वरी वर्जकः कुण्ठो वैकुण्ठः स्यात् कुठेरकः ॥ ११७ ॥
कपित्थार्जक इत्यन्यो वटपत्रः कटिञ्जरा: ।
कृष्णार्जकः कालमासः करालः कृष्णमल्लिका ॥ ११८ ॥
वर्वरी त्रितयं रूक्षं शीतं कटु विदाहि च ।
पित्तलं कफवातास्र दद्रु क्रिमि विषापहम् ॥११९ [वर्वरी त्रीणि]
यो राज्ञां मुखतिलकः कटारमल्लस्तेन श्रीमदननृपेण निर्मितेऽत्र
ग्रन्थेऽभून्मदनविनोदनाम्नि पूर्णः
कर्पूरप्रभृतिसुगन्धिद्रव्यवर्गस्तृतीयः ३ ॥
यदाज्ञया विश्वकृतोऽपि देवा ब्रह्मादयो यान्ति मुहुर्भवन्ति ।
अचिन्त्यकृत्यं पुरुषं पुराणं गोपालमाद्यं तमुपाश्रयामि ॥१॥
सुवर्णं काञ्चनं हेमहाटकं तप्तकाञ्चनम् ।
चामीकरं शातकुम्भं तपनीयं च रुक्मकम् ॥ २ ॥
जाम्बूनदं हिरण्यं च स्वरलं जातरूपकम् ।
सुवर्णं शीतलं वृष्यं बल्यं गुरु रसायनम् ॥ ३ ॥
कान्तिकारं विषोन्मादत्रिदोषज्वरशोषजित् ।
काषायं तिक्तमधुरं सुवर्णं गुरु लेखनम् ॥४॥ [सुवर्णम्]
रूप्यकं रजतं रूप्यतारं श्वेतं वसूत्तमम् ।
रूप्यं शीतं सरं वातपित्तहारि रसायनम् ॥ ५ ॥
लेपनञ्च कषायाम्लं विपाके चापरं रसम् ।
वयसः स्थापनं स्निग्धं धातूनां हितमुच्यते ॥ ६ ॥ [रूपा]
ताम्रं म्लेच्छमुखं शुल्वं नैपालं रविनामकम् ।
उदुम्बरं सूर्य्यप्रियं रक्तजं रक्तधातुकम् ॥ ७ ॥
ताम्रं सरं लघु स्वादु शीतं पित्तकफापहम् ।

रोपण पाण्डुकुष्ठार्शःश्वयथुश्वासकासजित् ॥ ८ ॥ [तम्बा]
कांस्यं लोहं निजङ्घोषं पञ्चलोहं प्रकाशकम् ।
कांस्यं गुरूष्णं चक्षुष्यं कफपित्तहरं सरम् ॥९॥ [कांस्य]
पीतलोहं सिंहलकं कपिलं सौख्यमारकम् ।
वर्त्तलोहं त्रिलोहञ्च राजरीतिर्महेश्वरी ॥ १० ॥
पीतलोहं हिमं रूक्षं कटूष्णं कफपित्तनुत् । [पीतल]
रङ्गकस्तीरकं वङ्गं त्रपु स्यात्करटीघनम् ॥ ११ ॥
रङ्गं लघु सरं रूक्षमुष्णं मेहकफक्रिमीन् ।
निहन्ति पाण्डुसश्वासदृश्यमीषत्तु पित्तलम् ॥१२॥ [रङ्ग]
जसदं रङ्गसदृशं दितिहेतुश्च तन्मतम् ।
जसदं तुवरं तिक्तं शीतलं कफपित्तहृत् ।
चक्षुष्यं परमं मेहान् पाण्डुं श्वासञ्च नाशयेत् ॥ [जस्ता]
[सीसा] सीसं धातुमलं नागमुरगं परिपिष्टकम् ।
जवनेष्टं च भुजगविस्तृष्टं कृष्णकं विदुः ॥ १३ ॥
सीसं रङ्गगुणं ज्ञेयं विशेषान्मेहनाशनम् । [सीसम्]
लोहं शस्त्रमयः कुष्ठं व्यङ्गं पारावतं घनम् ॥ १४ ॥
कृष्णायस्तन्मलं किट्टं मण्डूरो लोहजं रजः ।
लोहं सरं गुरु स्वादु कषायं कफपित्तनुत् ॥ १५ ॥
शीतं नेत्रहितं रूक्षं बलदं वातलं सरम् ।
शोफकुष्ठप्रमेहार्शोगरपाण्डुक्रिमीञ्जयेत् ॥ १६ ॥
तत्किट्टं तद्गुणं ज्ञेयं विशेषात् पाण्डुनाशनम् । [लोहम्]
पारदश्चपलो हेमनिधिः सूतो रसोत्तमः ॥ १७ ॥
त्रिनेत्रो रोषणः स्वामी हरवीजं रसः प्रभुः ।
रसेन्द्रश्च इति ख्यात रसलोहं महारसः

पारदः क्रिमिकुष्ठघ्नश्चक्षुष्योष्णो रसायनम् । ॥१८॥ [पारा]

अभ्रकं स्वच्छमाकाशं पटलं वरपीतकम् ।

अभ्रं गुरु हिमं बल्यं कुष्ठमेहत्रिदोषनुत् । [अभ्रक]

गगनं क्रिमिकुष्ठमेहहा विशदं शुक्रकरञ्च दीपनम् ॥१९॥

कथितं मुनिभिश्च पूर्वजैः बलकृत् शुक्रकरञ्च सेवितम् ।

गन्धः सौगन्धको लेखी गन्धाश्मा गन्धपीतकः ॥ २० ॥

लेली तको बलिवसा वैगन्धो गन्धको बलिः ।

गन्धकः कटुकः पाके वीर्य्योष्णः पित्तलः सरः ॥ २१ ॥

हन्ति कुष्ठक्षयप्लीहकफवातरसायनम् । [गन्धक]

माक्षिकं धातुमाक्षीकं ताप्यं तापीजमुच्यते ॥ २२ ॥

माक्षिकं तुवरं वृष्यं स्वर्य्यं लघु रसायनम् ।

चक्षुष्यं कुष्ठशोफार्शोमेहवस्त्यर्त्तिपाण्डुताम् ॥ २३ ॥

अवायि कटुकं हन्ति कुष्ठोदरविषक्षयान् । [सुवर्णमाक्षिक]

मनःशिला शिला गोला नैपाली कुनटी कुला ॥ २४ ॥

दिव्यौषधीर्नागमाता मनोगुप्ता मनोऽम्बिका ।

मनःशिला कृच्छ्रहरा सरोष्णा लेखनी कटुः ॥ २४ ॥

तिक्ता स्निग्धा विषश्वासकासभूतकफास्रजित् । [मनःशिला]

हरितालमलं तालं गोदन्तं नटभूषणम् ॥ २५ ॥

हरितालं कटु स्निग्धं कषायोष्णं विषघ्नयेत् ।

कण्डू कुष्ठास्यरोगांश्च कफपित्तकचग्रहान् ॥२६॥ [हरिताल]

गैरिकं रक्तपाषाणं गिरिमृच्च गवेधुकम् ।

स्वर्णवर्णं परं स्वर्णमण्डलं स्वर्णगैरिकम् ॥ २७ ॥

गैरिकं दाहपित्तास्रकफहिक्काविषापहम् ।

चक्षुष्यमन्यत्तद्वच्च विशेषाद्दाहान्तिनाशनम् ॥ २८ ॥ [गेरु]

तुत्थं कर्पूरिका तुत्थममृतासङ्गमुच्यते ।
मयूरग्रीवकं चान्यच्छिखिकण्ठं च तुत्थकम् ॥ २९ ॥
तुत्थकं लेखनं भेदि कण्डूकुष्ठविषापहम् ।
कफक्रिमिहरं तद्वदन्यच्चक्षुष्यमुत्तमम् ॥ ३० ॥ [तौलाथोथा]
कासीसं धातुकासीसं खेचरं ताम्रलोमघ्नम् ।
अपरं पुष्पकासीसं तुवरं वस्त्ररागधृक् ॥ ३१ ॥
कासीसं द्वयमम्लोष्णतिक्तकेश्यं दृशि हितम् ।
हन्ति कण्डूविषश्वित्रमूत्रकृच्छ्रकफानिलान् ॥ ३२ ॥ [कौसीस]
हिङ्गुलं दरदं म्लेच्छं सैकतं चूर्णपारदम् ।
हिङ्गुलं पित्तकफनुच्चक्षुष्यं विषकुष्ठहृत् ॥ ३३ ॥ [हिङ्गुल]
सिन्दूरं नागजं रक्तं श्रीमच्छृङ्गारभूषणम् ।
वसन्तमण्डनं नागरक्तं रक्तरजस्तथा ॥ ३४ ॥
सिन्दूरमुष्णं वीसर्पकुष्ठकण्डूविषापहम् ।
भग्नसन्धानजननं व्रणशोधनरोपणम् ॥ ३५ ॥ [सिन्दूर]
सौवीरमञ्जनं कृष्णं कालनीलं सुवीरजम् ।
स्रोतोऽञ्जनं तु स्रोतोजं नदीजं यामुनं वरम् ॥ ३६ ॥
सौवीरं ग्राहि मधुरं चक्षुष्यं कफवातजित् ।
सिध्माच्चयास्रनुच्छीतं स्रोतोऽञ्जनमपीदृशम् ॥ ३७ ॥ [सौवीर]
रसाञ्जनं रसोद्भूतं तार्क्ष्यं शैलञ्च तार्क्ष्यजम् ।
रसाग्रं कृत्रिमं तार्क्ष्यं दार्व्यं दार्वीरसोद्भवम् ॥ ३८ ॥
रसाञ्जनं कटु श्लेष्ममुखनेत्रविकारजित् ।
उष्णं रसायनं तिक्तं छेदनं व्रणदोषजित् ॥ ३९ ॥ [रसाञ्जन]
पुष्पाञ्जनं पुष्पकेतुरीतिजं कुसुमाञ्जनम् ।
पुष्पाञ्जनं चारमुष्णं काचार्मपटलापहम् ॥ ४० ॥ [पुष्पाञ्जन]

शिलाजतूषज शैल निर्यासो गिरिशाह्वयम् ।
शिलाह्वं गिरिजं शैलं शैलेयं गिरिजत्वपि ॥ ४१ ॥
शिलाजतूष्णं कटुकं योगवाहि रसायनम् ।
छर्दिप्रमेहवातार्शःकुष्ठास्योदरपाण्डुतान् ॥ ४२ ॥
हन्ति श्वासक्षयोन्मादरक्तशोफकफक्रिमीन् । [शिलाजतु]
बोलं गन्धरसं वोरं निर्लोहं वर्वरञ्चलम् ॥ ४३ ॥
सुगन्धि नालिकापिण्डं रसगन्धश्च तद्विधा ।
बोलं रक्तहरं शीतं मेध्यं दीपनपाचनम् ॥ ४४ ॥
ज्वरापस्मारकुष्ठघ्नं गर्भाशयविशोधनम् । [ वोर ]
स्फटिकाख्या मृत्ता वाष्पीकाची सौराष्ट्रसम्भवा ॥४५॥
आढ़की तुवरा त्वन्या मृत्तिका सुरमृत्तिका ।
स्फटिकाख्या कषायोष्णा कफपित्तविषव्रणान् ॥ ४६ ॥
निहन्ति श्वित्रवीसर्पां स्तुवरी तद्गुणा मता । [फटिकड़ी]
समुद्रफेनो डिण्डीरः फेनो वारिकफो द्विजः ॥ ४७ ॥
समुद्रफेनश्चक्षुष्यो लेखकः शमनः सरः । [समुद्रफेन]
प्रबालं विद्रुमं सिन्धुं लताग्रं रक्तवर्णकम् । [प्रवाल]
पुष्टिकान्ति वलं वीर्य्यं वर्द्धनं वलशुक्रयोः ।
मौक्तिकं तौतिला मुक्ताफलं मुक्ता च शुक्तिजम् [मौक्तिक]
मौक्तिकं मधुरं शीतं रोगघ्नं विषनाशनम् ।
राजयक्ष्मा परिकोपिताङ्गं नामादिक भवति पुष्टिदम् ॥
माणिक्यं पद्मरागं स्यादस्तु रत्नं सुरत्नकम् ॥४८॥ [माणिक]
सूर्य्यकान्ता सूर्य्यमणिः सूर्य्यांशो दहनो पलः ।[सूर्य्यकान्तमणि]
चन्द्रकान्तश्चन्द्रमणिः स्फटिकः स्फटिकोपलः ५० [चन्द्रकान्तमणि]
गोमेदं सुन्दरं पीतं रत्नं त्वणचरं तथा । [गोमेद]

हीरकं भिदुरं वज्रं सूचीवक्त्रं वरार्धकम् ॥५१॥ [हीरा]
नीलरत्नं नीलमणिः वैदूर्य्यं बालवायजम्। [नीलवैदूर्य्य]
मारुत्मतं मारकतं हृषद्गर्भंहरिन्मणिः ॥५२॥ [मरकतमणि]
मुक्तास्फोटोऽब्धिमण्डूकी शुक्तिर्मौक्तिकमन्दिरम्। [मोतीसीप]
मुक्तिकान्ति कटुकान्ति दीपणीयम् विनाशिनी। [शुक्ति मुक्ता]
प्रबालमुक्तिमाणिक्यसूर्य्यशीतकरोपला: ॥ ५३ ॥
गोमेदवज्रवैदूर्य्य नीलगारुत्मतादयः।
चक्षुष्याः लेखनीः शीताः कषाया मधुराः सराः ॥ ५४ ॥
माङ्गल्या धारणा दाहदुष्टग्रहविषापहाः। [प्रबालादयः]
शङ्खकम्बुर्जलधरी वारिजो दीर्घनिःस्वनः।
शङ्खो हि कटुकः पाके कषायो मधुरो लघुः ॥५५॥
चक्षुष्यो लेखनः पंक्ति शूलपित्त विनाशनः॥
शङ्खो नेत्रहितः शीतो लघुपित्तकफास्रजित्। [शङ्ख]
शङ्खो लघुः शङ्खनकः शम्बूका वारिशुक्तयः॥ ५६ ॥
कपर्दाः क्षुल्लको ज्ञेयाश्चराचरवराटकाः।
लघुशङ्खादयः शीता नेत्ररुक्स्फोटनाशनाः ५७ [लघुशङ्ख कौड़ी]
खटी कपोलः खटिनी श्वेता नाड़ीतरङ्गकः।
तद्भेदो गोड़पाषाणः चीरपाक उदाहृतः ॥ ५८ ॥
खटी दाहास्रनुच्छीता गौड़श्चापि तद्गुणः। [खटीगोल]
पङ्कः कर्दमको ज्ञेयो बालुकाः सिकतास्तथा॥ ५९ ॥
पङ्कः दाहास्रपित्तार्त्ति शोथघ्नःशीतलः सरः।
बालुका लेखनी शीता व्रणोरःक्षतनाशिनी ॥६०॥ [कौंच बालु]
चुम्बुकः कान्तपाषाणोऽयस्कान्तो लोहकर्षकः।
चुम्बको लेखनः शीतो मेदोविषगरापहः ६१ [चुम्बकपाषाण]

काचः कृत्रिमरत्नं स्याद्विगुणः काचभाजनम् ।
काचो विदारणो व्रण्यश्चक्षुष्यो लेखनो लघुः ॥६२॥ [काच]

यो राज्ञां मुखतिलकः कटारमल्ल-
स्तेन श्रीमदननृपेण निर्मितेऽत्र ।
ग्रन्थेऽभून्मदनविनोदनाम्नि पूर्णः
श्चित्रोऽयं ललितपदैः सुवर्णवर्गश्चतुर्थः ४ ।

करेण संगृह्य कुचौ महिष्याः पयः पिबन्तं पुरुषं पुराणम् ।
विचित्रलीलं परिशुद्धशीलं तमालनीलं शिशुमाश्रयामि ॥१॥

वटो रक्तपदा चीरी बहुपादो वनस्पतिः ।
यक्षवासः पदारोहीन्यग्रोधः स्कन्धजो ध्रुवः ॥ २ ॥
वटः शीतो गुरुग्राही कफपित्तव्रणापहः । [वडनाम]
पिप्पलः श्यामलोऽश्वत्थः चीरद्रुचो गजाशनः ॥ ३ ॥
हरिवासश्चलदलो मङ्गल्यो बोधिपादपः ।
पिप्पलो दुर्जयं शीतः पित्तश्लेष्मव्रणास्रजित् ॥४॥ [पीपल]
परिशोन्यः फलोशः स्यात्कपिनूतः कपीतनः ।
पारिशाश्वत्थको वृष्यः स्निग्धः श्लेष्मकृमिप्रदः ५ [पारिषपीपल]
उदुम्बरः चीरवृचो जन्तुवृचः सदाफलः ।
हेमदुग्धकृमिफलो यज्ञाङ्गः शीतवल्कलः ॥ ६ ॥
उदुम्बरो हिमो वृष्यो कफपित्तास्रजिद्गुरुः । [उदम्बर]
काकोदुम्बरिका: फलुर्मलायूश्चित्रभेषजम् ॥ ७ ॥
काकोदुम्बरिका तद्वद्विशेषाच्छिन्ननाशिनी । [काकोदुम्बरी]
प्लक्षः प्लवश्चारुवृक्षः सुपार्श्वो गर्भभाण्डकः ॥ ८ ॥
वटीकमण्डलुः यूपः पिप्परिश्चारुदर्शनः ।
प्लक्षः शीतो वृणश्लेष्म पित्तशोथविसर्पजित् ॥ ९ ॥ [पिलाखनाम]

न्यग्रोधोदुम्बरोऽश्वत्थपरिप्लचास पादपः ।
पञ्चैते चोरिणः प्रोक्तास्तेषां त्वक् पञ्च वल्कला ॥१०॥
त्वक्पञ्चकं हिमं ग्राहि व्रणशोथविसर्पजित् ।
केचित्तु पारिशस्थाने शिरीषं वेतसम्परे ॥ ११ ॥
क्षीरद्रुमा हिमवृष्या योनिदोषव्रणापहाः ।
शोफपित्तकफास्रघ्नास्तन्या भग्नास्थियोगदाः ॥ १२ ॥
तेषां पत्रं हिमं ग्राहि कफवातास्रनुल्लघुः ।
फलं विष्टम्भि संग्राहि रक्तपित्तकफापहम् ॥१३॥ [पञ्चचोरवृक्षः]
नन्दीवृक्षोऽश्वत्थभेदः प्ररोही गजपादपः ।
नन्दीवृक्षोऽश्वत्थगुणो लघूष्णो गरनुत् पुनः ॥१४॥ [नन्दीवृक्ष]
कदम्बो गन्धवत्पुष्पः प्रावृषेण्यो मनोन्नतिः ।
अन्यो धूलिकदम्बः स्यान्नीपो राजकदम्बकः ॥ १५ ॥
कदम्बः शीतलः श्लेष्मपित्तरक्तगदापहः । [कदम्ब]
ककुभोऽर्जुननामा स्यान्नदी मञ्जुः शठद्रुमः ॥ १६ ॥
ककुभः शीतलो भग्नक्षतक्षयविषास्रजित् । [ककुभार्जुननाम]
शिरीषः प्लवगो विप्रः शुकवृक्षः कपीतनः ॥ १७ ॥
मृदुपुष्पः श्यामवर्णो भण्डीरः शङ्खिनीफलः ।
शिरीषः शीतलोवर्ण्यो विषवीसर्प शोथजित् ॥ १८ ॥ [शिरीष]
आर्जटः स्यादार्त्तगलो बहुकण्टः प्रघर्षणः ।
अर्गाटस्तुवरः शीतो व्रणशोधनरोपणः ॥ १९ ॥ [आर्त्तगल]
वेतसो वञ्जुलो नम्रो वानीरो दीर्घपत्रकः ।
नादेयो मध्यपुष्पोऽन्यस्तोयकामो निकुञ्जकः ॥ २० ॥ [वेतस]
जलौकासम्भृतोऽम्भोजे निचुलो जलवेतसः । [जलवेतस]
इज्जलो हिज्जलो गुच्छःफला स्यात् कच्छपोलिका ॥२१॥ [जलइ]

वेतसः शीतलो दाहशोफार्शोयोनिरुगव्रणान् ।
हन्ति वीसर्पकृच्छ्रास्रपित्ताश्मरीकफानिलान् ॥ २२ ॥
जलजो वेतसः शीतः संग्राही वातकोपनः ।
इज्जलस्तद्गुणाः प्रोक्ता विशेषाद्विषनाशनः ॥२३॥ [वेतसादयः]
श्लेष्मान्तकः कर्वुदारः पिच्छलो भूतपादपः ।
शेलुशैलुश्च शैलूकः शैलिको द्विजकुत्सिकः ॥ २४॥
श्लेष्मान्तको विषस्फोटव्रणवीसर्पकुष्ठजित् ।
केशोष्णस्तत्फलं वृष्यं वातपित्तचयास्रजित् ॥ २५ ॥[लसोडा]
पीलुः शतसहस्रांशी तीक्ष्णन्तु करभप्रियः ।
सहस्राङ्गी गुडफलस्तत्फलं पीलु पीलुजम् ॥ २६ ॥
पीलूष्णं दीपनं भेदी रक्तपित्तकरं लघुः ।
गुल्मार्शःप्लीहवाताश्मकफहारि रसायनम् ॥ २७ ॥ [पिलु]
शाकः खरच्छदो भूमीसहो दीर्घच्छदो मतः ।
शाकः श्लेष्मानिलास्रघ्नो गर्भसन्धानदो हिमः ॥२८॥ [ शाक ]
शालः सर्जरसः सर्जः शौकमारि च पत्रकः ।
शालो ग्राही व्रणश्लेष्म दग्धकृविषनुद्धिमः ॥ २९ ॥ [शाल
तमाल उक्तस्तापिच्छः कालस्कन्धो मितद्रुमः ।
तमालस्तद्गुणः शोथदाहविस्फोटहृत् पुनः ॥ ३० ॥ [तमाल]
खदिरो रक्तसारः स्यात् गायत्री बालपत्रकः ।
खदरः श्वेतसारोऽन्यः कार्मुकः कुब्जकण्टकः ॥ ३१ ॥
खदिरः शीतलो दन्त्यः क्रमिमेहज्वरव्रणान् ।
चित्रशोथामपित्तास्रपाण्डुकुष्ठकफान् जयेत् ॥ ३२ ॥
निर्य्यासस्तस्य मधुरो बल्यः शुक्रविवर्द्धनः ।
सारस्तु विशदो वल्यो मुखरोगकफास्रजित् ॥ ३३ ॥ [खदिर]

इरिमेदो विट्खदिरो गोधास्कन्धोऽरिमेदकः ।
इरिमेदः कषायोष्ण मुखदन्तगदास्रनुत् ॥ ३४ ॥
हन्ति कण्डूविषश्लेष्मक्रिमिकुष्ठव्रणान् जयेत् । [इरिमेद]
बबूलः किङ्कराल: स्यात् पीतकः पीतपुष्पकः ॥३५॥
बबूलः कफनुद्‌ ग्राही कुष्ठक्रिमिविषापहः । [बबूर]
रक्तपित्त कषायेण पिबन्ति दिनसप्तकः ।
बीजकोशनकः सौरी प्रियः काम्योऽलकप्रियः ॥
बीजकः कुष्ठवीसर्पश्वित्रमेहज्वरक्रिमीन् ॥ ३६ ॥
हन्ति श्लेष्मास्रपित्तानि त्वच्यः केश्यो रसायनम् ॥ ३७ ॥ [बीजा]
तिनसः स्यन्दनो नेमी सर्वसारोऽश्मगन्धकः ।
तिनसः श्लेष्मपित्तास्रमेदःकुष्ठप्रमेहनुत् ॥ ३८ ॥ [तिनस]
भूर्ज्जो भुजो बहुपुटो मृदुत्वक्‌ श्लेष्मपत्रकः ।
भूर्ज्जो भूतग्रहश्लेष्मकर्णरुग्रक्तपित्तजित् ॥ ३९ ॥ [भूर्जपत्र]
पलाशः किंशुकः किर्मी याज्ञिको ब्रह्मपादपाः ।
क्षीरश्रेष्ठो रक्तपुष्पः त्ववृतः समिदुत्तमः ॥ ४० ॥
पलाशो दीपनो वृष्यः सरोष्णव्रणगुल्मजित् ।
भग्नसन्धानकृद्दोषग्रहण्यर्शःक्रिमीन् हरेत् ॥ ४१ ॥
तत् पुष्पं कफपित्तास्रकृच्छ्रजिद्‌ ग्राहि शीतलम् ।
फलं लघूष्णं मेहार्शःक्रिमिदुष्टकफापहम् ॥ ४२ ॥ [पलाश]
धवो नन्दितरुर्गौरः शकटाच्चो धुरन्धरः ।
धवः शीतप्रमेहास्रपाण्डुपित्तकफापहः ॥ ४३ ॥ [धव]
धन्वनो गोत्रविटपी धर्मणो गोत्रपुष्पकः ।
धन्वनः कफपित्तास्रकासजित्तुवरो लघुः ॥४४॥ [धामन]
सर्ज्जोऽजकर्णः स्विद्गो लतावृक्षः कुदेहकः ।

सर्ज्जो व्रण्यः कफस्वेदमलपित्तक्रमीन् जयेत् ॥४५॥ [सर्ज्ज]
आखोटः स्यात्पीतफलश्छागोचीरविनाशनः ।
आखोटो वातरक्तासृक्कफवातातिसारजित् ॥४६॥ [अहेडा]
वरुणो वरुणः श्वेतः शाकवृक्षः कुमारकः ।
वरुणः पित्तलो भेदी श्लेषकृच्छ्रास्रमारुतान् ॥ ४७ ॥
निहन्ति गुल्मवातास्रकृमिम् शोथाऽग्निदीपनम् । [वरुण]
जिङ्गिणी जिङ्गिणी जिङ्गी मुनिर्यासा च मोटकी ॥४८॥
जिङ्गिणी व्रणहृद्रोगवातातीसारजित्कटुः ।
छष्णा तस्यास्तु निर्यासो न स्याद्‌ बाहुव्यथापहः ॥४९॥ [जिङ्गिणी]
सल्लकी वल्लकी मोची गजभक्षामहारुहा ।
गन्धवीरा कुन्दुरुकी सुस्रावा वनकर्णिका ॥ ५० ॥
सल्लकी व्रणपित्तास्रश्लेष्मपित्तातिसारजित् । [सलई]
इङ्गुदी भल्लकी वृक्षः कण्टकस्तापसद्रुमः ।
इङ्गुदः कुष्ठभूतादिग्रहव्रणविषक्रमीन् ॥ ५१ ॥
हन्त्युष्णः श्वित्रशूलघ्नः तत्फलं कफवातजित् ॥५१॥ [इङ्गुद]
कटभ्भरश्चारुश्रृङ्गी कटभी त्वणश्चेएडकः ।
कटभ्भरः प्रमेहास्रनाड़ीव्रणविषक्रमीन् ॥ ५३ ॥
हन्त्युष्णः कफकुष्ठघ्नः तत्फलं कफशुक्रनुत् ।
निर्यासोऽस्य गुरुर्वृष्यो बलकृद्वातनाशनः ॥ ५४ ॥ [कटभ्भर]
मुष्ककी मोचकी क्षुण्टो शिखरी क्षुद्रपाटला ।
मोचकः कफवातघ्नो ग्राही गुल्मविषक्रमीन् ॥ ५५ ॥
हन्त्युष्णो वस्तिरुक्कण्डू तत्पुष्पं कफपित्तजित् ।
निर्यासोऽस्य परं वृष्यः शोषपित्तानिलापहः । [मोखा]
पारिभद्रो निम्बवृक्षो रक्तपुष्पं प्रभद्रकः ।

कण्टकी पारिजातःस्यान्मन्दारः कटि किंशुकः ॥ ५७ ॥
पारिभद्रः क्रमिश्लेष्ममेदः कफानिलापहः । [पारिभद्रः]
शाल्मली तूलिनी मोचा कुक्कुटी रक्त पुष्पिका ॥
कण्टकाढ्या स्थूलफला पिच्छला चिरजीवनी ॥ ५८ ॥
शाल्मली शीतला वृष्या वृंहणी रक्तपित्तजित् ।
निर्य्यासोऽस्य परं वृष्यं शोफपित्तानिलासृजित् ॥
रसायनवरा स्निग्धा तत्पुष्पं ग्राहि पित्तजित्॥५९॥[शाल्मली]
तुणिः कुठेर आपीतस्तनुकोनन्दिपादपः ।
तुणिः ग्राही हिमो वृष्यो व्रणकुष्ठास्रपित्तहा ॥६०॥ [तुणिः]
सप्तपर्णोगुच्छ पुष्पः छत्रीशाल्मलि पत्रकः ।
सप्तपर्णो व्रणश्लेष्म वातकुष्ठ हरः सरः ॥ ६१ ॥ [सप्तपर्ण]
हारिद्रकः पीतवर्णः श्रीमान् गैरद्रुमो वरः ।
हारिद्रकः कफहरो व्रणशोधनरोपणः ॥ ६२ ॥ [हलद]
करञ्जो नक्तमालःस्यात् नक्ताह्वो घृतवर्णकः ।
पूतीकोऽन्यः पूतिवर्णः प्रकीर्णश्चिरविल्वकः ॥ ६३ ॥
करञ्जः कटुकस्तीक्ष्णो वीर्योष्णो योनिदोषजित् ।
कुष्ठोदावर्त्त गुल्मार्शो व्रणक्रमिकफापहः ॥ ६४ ॥
तत्फलं कफवातघ्नं मेहार्शः क्रमिकुष्ठजित् ।
तत्पत्रं कफवातार्शः क्रमिशोथहरं परम् ॥ ६५ ॥
करञ्जी काकतिक्ताच वयस्य ङ्गारवल्लरी ।
करञ्जिकोष्णवातार्शः क्रमिकुष्ठप्रमेहनुत् ॥ ६६ ॥ [करञ्जी]
तिरिगिच्छिर्गजकण्टः करञ्जोचोरिणी द्विपः ।
तिरिगिच्छिर्वलासार्शःक्रमिकुष्ठप्रमेहहृत् ॥ ६७ ॥[तिरिगिच्छिः]

शमी तुङ्गा शङ्कुफला पवित्रा केशहृत् फला ।
लक्ष्मीशिवान्याधिमती भूशमी शङ्कराह्वया ॥ ६८ ॥
शमी शीता लघुश्वासकुष्ठार्शः कफहृत्सरा ।
तत्फलं पित्तलं रूक्षं मेध्यं केशविनाशनम् ॥ ६९ ॥ [शमी]
शमीषिका टिण्ठिणिका दुर्वलाम्बु शिरीषिका ।
टिण्ठिणी कफकुष्ठार्शःसन्निपात विषापहा ॥७०॥ [टिण्ठिणी]
अरिष्टको गर्भपाती कुम्भवीर्यश्च फेनिलः ।
कृष्णवीजो रक्तवीजः पीतफेनोऽर्थसाधनः ॥ ७१ ॥
अरिष्टकस्त्रिदोषघ्नः उष्णो गर्भग्रहापहः । [रीठीनाम]
शिंशपा कपिला कृष्णासार मण्डलपत्रिका ॥ ७२ ॥
अन्या कुशिंशपा भस्मपिङ्गला स्याद्वसादनी ।
शिंशपोष्णा हरेन्मेहान् कुष्ठश्वित्रवमिकृमीन् ॥ ७३ ॥
वस्तिरुग्व्रणदाहास्र गर्भं मूढं निपातिनी । [शिंशपा]
अगस्त्यवङ्गसेनाह्वः मधुशिग्रु मुनिद्रुमः ॥ ७४ ॥
अगस्त्यः पित्तकफजित् निदाघशमनो हिमः ।
तत्पुष्पं नीलम स्रेष्म पित्तनक्तान्ध्यनाशनः ॥७५॥ [अगस्त्यः]
योराज्ञां मुखतिलकःकटारमल्लस्तेनश्रीमदन नृपेण निर्मितेऽत्र
ग्रन्थेऽभून्मदन विनोदनाम्निपूर्णश्चैवोऽयं ललितपदे वटादिवर्ग ।

पञ्चमः समाप्तः ॥ ५ ॥

भ्रमोच्चलद्वल्लरिकाग्रपिष्टं मन्दस्मितं वेणुनिनादरक्तम् ।
गोपालिकानाङ्करतालिकाभिर्नृत्यन्महस्तत्परमं स्मरामि ॥१॥
द्राक्षा मधुफला स्वाद्वी हारहूणफलोत्तमा ।
मृद्वीका मधुयोनिश्च रसाला गोस्तनी गुडा ॥ २ ॥

द्राक्षा पक्का सरा शीता चक्षुष्या बृंहणी गुरुः ।
हन्ति तृष्णाज्वरश्वास वान्त वातास्रकामलाः ॥ ३ ॥
कृच्छ्रास्रपित्तसम्मोहदाह शोषमदात्ययान् ।
आमासाल्पगुणा गुर्वी सैवाम्ला रक्तपित्तकृत् ॥ ४ ॥
निर्वीय्या ऽन्या लघुद्राक्षा गोस्तनी सदृशा गुणैः ।
द्राक्षापर्व्वतजा लघ्वी साम्ल श्लेष्माल्पपित्तनुत् ॥ ५ ॥ [द्राक्षा]
आम्रश्चूतो रसालोऽसौ सहकारोऽति सौरभः ।
माकन्दः पिकबन्धुः स्याद्रसालः कामवल्लभः ॥ ६ ॥
आम्रो ग्राही प्रमेहास्र कफपित्तव्रणान् जयेत् ।
तत्फलम्बाल मत्यम्लं रूचन्दोषत्रयास्रजित् ॥ ७ ॥
पक्वन्तु मधुरं वृष्यं स्निग्धं हृद्यं वलप्रदम् ।
गुरु वातहरं रुच्यं वर्ण्यं शीतमपित्तलम् ।
रसस्तस्य सरः स्निग्धो रोचनो बल वर्णकृत् ॥ ८ ॥
सहकारश्च वातघ्नं पित्तश्लेष्म विनाशनम् ।
कषायं मधुरं वृष्यं गुरु स्निग्धं विशेषतः ।
पक्वाम्रं जनयेदायुर्मांस शुक्रवलप्रदम् ॥ ९ ॥
शुष्काम्रन्तु कषायाम्लं भेदनं कफवातजित् ॥

[इति पक्वापक्व शुष्काम्रआम्रनामगुणाः ]

महाजम्बू राजजम्बू महास्कन्धा बृहत्फला ॥ १० ॥
क्षुद्रजम्बू वीरपत्रा मेघाभा कामवल्लभा ।
ना देयी स्यात् क्षुद्रफला तत्फलञ्जम्बु जाम्बवम् ॥ ११ ॥
जम्बू सङ्ग्राहिणी रूक्षा कफपित्तव्रणास्रजित् ।
राजजम्बूफलं स्वादु विष्टम्भि गुरु रोचनम् ।
क्षुद्रजम्बूफलन्तद्वत् विशेषाद्दाहनाशनम् ॥ १२ ॥ [जम्बू]

नारिकेलोदृढ़फलो महात्वचो महाफल: ॥ १२ ॥

त्वगराजस्तृणफलोत्वग्राह्यो दृढ़वीजक: ।

नारिकेलफलं शीतन्दुर्जरं वस्तिशोधनम् ॥ १३ ॥

विष्टम्भि वृंहणं हृष्यं वातपित्तास्रदाहजित् ।

तस्याम्भ: शीतलं हृद्यन्दीपनं शुक्रलं लघु ॥ १४ ॥

तत्पादपशिरोमज्जा शुक्रलो वातपित्त जित् । [नारिकेर]

श्रेणी खर्जूरिका हृद्य: श्रीफला द्वीपसम्भवा ।

पिण्डखर्जूरिका खर्जूदु:प्रधर्षा सुकण्टका ॥ १५ ॥

अन्या स्कन्धफला स्वाद्वी दुरारोह मृदुच्छदा ।

भूमिखर्जूरिका काककर्कटी कासुकर्कटी ॥ १६ ॥

खर्जूरिकाफलं शीतं स्वादु स्निग्धं चतास्रजित् ।

बल्यं हन्ति मरुत्पित्तं मदमूर्च्छांमदात्ययान् ॥ १७ ॥

तस्मादल्पगुणं ज्ञेयमन्यत् खर्जूरिकाफलम् ।

तन्मज्जामईज: शीतोवृष्य: पित्तास्रदाहजित् १८ [खर्जुरिका]

शिलेमानी परालोके मृदुला तिवरीफला ।

शिलेमानी श्रमभ्रान्तिदाहमूर्च्छांस्रपित्तनुत्॥ १९ । [सिलेमानी]

कदली ग्रन्थिनी मोचा रम्भा वीरायतच्छदा ।

कदली वारणी पुंसा रम्भामोचा महत्फला ।

कदली योनिदोषाश्म रक्तपित्तहरा हिमा ॥ २० ॥

तत्कन्द: शीतलो बल्य: केश्य पित्तकफास्रजित् ।

तत्फलं मधुरं शीतं विष्टम्भि कफकृद्गुरु ॥ २१ ॥

स्निग्धं पित्तास्रतृट्दाहचत चयसमीरजित् ॥२२॥ [कदली]

दाड़िमी रक्त कुसुमा दन्तवीजा शुकप्रिया ।

दाड़िमन्दीपनं हृद्यं रोचनं नातिपित्तलम् ॥ २३ ॥
कषायानुरसङ्गाहि द्विविधा दम्लवीत वत् ।
तयोः स्वादु त्रिदोषघ्नमम्लवातवलास्रजित् ॥ २४ ॥
शुष्काम्लं दाड़िमी सारः फुट्टितं कफवातहृत् ।[ दाड़िम ]
[ अथ निमपयः प्रसादिरिकं मपयः । ]
प्रसादिरिकं सेक्रन्तर्कतकलञ्च तत् ॥ २५ ॥
कतकस्य फलन्नेत्र्यं जलनिर्मलताकरम् ।
वातघ्नं श्वहरं शीतं मधुरन्तुवरङ्गुरु ॥ २६ ॥
( इति निर्मसी नामगुणाश्च । )
वदरी कर्कटी मोघा कोरण्टी युग्मकण्टका ।
अन्या स्निग्धाच्छवक्रोशा फला सौवीरिका परा ॥ २७ ॥
हस्तिकोलि परात्वन्या लघ्वी कर्कन्धु कोधुका ।
वदरी शीतला तिक्ता रूचा पित्तकफापहा ।
वदरन्तुपरं लोके फेनिल कुवलं कुहम् ॥ २८ ॥
कर्कन्धु ह्रस्ववदरं वरटं च धुकन्धु कम् ।
पक्कमांसञ्च मधुरंमतं सौवीरकम्महृत् । [वेरिनाम]
वदरं लघु संग्राहि रुच्यमुष्णं समीरजित् ॥ २९ ॥
कफपित्तकरन्तद्वत् कोलं गुरुसरं स्मृतम् ।
सौवीरं वदरं शीतं भेदनं गुरु शुक्रलम् ।
वृंहणं पित्तदाहास्रचत तृष्णानिलापहम् ॥ ३० ॥
शुष्कं भेद्यग्निकृत्सर्वं लघु तृष्णाक्लमास्रजित् ।
कर्कन्धु मधुरं स्निग्धं गुरु पित्तानिलापहम् ।
मरुत्पित्तहरं मज्जा वृष्योवीर्य्यबलप्रदः ॥ ३१ ॥[वेरीभेदः]
चीरी चत्रियराजाह्वा राजादनफलाश्मिनः ।

राजन्यस्तृणनोऽन्यात्त्वचिवुको मुचिलिन्दकः ॥ ३२ ॥
चीरवृक्षफलं शीतं स्निग्धं गुरु बलप्रदम् ।
तृष्णामूर्च्छामदभ्रान्तिचय दोषत्रयास्रजित् ॥ ३३ ॥ [चीरणी]
चारो धनुः पटः शालः प्रियालो मुनिवल्लभः ।
चारः पित्तकफास्रघ्नस्तत्फलं मधुरं गुरु ॥ ३४ ॥
स्निग्धं सरस्मरुत् पित्तदाह तृष्णाचतापहम् ।
तन्मज्जा मधुरो वृष्यः शुक्रलम्पित्तवातजित् ॥ ३५॥ [चार]
परूषको मृदुफलः परूषो रोचणः परः ।
परूषकङ्कषायाम्लमाम पित्तकरं लघु ॥ ३६ ॥
पक्वन्तु मधुरम्पाके शीतं विष्टम्भि वृंहणम् ।
हृद्यं तृट् पित्तदाहास्रचतक्षयसमीरनुत् ॥ ३७ ॥ [परूष]
तिन्दुकः स्यन्दन स्फूर्जरः कालसारश्च रावणः ।
काकपीलुः कुपीलुः स्याद परो विषतिन्दुकः ॥ ३८ ॥
तिन्दुको व्रणवातघ्नस्तत्सारः पित्तरोगजित् ।
आममस्य फलं ग्राहि वातलं शीतलं लघु ॥ ३९ ॥
पक्वं पित्तप्रमेहास्रश्लेष्मघ्नं विशदङ्गुरु ।
विषतिन्दुकमप्येवं विशेषाद्ग्राहि शीतलम् ॥४०॥ [तिन्दुक]
किङ्किणीलोव्याघ्रपादोदेवदारुः चरः क्वचित् ।
किङ्किणी तुवरस्तिक्तः पित्तश्लेष्महरो हिमः ॥ ४१ ॥
तत्फलंवातलं त्वामम्पक्वं स्वादु त्रिदोषजित् । [कसेरु ।]
आरुकं वीरसेनं तज्जातिभेदाच्चतुर्विधम् ॥ ४२ ॥
आरुकं जारकं वातमेहार्शः कफनाशनम् । [आरुक ॥]
मधूकोमधुकस्तोच्चः सारश्च गुड़पुष्पकः ॥
गोलाफलो मधुकोष्ठी मधुकोष्टोमधुद्रुमः ॥ ४४ ॥

मधुकाम्यो ह्रस्वफलो मधुरो दीर्घपुष्पकः ।
मधुकः कफवातघ्नः कषायो व्रणरोपणः॥ ४५ ॥
तत्पुष्पं मधुरम्बल्यं शीतलं गुरु बृंहणम् ।
फलं शीतं गुरु स्वादु शुक्रलं वातपित्तजित् ॥ ४६ ॥
अहृद्यं हन्ति तृष्णास्त्र दाहश्वासक्षतक्षयान् । महुआ ।
पनसः कण्टकिफलः श्वासहा गर्भकण्टकः ॥ ३७ ॥
पनसं शीतलम्पक्वं स्निग्धम्पित्तानिलापहम् ॥
बल्यं शुक्रप्रदं हन्ति रक्तपित्तक्षतक्षयान् ॥४८ ॥
आमं तदेव विष्टम्भि वातलन्तुवरं लघु । [कटहरनाम ।]
लकुचः क्षुद्रपनसो लकुचोग्रन्थिमत्फलः॥ ४९ ॥
लकुचं गुरु विष्टम्भि स्वाद्वम्लं रक्तपित्तकृत् ।
श्लेष्मकारि समीरघ्नमुष्णं शुक्राग्निनाशनम्॥५०॥बड़हरनाम ।]
ताली ध्वजी दुरारोह स्तृणराजो महाद्रुमः ।
तालः शीतो मरुत्पित्त व्रणजिन्मद शुक्रकृत् ॥ ५१ ॥
तत्फलं शीतलम्बल्यं स्निग्धं स्वादुरसङ्गुरु ।
विष्टम्भि वातपित्तास्त्रक्षतदाहक्षतापहम् ॥ ५२ ॥
वीजं मूत्रकरं वृष्यं वातपित्तहरं हिमम् । [ ताल ।]
खर्बूजं फलराजं स्यादमृताह्वं दशाङ्गुलम् ॥ ५३ ॥
खर्बूजं मूत्रलम्बल्यं कोष्ठशुद्धिकरं गुरु ।
स्निग्धंस्वादुकरं शीतं वृष्यम्पित्तानिलापहम् ॥ ५४ ॥
तेषु यच्चाम्लमधुरं सक्षारञ्च रसाद्भवेत् ।
रक्तपित्तकरन्तत्तु मूत्रकृच्छ्रकरम्परम् ॥ [खरबूजा ]
हिमं स्यन्दनकं स्निग्धं मूत्रलं स्वादु शीतलम् ।
त्वग्दाहमन्तर्दाहंश्च ह्रुक्कम्पात्पित्तसम्भवान् ॥

हरेत्तत् सञ्चित मलम्ज्वरघ्नन्तु विषापहम् ।
मुष्टिप्रमाणं वदरं सेवं सीवफलं तथा ।
फलं च सितिकापूर्वं वातपित्तहरं गुरु ॥ ५५ ॥
बृंहणं कफकृद्दृष्यं स्वादु पाक रसं हिमम् ।[सेवनाम]
अन्यद्रुम: फलस्त्वान्यो महत्सिञ्चितिकाफलम् ।
अमृतं गुरु वातघ्नं स्वाद्वम्लं रुचि शुक्रकृत् ॥५६॥
अपरं सेवगुणकृत् विशेषा त्तु वरं हिमम् [अपोति लोके: ।]
अमृताह्वं रुचिफलं लघुविल्वफलाकृति ।
अमृतं गुरु वातघ्नं स्वाद्वम्लरुचिशुक्रकृत् ५७[अमृत इति लोके]
वादामं सुफलं वातवैरिनेत्रोपमं मतम् ।
वादाममुष्णं सुस्निग्धं वातघ्नं बलशुक्रकृत् ॥५८॥ वादाम]
निकोचकं चारुफलं मकोठं गलकोजकम् ।
पित्तं मुकुलकं ज्ञेयं दल्लीफलसमाकृति ॥ ५९॥
निकोचकं गुरु स्निग्धं वृष्योष्णं स्वादु बृंहणम् ।
रक्तप्रसादनं बल्यं वातघ्नं कफपित्तकृत् ॥ ६० ॥
तद्वन्मुकूलकं ज्ञेयं विशेषाद्गुरु दुर्जरम् ॥६१॥ [पित्तनाम]
एलानामाम वातघ्नं अम्लोष्णं गुरु रेचनम् ।
पक्कं स्वादु हिमं बल्यं वातपित्तविनाशनम् ॥६२॥ [एलाच]
आलूकमल्लूभल्लूकं भल्लूरक्तफलं तथा ।
अल्लूकं रसत: शीतं स्वाद्वम्लं वातपित्तकृत् ॥ ६३।[अलुनाम]
अञ्जीरं मञ्जलं ज्ञेयं काकोदुम्वरिकाफलम् ।
अञ्जीरं शीतलं स्वादु गुरु पित्तास्रवातजित्॥६४॥
तस्मादन्यगुणं ज्ञेयं मञ्जीरं लघु वा गुणै:।[अञ्जीरनामगुणा:]
आक्षोट को वैष्टत फलं कन्दलाभ: पृथच्छद: ॥ ६५॥

आक्षोटं मधुरं बल्यं गुरूष्णं वातहृत्सरम्। [आक्षोटनाम]
पालेवतं सितं पुष्पैस्तिन्दुकं च फलं स्मृतम्॥ ६६॥
अन्यन्मानवकं ज्ञेयं मत्पालेवतं तथा।
तद्वन्मानवकं हृद्यं तृषाघ्नं मिष्टमम्लकम्॥ ६७॥
पालेवतं हिमं स्वादु गुरूष्णं वह्नि वातजित्।[पालेवतनामगुणाः]
तूतं तूदं ब्रह्मकोषं ब्राह्मण्यं ब्रह्मदारु च॥ ६८॥
तूतं गुरुहिमं पक्वं स्वादु पित्तानिलापहम्। [तूत]
गङ्गेरुकं कर्कटकं कारकं मृगलिण्डकम्॥ ६९॥
तोदनं क्रन्दनञ्चान्यन्मृग विट्सदृशन्तथा।
गङ्गेरुरेचनं पक्वं गुरु वातासृजिन्मतम्॥ ७०॥
तोदनङ्ग्राहि मधुरं वातपित्तहरं लघु। [गङ्गेरुनामगुणाः]
तुम्वरा टिक्तिकं साम्लमुष्णमामन्तु पित्तलम्॥ ७१॥
कालायनफलैः पत्रैः केशराभैः समुद्रजैः।
वृक्षस्तुम्वरको ज्ञेयो भल्लातकसमो गुरुः॥ ७२॥
तुम्वरं कफजित् पाकि कटूष्णं व्रणमेहकृत्।[तुम्वरनामगुणाः]
वीजपूरो मातुलिङ्गः केशरी फलपूरकः॥ ७३॥
वीजपूरफलं रुच्यं रसाम्लं दीपनं लघु।
रक्तपित्तकरं कण्ठजिह्वा हृच्छोधनं परम्॥ ७४॥
तन्मांसं वृंहणं शीतं गुरुपित्तसमीरजित्।
केशरं लघु संग्राहि शूलगुल्मोदरापहम्॥ ७५॥
वीजमुष्णं कृमिश्लेष्मा वातजिद्गर्भदं गुरु।
तत्पुष्पं वातलं ग्राहि रक्तपित्तहरं लघु॥ ७६॥
शूलाजीर्णविबन्धेषु मन्दाग्नौ कफमारुते।
अरुची श्वास कासेषु रसस्तस्योपदृश्यते॥ ७७॥ [विजौरा]

मधुकर्कटिका स्वादु लुङ्गी चक्रालिका घटा ।
मधुकर्कटिका शीता रक्ता पित्तहरा गुरुः ॥ ७८ ॥
तन्मूलन्तु विसूचीघ्नं कर्णशोथ विनाशनम् । [मधुकर्कटी गुणाः]
नारङ्गी नागरङ्गः स्याद्गोरची योगसागरः ॥ ७९ ॥
नारङ्गमम्लमत्युष्णं पित्तवातहरं सरम् ।
स्वाद्वम्लमपरं हृद्यं दुर्ज्जरं वातनाशनम् । [नारङ्गी]
जम्बीरको दन्त सटो जम्भीरो जङ्गलोमतः ॥ ८० ॥
जम्बीरमम्ल शूलघ्नं गुरूष्णं कफवातजित् ।
आस्यवैरस्य हृत्पीड़ा वह्निमान्द्य क्रमीन् जयेत् ॥ ८१ ॥

[ जम्भीरीनामगुणाः ]

आम्लोऽम्लवेतसश्चूक्री वेतसः शरभेदकः ।
अम्लवेतसमत्युष्णं भेदनं लघु दीपनम् ॥ ८२ ॥
हृद्रोग शूल गुल्मघ्नं पित्तकृट् कफदूषणम् ।

[ अम्लवेतनामगुणाः ]

साराम्लकः सारफलो रसालः सारपादपः ॥ ८३ ॥
साराम्लमम्लवातघ्नं गुरु पित्त कफप्रदम् । [साराम्लनामगुणाः]
निम्बूकं निम्बुकं राजनिम्बूकमपरं स्मृतम् ॥ ८४ ॥
निम्बूकमम्लं वातघ्नं पाचनन्दीपनं लघु ॥ ८३ ॥
राजनिम्बूफलं स्वादु गुरु पित्तसमीर जित् । [निम्बूनामगुणाः]
कर्मरङ्गं नागफलं भव्यं पिच्छिलवीजकम् ।
कर्मरङ्गं हिमङ्ग्राहि स्वाद्वम्लं कफपित्तजित् ॥८४॥ [कर्मरङ्ग]
अम्लिका चुक्रिका चिञ्चा तिन्तिड़ी शुक्तिचन्द्रिका ।
अम्लिकाऽऽमा गुरुर्वातहरा पित्तकफास्रजित् ॥ ८५ ॥

पक्वा तद्वत्सरा रुच्या वह्निर्वास्तविशुद्धिजित् ।
शुष्का हृद्या श्रमभ्रान्ति तृष्णाक्लमहरा लघुः ॥ ८६ ॥ [आमली]
तिन्तिड़ीकन्तुद्दचाम्लमम्लशाकोऽम्लपादपः ।
तिन्तिडीकं समीरघ्नम् आममुष्णं परं गुरु ॥ ८७ ॥
तत्पक्वं लघु सङ्ग्राहि ग्रहणी कफवातजित् । [तिन्तिड़ी]
करमर्दी सुषेणास्यादन्या कृष्णफला मता ॥ ८८ ॥
करमर्द्दी गुरूष्णाऽम्लं रक्तपित्तकफप्रदम् ।
तत्पक्वं मधुरं रुच्यं लघु पित्तसमीरजित् ॥ ८९ ॥ [करौदा]
कपित्थको दधिफलः कपित्थः सुरभिच्छदः ।
कपित्थमामं सङ्ग्राहि लघु दोषत्रयापहम् ॥ ९२ ॥
पक्वं गुरु तृषाहिक्काशमनं वातपित्तजित् ।
स्वाद्वम्लं तुवरं कण्ठशोधनं सङ्ग्राहि दुर्जरम् ॥ ९३ ॥ [कपित्थ]
कपित्थपत्री फणिजा कुलजा जीव पत्रिका ।
कपित्थपत्री तीक्ष्णोष्णा कफमेहविषापहा ॥ ९४ ॥ [कपित्थपत्री
आम्रातकश्चाम्रवटः फली मोदः फलः कपिः ।
आम्रातमामवातघ्नं गुरूष्णं रुचिकृत्सरम् ॥ ९५ ॥
पक्वं स्वादु हिमं हृद्यं मरुत्पित्तक्षयास्रजित् । [अमड़ा]
राजाम्राह्वं कामनाना कामाह्वो राजपुत्रकः ॥ ९६ ॥
राजाम्रं मधुरं शीतं ग्राहि पित्तकफापहम् । [राजाम्र]
वृक्षाम्लं दाड़िमी चिञ्चा कपित्थैश्चतुराम्लकम् ॥ ९७ ॥
अम्लवेतसवृक्षाम्लं दाड़िमी वदरः क्वचित् ।
वीजपूरयुतैरेतैः पञ्चाम्लमुदितं बुधैः ॥ ९८ ॥ [पञ्चाम्ल नाम]
कोशाम्रको घनस्कन्धो जन्तुवृक्षश्च कोशकः ।
कोशाम्रः कुष्ठशोथास्र पित्तव्रणकफापहः ॥ ९९ ॥

तत्फलं ग्राहि वातघ्न मम्लोष्णं गुरु पित्तलम् ।
पक्कान्तद्दीपनं रुच्यं लघूष्णं कफवातजित् ॥१००॥
मज्जापित्त समीरघ्नः स्वादुर्बल्योऽग्निदीपनः ।[कोशाम्र]
क्रमूकं क्रमुकं पूगं पूगीफलमुदाहृतम् ॥१०१॥
पूगं गुरु हिमं रूक्षं कषायं कफपित्तजित् ।
मोहनं दीपनं रुच्यमास्य वैरस्यनाशनम् ॥१०२ ॥
आर्द्रन्तद्गुर्वभिष्यन्दि वह्निदृष्टिहरम्परम् ।
स्निग्धं त्रिदोषहृत्स्वं पक्कं शुष्कन्तु वातलम् ।
पूगं स्याद्दृढमध्ये ष्टं यच्छिन्नानाविधं हिमम् ॥१०३ ॥
पाकदेशविभेदेन चिक्कणं सर्वदोषनुत् ।
क्रमिकृत्पूग पुष्पन्तु कषायं मधुरं गुरु ॥ १०४ ॥
स्निग्धस्त्रिदोषहृद्बल्यं तद्गुणांस्तद्वदादिशेत् । [पूगीफल]
ताम्बूलवल्ली ताम्बूली नागिनी नागवल्लरी ॥१०५॥
ताम्बूलं विशदं रुच्यं तीक्ष्णोष्णन्तुवरं सरम् ।
तिक्तक्षारोषणङ्कामं रक्तपित्तकरं लघु ।
बल्यं श्लेष्मास्य दौर्गन्ध्यं मलवात श्रमापहम् ॥ १०६ ॥
ताम्बूलं स्वर्णवर्णं क्रमुकफलयुतं संभ्रमश्च श्रहितम् ।
कर्पूरेणाण्ड जाभ्यां क्वतखदिर वटीसौरभेणाति चूर्णं ।
चूर्णं क्षौवानुजातं शिशिरकिरण वत्प्रोज्वलं तेन साकम्
दत्वा विप्राय पूर्वन्तदनु नरपतिर्भक्षयेदाम दत्तम् ॥१०७॥

[ इति ताम्बूलनामगुणाः ]

चूर्णं कफानिलहरं खदिरं कफपित्तजित् ।
संयोगतो दोषहरं सौमनस्यं करोति च ॥ १०८ ।
मुखवैरस्य सौगन्ध्यकान्तिशोभाकरं परम् ॥

घनस्निग्धा मच्चत्‍प्रांशु प्रपुन्नाटसमच्छदा ।
सुगन्धमूला लवली पाण्डुकोमल वल्कली ॥ १०६ ॥
लवल्याः फल मुद्दिष्टं श्यामं ज्योत्स्ना फलं तथा ।
लवली फलमश्मार्शोवात पित्तहरं लघु ।
विशदं रोचनं रूक्षं हृद्यं पित्तकफापहम् ॥ ११० ॥
फलं तुल्यगुणं सर्वं मज्जानमपि निर्दिशेत् ।
फलं हिमाग्निदुर्वात व्यालकीटादि दूषितम् ॥ १११ ॥
अकालजातं नाश्नीयात्पाकातीसार भूमिजम् ।
आमं दोषकरं प्रायः फलं विल्वं विनाखिलम् ।
यस्य यस्य फलस्येह वीर्यं भवति यादृशम् ॥ ११२ ॥
तस्य तस्यैव वीर्येण मज्जानमपि निर्दिशेत् ।
व्याधितं कृमिजुष्टञ्च पाकातीतमकालजम् ।
वर्जनीयात् प्रयत्नेन मपर्यागतमेव च ॥ ११३ ॥

इति फलादि वर्गः षष्टः समाप्तः ।

[ पुष्पवर्गः ]

राधापदाब्जे निपतन् विनोदी मानापनुत्यै जगदेकवन्द्यः ।
केनाऽपि कामेन सगोपरूपीपायादपायात्पुरुषः पुराणः ॥ १ ॥
सर्वशाकेषु जीवन्ती श्रेष्ठा निन्द्यस्तु सर्षपः ।
शाकं चतुर्द्धा तत्पुष्पं च्छदकन्दफलैः स्मृतम् ॥ २ ॥
कूष्माण्डकी पुष्पफली पचनालि चतुर्विधः ।
कर्कारुरफलाकन्दी स्यादारूराजकर्कटी ॥ ३ ॥
कूष्माण्डं त्वचयां शीतङ्गुरु पित्तास्रवातजित् ।
बलं पित्तापहं शीतं मध्यमं कफ कारकम् ॥ ४ ॥
पक्वं नातिहिमं स्वादु सचारं दीपनं लघु ।

वस्तिशुद्धिकरं रेतोरोगदोषत्रयापहम् ॥ ५ ॥
कूष्माण्डं नातिमधुरं वाताश्मरिकफापहम् ।
तन्मज्जा पित्तनुद्वृष्यो मधुरो वस्तिशोधनः ॥६॥ [कूष्माण्ड]
कर्कटी शीतलं ग्राहि रक्तपित्तहरं गुरु ।
पक्वं पित्ताग्निजननं सक्षारं श्लेष्मवातजित् ॥ ७ ॥
कर्कटी लोमशी व्यालपत्रे वीरु बृहत्फला ।
कर्कटी शीतला रूक्षा ग्राहिणी मधुरा गुरुः ॥ ८ ॥
रुच्या पित्तहरा सामा पक्वोष्णा पित्तवह्निकृत् । [काकड़ी]
[कक्कोरु] किलिङ्गं कृष्णवीजं स्यात्कालिङ्गं फलवर्तुलम् ।
कालिङ्गं ग्राहि दृक्पित्त शुक्रहृच्छीतलं गुरु ॥ ९ ॥
पक्वन्तु सोष्णं सक्षारं पित्तलं कफवातजित् । [कालिङ्गम्]
तुम्बी मिष्टा महातुम्बी राजालावुरलावुनी ॥ १० ॥
मिष्टन्तुम्बीफलं हृद्यं कफपित्तहरं गुरु । [मीठीतुम्बी नाम]
कटुतुम्बी मिष्टफली राजपुत्री च दुग्धिनी ॥ ११ ॥
कटुतुम्बी हिमा हृद्या पित्तकासविषापहा । [कटुतुम्बी]
त्रपुसं कण्टकिलता सुधावासोऽपरं कटुः ॥ १२ ॥
छर्दिपर्णी मूत्रफला पित्तकं हस्तिपर्णिनी । १३ ॥
त्रपुसं मूत्रलं शीतं रूक्षं पिताश्मकृच्छ्रनुत् ।
तत्पक्वमुष्णमम्लं स्यात्पित्तलं कफवातजित् ॥१४॥ [खीरानाम]
चिर्भटन्त्वेनु दुग्धं स्यात् ज्ञेयं गोरक्षकर्कटी ।
चिर्भटं मधुरं रूक्षं गुरु पित्तकफापहम् ॥ १५ ॥
शीतं विष्टम्भि संग्राहि पक्वमुष्णन्तु पित्तनुत् । [चर्भिट]
वालुकं काण्डकं वालु तच्छीतं मधुरं गुरु ।
रक्तपित्तहरं भेदि लघूष्णं पक्वमग्निकृत् ॥१६॥ [वालुका]

शीर्णवृन्तं चित्रफलं विचित्रं पीतवर्णकम् ।
शीर्णवृन्तं लघु स्वादु भेद्युष्णं वह्निपित्तकृत् ॥१७॥ [सीधाकोउवड़ा]
कोशातकी शतच्छिद्रा जालिनी कृतवेधना ।
मृदङ्गफलका क्ष्वेरा घोटाकी कर्कशच्छदा ॥ १८ ॥
कोशातकी लघुस्तिक्ता रूक्षामाशयशोधनी ।
शोफपाण्डूदर श्लीह कुष्ठार्शः कफपित्तजित् ॥ १९ ॥
तत्फलं भेदनं शीतं लघु मेहत्रिदोष जित् ।[तरी नाम]
राजकोशातकी मिष्टा महाजालिः सपीतका ॥ २० ॥
राज कोशातकी शीता ज्वरघ्नी कफ वातला ।[मीठी तोरई]
महाकोशातकी लम्बा हस्तिघोषा महत्फला ॥ २१ ॥
महाकोशातकी स्निग्धा मिष्टा पित्तानिलापहा ।[वडीतोरइ]
वृन्ताकी वार्त्तिकी वृत्ता भण्टाकी भण्टिका मता ॥ २२ ॥
वृन्ताकं स्वादु तीक्ष्णोष्णं कटुपाकञ्च पित्तलम् ।
कफवातहरं हृद्यं दीपनं शुक्रलं लघु ॥ २३ ॥
ज्वरारोचक कासघ्नं पक्वं तत्पित्तलं गुरु [वैगन] ।
अपरः श्वेतवार्त्ताकुः कुक्कुटाण्ड फलोपमः ॥ २४ ॥
तस्माद्धीनगुणः किञ्चिदर्श साञ्च हितः स्मृतः । [श्वेतवैगन]
बिम्बी रक्तफला गोला तुण्डी दन्तच्छदोपमा ॥ २५ ॥
बिम्बी वान्तिप्रदा हन्ति रक्तपित्तास्र कामलाः ।
तत्फलं शीतलं स्वादु गुरु पित्तास्र दाहजित् ॥ २६ ॥
स्तम्भनं लेखनं वात विबन्धाध्मानकारकम् । [किन्दूरी]
कारवेल्लं कटिल्लं स्यादुग्रकाण्डं सुकाण्डकम् ॥
कारवल्ली वारिवल्ली हृद्वल्ला परा स्मृता ॥ २७ ॥
कारवेल्लं हिमं भेदि लघु तिक्तमवातलम् ।

पित्तास्र कामला पाण्डु कफ मेह कृमीन् जयेत्॥ २८ ॥ [करेला]

कर्कोटकी पीतपुष्पा महाजालिनिरुच्यते ।

तद्वत्कर्कोटकं पुष्पं किलासारुचि नाशनम्॥ २९ ॥ [ककोड़ा]

बन्ध्या कर्कोटकी देवी नागारि विषकण्टका ।

बन्ध्या कर्कोटकी तिक्ता विषवीसर्प कासजित्॥३०॥[बन्ध्या ककोड़ि]

डोड़िका विषमुष्टिः स्याद्विषग्रष्टिः समुष्टिका ।

डोड़िका कफ पित्तार्शः कृमिगुल्म विषापहा॥३१॥[डोड़ा]

डिण्डिसो रोमसफलो तिन्दिसो मुनिनिर्मितः ।

डिण्डिसो वातलो रूक्षो मूत्रलोऽश्मरिभेदकः ॥३२॥ [डिण्डिसः]

कोलशिम्बिः कृष्णफूला षड्वसीकरपादिका ।

कोलशिम्बी समीरघ्नी गुर्व्वाम कफपित्तकृत् ॥३३॥ [कोलशिम्बी]

शिम्बी कुशिम्बिः कुत्सा च शिम्बी पुत्तकशिम्बिका ।

शिम्बिः शीता गुरुर्बल्या श्लेष्मला वातपित्तजित् ॥३४॥[शिम्बी]

वास्तुकः शाकपत्रः स्यात् कम्बीरस्तु प्रसादकः ।

वास्तुकः पाचनो रुच्यो लघुः शुक्र बलप्रदः ॥ ३५ ॥

सरः प्लीहास्र पित्तार्शः कृमिदोष त्रयापहः । [वास्तुकः]

जीवन्तकः शाकवीरो रक्तनालः प्रनालकः ॥ ३६ ॥

जीवन्तोवातकृत् चारः स्वादुपाक स्त्रिदोषनुत् ।[जीवन्तनाम]

चिल्ली सरा लघुः शीता रूच्या मेध्याग्निदीपनी ॥ ३७ ॥

बल्या रूक्षा हरेत्प्लीह रक्तदोषत्रय कृमीन् । [चिल्ली]

कालशाकङ्कालिका स्यात् चुञ्चुका चुञ्चुकोऽपरः ॥

कालशाकं सरं रुच्यं वातलं कफ शोफजित्॥ ३८ ॥

पित्र्यं पवित्रमायुष्यं नातिपित्त प्रकोपणम् ।

चञ्चुः शीता सरा रूक्षा स्वाद्वी दोषत्रयापहा॥३९॥[कालशाक चञ्चू]

तण्डुलीयो मेघनादः काण्डीरस्तण्डुलीयकः ।
विषघ्नः कचरोऽन्यःस्यात् मारीषो मार्षिकस्तथा ॥ ४० ॥
तण्डुलीयो लघुः शीतो रूक्षः पित्तकफास्रजित् ।
सृष्ट मूत्रमलो रुच्यो दीपनो रक्तपित्तहा ॥४१॥ [चौराई]
फोगो मरुद्भवः शृङ्गी सूक्ष्मपुष्पः शशादनः ।
फोगः संग्राहकः शीतो रक्तपित्त कफापहः ॥४२ ॥ [फोग]
मारिषो रेचनः शीतो गुरुर्मंदस्त्रिदोषजित् ॥ ४३ ॥ [मारिष]
पटोलः पाण्डुको जातीकलकः कर्कशच्छदः ।
राजीफलः पाण्डुफलो राजीमानाम्नताफलम् ॥ ४४ ॥
तिक्तोत्तमा बीजगर्भाऽपरा राजपटोलिका ।
ज्योत्स्नी पटोलिका जाली नादेयी भूमिजम्बुका ॥ ४५ ॥
पटोलं पाचनं हृद्यं वृष्यं लघ्वग्निदीपनम् ।
स्निग्धोष्णं हन्ति वातास्त्रज्वर दोष त्रय क्रमीन् ॥ ४६ ॥
पत्रं पित्तहरं शीतं तस्य वल्ली कफापहा ।
मूलं विरेचनं प्रोक्तं फलं दोषत्रयापहम् ॥ ४७ ॥ [परवर]
चञ्चुड़ी वेश्मकूलोऽन्योऽश्वेतराजी वृह त्फला ।
किञ्चिन्न्यूनगुणास्तस्माद्विशेषाच्छोषणोहितः ॥४८॥ [चञ्चुड़ा]
पालक्या वास्तुकाकारा च्छुरिका चीरितच्छदा ।
पालक्या वातला शीता भेदनी श्लेष्मला गुरुः ॥ ४९ ॥
विष्टम्भिनी मदश्वास रक्तपित्त कफापहा । [पालक]
पोतक्या पोदिका प्रोक्ता मल्वाकाली सुरङ्गिका ।
पोतकी शीतला स्निग्धा श्लेष्मला वात पित्तजित् ॥५०॥
अकण्ठ्या पिच्छला निद्रा शुक्र दा रक्त पित्तनुत् ॥५१॥
पोतक्या पोदिका दिव्या शुक्रदा रक्तपित्तजित् ।[पोई]

लोणिकोऽका दृहच्छोटी कुटिरस्तु कुटिञ्जरः ।
दुन्दुरः स्यात् गुडोरीकः पिच्छी पिच्छीतकस्तथा ॥ ५२ ॥
लोणी रूक्षा गुरुः शीता सरा विष्टम्भिनी पटुः ।
दोषला मधुरा पाके तद्वत्कुट्टीरदृद्रुरु ॥ ५३ ॥
लोणिका वातला श्वासकासश्लेष्मविषापहा । [लोणी कुटीर]
सुषेणस्तु स्वस्तिकः स्याद्वलदस्तिलपर्णिका ॥ ५४ ॥
सुनिषन्नो हिमो ग्राही मेह दोषत्रयापहा ।
तिलपर्णी हिमा रूक्षा ग्राहिणी कफपित्तजित् ॥ ५५ ॥
[सुषेणई तिलोक]
सूक्ष्म पत्रस्तीक्ष्णशाको धनु पुष्पः सुबोधकः ।
चौरकः कफवातघ्नः सुतीक्ष्णो नातिपित्तलः ॥ ५६ ॥
टुटुकोविटपो रूक्षः खरपत्र स्व खडजः ।
टुटुको वातलो रूक्षो विष्टम्भी कफनाशनः ॥ [ भटिया ]
घनागमभवा वल्ली प्रसिद्धो नाम वस्तिजः ॥ ५७ ॥
घनागमे त्रिदोषघ्नस्तदुष्णं मधुरं सरम् ।
फलं तस्य सरं वृष्यमामघ्निष्टन्तु वातलम् । [ भटिया ]
शीतवारः कुरण्डी स्यान्नाडी तु नलिका मता ॥ ५८ ॥
शीतवारः सरो वृष्यः शोथघ्नो वात पित्तलः
नाडी सरा लघुः शीता पित्तनुत्कफवातला ।
सार्षपं सार्षपोद्भूतं कौसुम्भङ्कुमम्भकम् ॥ ५९ ॥
सार्षपं बहुविरमूत्र गुरूष्णं वा त्रिदोषकृत् ।
कौसुम्भं स्वादु रूक्षोष्णं कफजित् पित्तलं लघुः । [सर्षपनाभ]
चणकं शाकमुद्दिष्टं दुर्जरं कफवातनुत् ॥ ६० ॥
कलायशाकं भेदीस्याल्लघु पित्त कफापहः ।

चाङ्गेरीत्वाम्लिका चुक्र चुद्राम्लिका चतुच्छदा ।
चाङ्गेरी दीपनी रुच्या लघूष्णा कफवातजित् ॥ ६१ ॥
सपित्तजा ग्रहण्यर्शो कुष्ठातीसारनाशिनी । [ चाङ्गेरी ]
कासमर्द्दः कर्कशः स्याद्गृञ्जनागजरस्तथा ॥ ६२ ॥
कासमर्दो लघुः कण्ठ्यः कासदोष विषास्रजित् । [कासमर्द]
गृञ्जनं कटुकस्तीक्ष्णस्तिक्तोष्णो दीपनो लघु ॥ ६३ ॥
संग्राही रक्तपित्तार्शो ग्रहणी कफवातजित् । [ गृञ्जनं ]
मूलकं हस्तिदन्तञ्च बालमूलं कफान्तकम् ।
मूलकं वातलं रुच्यं स्वर्य्योष्णं पाचनं लघुः ॥ ६४ ॥
हन्ति त्रिदोषजं श्वास गदार्श्चि गलपीनसम् ।
स्निग्धसिद्धं तदेव स्यात् दोषत्रय विनाशनम् ।
शुष्कन्तद्धि विशोयघ्नो लघु दोषत्रयापहः ॥ ६५ ॥
तत्पुष्पं श्लेष्म पित्तघ्नं फलं वातकफापहम् । [ मूलक ]
करीरको गूढपत्रः क्रकचो ग्रन्थिलोमतः ॥ ६६ ॥
करीरः कटुको भेदी तीक्ष्णोष्णं कफवातजित् ।
व्रणशोथ विषार्शोघ्नः तत्पुष्पं कफपित्तजित् ॥ ६७ ॥
फलं ग्राहि कषायोष्णं मधुरं श्लेष्म पित्तहृत् । [ करीर ]
शिग्रुः सौभाञ्जनः कृष्णगन्धः स्याद्बहुलच्छदः ।
रक्तोऽन्यो मधुशिग्रुस्तु श्वेतोऽन्यो हरितच्छदः ॥ ६८ ॥
तद्बीजं श्वेतमरिचं तीक्ष्णोष्णं चक्षुषे हितम् ।
शिग्रुस्तीक्ष्णो लघु ग्राही वह्निदः कफ वातजित् ।
तीक्ष्णोष्णो विद्रधि श्लीह व्रणघ्नो रक्त पित्त हृत् ॥ ६९ ॥
मधु शिग्रुर्गुणैस्तद्वद्विशेषात् दीपनः सरः ।
तत्पुष्पं लघु संग्राहि वातलं कफशोथजित् ।

फलं ग्राहि कषायोष्णं मधुरं श्लेष्मपित्तहृत्॥७०॥[शोभाञ्जन:]

लशुन: स्यादुग्रगन्धो यवनेष्टो रसोनक:।
गृञ्जनोऽन्यो महाकन्दो जर्ज्जरो दीर्घपत्रक:॥ ७१ ॥
लशुनो बृंहणो वृष्य: स्निग्धोष्ण: पाचन: सर:।
भग्नसन्धानकृत्कण्ठ्यो गुरु: पित्तास्रवृद्धिद:॥ ७२ ॥
रसायनं कफश्वासकास गुल्म ज्वरारुची:।
हन्ति शोथप्रमेहार्श: कुष्ठशूलानिलक्रमीन्॥ ७३ ॥
तत्पत्रं मधुरं चारं नालो मधुरपित्तल:। [लसुन]

पलाण्डुर्यवनाख्यश्च दुर्गन्धो मुखदूषक:।
पलाण्डुस्तद्गुणैस्तुल्य: कफकृन्नातिपित्तल:॥ ७४ ॥
अनुष्णं केवलं वातं स्वादु पाकरसान् जयेत्। [पियाजु]

गृञ्जन: पित्तलो ग्राही तीक्ष्णोऽर्शोरोगनाशन:।
गन्धाकृतिरसैस्तुल्य: सूक्ष्मनाल: पलाण्डुवत्॥७५॥[गृञ्जन]

शूरण: कन्दल: कन्दो गुदामयहरोऽपर:।
वज्रकन्द: सुरेन्द्र: स्यादन्योऽन्यश्चित्रकन्दक:॥ ७६ ।
शूरणोदीपनो रूक्ष: कषाय: कटु कण्डुकृत्।
विष्टम्भी विषदो रुच्य: कफार्श:कृन्तनो लघु:।
नालं शूरणकं रुच्यं कफवातहरं लघु॥ ७७ ॥
अर्शसान्तु विशेषेण हितं कामाग्निदीपनम्।
शूरणो दीपनो रूक्ष: कफार्श:कृन्तनो लघु:।
तद्वदन्यो वज्रकन्द: कफघ्न: पित्तरक्तकृत्॥७८॥[शूरणद्वयम्]

अस्थिशृङ्खलिका वज्री गन्थिमानस्थिसंहृति:।
अस्थिशृङ्खलिका वृष्या श्लेष्मला मधुरा हिमा॥ ७९ ॥
अस्थिसन्धानकृद्बल्या पित्तरक्तानिलापहा। [अस्थिशृङ्खल]

वाराही मागधी गृष्टिस्तत्कन्दः सौकरः किटिः ॥ ८० ॥
सौकरः पित्तलो वर्ण्यः स्वादुस्तिक्तो रसायनः ।
आयुः शुक्राग्नि कृन्मेह कफ कुष्ठानिलापहः ॥ ८१ ॥ [वाराही]
मुसली तालपत्री स्यात् खलिनी तालमूलिका ।
मुसली वृंहणी बल्या वीर्योष्णार्शोऽनिलापहा ॥ ८२ ॥ [मुसली]
कञ्चुका पीलुनी पीलुः फेलुका दलशालिनी ।
कैञ्चुकं वातलं ग्राहि दीपनं कफ पित्तनुत् ॥ ८३ ॥ [कञ्चूक]
भूच्छत्रं पृथिवीकन्दः शिलीन्ध्रं बलकं मतम् ।
भूच्छत्रं शीतलं बल्यं गुरु भेदि त्रिदोषजित् ॥ [टिङ्गरीनाम]
स्थूलकन्दो ग्रामकन्दो मानकन्दो महच्छदः । ८४ ॥
स्थूलकन्दो गुरुः श्लेष्म वातलः पित्तशोथजित् ।
मानकः शीतलो स्वादुः पित्त रक्तहरो गुरुः ॥ ८५ ॥

[ इति स्थूलकन्दमानकन्दनाम ]

Centre for the Arts

कसेरुकं स्वल्पकन्दं वृहद्राजकसेरुजम् ।
शृङ्गाटी जलकन्दः स्यात् त्रिकोणस्त्रिकटुः स्मृतः ॥ ८६ ॥
कसेरुकं हिमं स्वादु गुरु पित्तास्रदाहजित् ।
ग्राहि रित्तानिल श्लेष्मदं शृङ्गाटकन्तथा ॥ ८७ ॥

[ इति कसेरु सिंघाडागाडी नाम । ]

पिण्डालुकं वृष्यगन्धः मध्वालुः स्यात्तु रोमसम् ।
शङ्खालुश्चित्रसङ्काशं काष्टालुः स्वल्पकाष्ठकम् ॥ ८८ ॥
हस्तालुकं महत्काष्ठं रक्तकन्द महत्फलम् ।
आलुकं शीतलं सद्यः विष्टम्भि मधुरं सरम् ॥ ८९ ॥
सूक्ष्मं मूत्रमयं रूक्षं दुर्ज्जरं रक्तपित्तनुत् ।
कफानिलकरं बल्यं वृष्यं स्तन्यविवर्द्धनम् ॥ ९० ॥

पिण्डालिकाऽभिष्यन्दि तीक्ष्णोष्णं दोषलं गुरु ।
मध्वालुकं पित्तकरं कटु पाके कफापहम् ॥ ९१ ॥
[इति पिण्डालु मध्वालु शङ्खालु हस्तालु रक्तालु नाम गुणाः ।]
केयूरं स्वल्पविटपं कन्दलः स्वादुकन्दलः ॥ ९२ ॥
केयूरं शीतलं ग्राहि पित्तलं कफ वातजित् ॥ [केत्तहनाम]
अतिजीर्णमकालोत्थं रूक्षं स्निग्धमभूमिजम् ॥ ९३ ॥
जठरः कोमलं वात शीत पित्तानिलापहम् ॥
शुष्कं शाकञ्च सकलं नाश्नीयान्मूलकैर्विना ॥ ९४ ॥
यो राज्ञां मुखतिलकः कटारमल्लस्तेन श्रीमदनृपेण निर्म्मितेऽत्र।
ग्रन्थेऽभून्मदनविनोद नाम्नि पूर्णः कूष्माण्ड प्रभृतिरयञ्च शाकवर्गः।

इति श्रीमदनपाल विरचिते मदनविनोदे निघण्टौ
शाकाख्यः वर्गः ।

Indira Gandhi National

करेण संगृह्य कुचौ कपोले मात्राङ्गुलीभि र्दुताद्यमानम्।
मुक्तत्वराजानुबलेन पानं नमामि कृष्णं नवनीतचौरम् ॥१॥
पानीयं जीवनं नीरं कीलालममृतं जलम्।
आपोऽम्भस्तोयमुदकं पाथोऽम्भः सलिलं पयः ॥ २ ॥
पानीयं शीतलं हृद्यं हन्ति पित्त विषभ्रमम् ।
दाहाजीर्ण श्रम छर्द्दि मद मूर्च्छा मदात्ययान् ॥ ३ ॥
शीतलं स्तिमिते कोष्ठे गलरोगे नवज्वरे ॥ ४ ॥
ग्रहणी पीनसाध्मान हिक्का गुल्मेषु विद्रधौ।
कास मेहारुचि श्वास पाण्डु वातामयेषु च ॥ ५ ॥
पार्श्वशूले स्नेह पीते सद्यः शुद्धौ न शस्यते ।
दिव्यं तुषारजन्धारं करि हैममिति स्मृतम् ॥ ६ ॥
चतुर्व्विधं वरन्धारं लघुत्वात्तत्पुनर्द्विधा ।

गाङ्गं समुद्रजञ्चेति गाङ्गं श्रेष्ठतमं स्मृतम् ॥ ७ ॥
आश्विने मासि सामुद्रं गुणै र्गाङ्गवदाचरेत् ।
स्थापिते हेमजे पात्रे राजते मृण्मयेऽपि वा ॥ ८ ॥
तज्जलं शीतलं ज्ञेयं दोषत्रयविषापहम् ।
तद्गाङ्गं सर्वदोषघ्नं पेयं सामुद्रमन्यथा ॥ ९ ॥
सक्षारं लवणं मिश्रं शुक्रदृष्टि बलापहम् ।
रसायनं तृषा मूर्च्छा तन्द्रा दाह क्लमापहम् ॥ १० ॥
सौम्यं रसायनं दिव्यं महानिद्रात्रिदोषजित् ।
आश्वासजननं ह्लादि श्रमघ्न मतिबुद्धिकृत् ॥ ११ ॥
तदेव भूमिपतितं भौममित्यभिधीयते ।
दिव्याभावे तु तत्तोयं प्रविचार्य्या गुणागुणाः ॥ १२ ॥
कौपं श्लेष्महरं क्षारं पित्तलं दीपनं लघु ।
ताडागं वातलं स्वादु तुवरं कटुपाकि च ॥ १३ ॥
वाप्यं पित्तकरं क्षारं कटुवात कफापहम् ।
नैर्झरं लेखनं हृद्यं कफघ्नं दीपनं लघु ॥ १४ ॥
ह्रादञ्च लघु पित्तघ्न मविदाहातिदीपनम् ।
चौड्यमग्निप्रदं रूक्षं स्वादु श्लेष्मकरन्न च ॥ १५ ॥
नादेयं दीपनं रूक्षं वातलं लघु लेखनम् ।
सारसं मधुरं बल्यं तृष्णाघ्नन्तुवरं लघु ॥ १६ ॥
कैदारं स्वाद्वभिष्यन्दि विपाके गुरु दोषलम् ।
पाल्वलं तद्वदुद्दिष्टं विशेषात्सर्वदोषकृत् ॥ १७ ॥
तौषारं वातलं शीतं रूक्षं पित्तकफापहम् ।
धारं भूमावपतितं दिव्यं तत्सर्वदोषनुत् ॥ १८ ॥
नैर्झरं गुरु वै प्रोक्तं विशदं कफ वातनुत् ।

हैमं गुरुतरं शीतं पित्तनुदूवातवर्द्धनम् ॥ १९ ॥
चन्द्रकान्तजलं रूक्षं लघु पित्तविषास्रनुत् ।
दिवाकर करैर्जुष्टं निशि शीतकरांशुभिः ॥ २० ॥
ज्ञेयं हंसोदकन्नाम स्निग्धन्दोषत्रयापहम् ।
अनभिष्यन्दि निर्दोष मन्तरिक्षजलोपमम् ॥ २१ ॥
बल्यं रसायनं मेध्यं शीतं लघु सुधोपमम् ।
वर्षासु दिव्यं पानीयमौद्भिदं वा प्रशस्यते ॥ २२ ॥
शरत्प्रसन्न मुदकमगस्त्योदयनिर्विषम् ।
हेमन्ते सारसन्तोयन्ताड़ागं वा गुणावहम् ॥ २३ ॥
वसन्त ग्रीष्मयोः कौप्यं वाप्यं नैर्झरमेव च ।
प्रावृषि प्रवरञ्चौद्यमनविष्टम्भिकारि च ॥ २४ ॥
नद्यः शीघ्रवहा लघ्वः सर्वा याश्चामलोदकाः ।
मन्दगाः कलुषा गुर्व्यो याश्च शैवालसेविताः ॥ २५ ॥
हिमवत्प्रभवाः पथ्या नद्योऽश्माहतपायसः ।
गङ्गा शतद्रुसरयूयमुनाद्या गुणोत्तमाः ॥ २६ ॥
ईषत्पित्तकराः स्वच्छाः पुण्या वात कफापहाः ।
मलयाचलजा नद्यो लघ्वः शीघ्रवहा हिताः ॥ २७ ॥
कृतमाला ताम्रपर्णीप्रमुखा विमलोदकाः ।
स्थिराप स्तत्प्रभावा ये कुर्वन्ति श्लीपदापचीः ॥ २८ ॥
शोथ पादशिरः कण्ठ गलरोगार्वुद क्रमीन् ।
सह्यः शैलभवा नद्यो वेणी गोदावरी मुखाः ॥ २९ ॥
कुर्वन्ति प्रायशः कुष्ठमीषद्वात कफा पहाः ।
विन्ध्याचले भवा शिप्रा रेवाद्याः पाण्डु कुष्ठदाः ॥ ३० ॥
पारियात्रोद्भवा प्रोक्ता हिंधा चर्मण्वतीमुखाः ।

पथ्या स्तडागजास्तत्र त्रिदोषघ्नो बलापहा: ॥ ३१ ॥
दरीजा: कुष्ठ कं वह्नि श्लेष्म श्लीपदरोगदा: ।
प्राच्यावन्त्यपरा: पश्चात् गुदजानि प्रकुर्वते ॥ ३२ ॥
मरुजा मधुरा बल्या लघवोऽग्नि प्रदा: परम् ।
पश्चिमाम्भोधि पतितागोमती नर्मदादय: ।
पथ्या वातास्त्रपित्तघ्नी वल्याकण्डूकफापहा: ॥ ३३ ॥
दक्षिणाब्धिगता बल्या: पित्तघ्ना: कफवातदा ॥ ३४ ॥
पूर्वाम्भोधिवहा नद्यो मन्दगा गुरवो घना: ।
भौमानामम्भसां प्रात: सर्वेषां ग्रहणं वरम् ॥ ३५ ॥
नैर्मल्यं तत्र शैत्यं तत्तेषां सच परो गुण: ।
भुक्तादौ सलिलं पीतं कार्श्यं मन्दाग्निदोष कृत् ॥ ३६ ॥
मध्ये ऽग्निदीपनं श्रेष्ठ मन्ते स्थौल्य कफप्रदम् ।
जीवन्ती जीवना जीवा जगत्सर्वन्तु तन्मयम् ॥ ३७ ॥
ततोऽत्यन्ततया सुप्तै र्न क्वचिद्वारि वार्यते ।
पानीयं प्राणिनां प्राणा विश्वमेव हि तन्मयम् ।
अतोऽत्यन्त निषेधेऽपि न क्वचित् वारि वार्य्यते ॥
पानीयं न तु पानीयं पानीयञ्च प्रदेशयेत् ॥ ३८ ॥
अजीर्णे कथितं चामे पक्के जीर्णे च ते नर: ।
तृषितस्तु विदग्धेऽन्ने य: पिवेत् शीतलं जलम् ।
विदाह: प्रशमं याति शेषमन्नञ्च जीर्य्यते ॥
आकूपन्दोषकृद्वारि प्रायोऽभिष्यन्दि निन्दितम् ॥ ३९ ॥
जाङ्गलं हन्ति सकलन्दोषमग्निप्रदीपनम् ।
साधारणं हिमं स्वादु तृष्णाघ्नं हर्षदं लघु ॥ ४० ॥
वर्षासु योऽवगाहेत पिवेदथ नवं पय: ।

पर्णादिदुष्टं लभते सवाह्याभ्यन्तरामयान् ॥ ४१ ॥
कलुषं छन्नमम्भोज पर्णनील तृणादिभिः ।
दुष्टगन्धाद्यसंस्पृष्टं सूर्याचन्द्रमसांशुभिः ।
व्यापन्नमिति जानीयात्सर्वदोष प्रकोपकृत् ॥ ४२ ॥
तोयन्तद्वर्ज्जयेत् सर्वं यच्चामर्त्तु समुद्भवम् ।
व्यापन्नमिति पानीयं कथितं सूर्यतापितम् ॥ ४३ ॥
तप्नायः सूर्यसिकता ग्रावादिष्वथ धारितम् ।
कर्पूर पूर पुन्नागपाटलादि सुवासितम् ॥ ४४ ॥
स्वच्छं कनकमुक्ताद्यैः शीतन्दोषाय न क्वचित् ।
तत्क्वाथ्यमानं निस्फेनं निवेगं निर्मलं जलम् ॥ ४५ ॥
तत् सर्वदोषशमनं दीपनं पाचनं लघु ।
उष्णन्तदग्नि जननं लघु तदग्निशोधनम् ॥ ४६ ॥
पार्श्वरुक्पीनसाध्मानहिक्कानिल कफापहम् ।
तत् पादहीनं वातघ्नमर्द्धहीनञ्च पित्तजित् ॥ ४७ ॥
त्रिपादहीनं श्लेष्मघ्नं संग्राह्यग्निप्रदं लघु ।
निहन्ति श्लेष्मसंघातं मारुतञ्चापि कर्षति ॥ ४८ ॥
अजीर्णं जरयत्याशु पीत मुष्णोदकं निशि ।
पादावशेषं सलिलं ग्रीष्मे शरदि शस्यते ॥ ४९ ॥
हेमन्ते शिशिरे वर्षास्वर्द्धहीन मथाऽपिच ।
शृत शीतं सदा पथ्यं लघु नीरन्त्रिदोषनुत् ॥ ५० ॥
तच्च पर्युषितं निघ्नमम्भोभूतन्त्रिदोषकृत् ।
दिवाशृतं पयो रात्रौ गुरुतामधिगच्छति ॥ ५१ ॥
रात्रौ शृतन्दिवा पीतं तथा दोषकरं परम् । [इति पानीयम्]
दुग्धं प्रस्नवणं क्षीरं सौम्यं संजीवनं पयः ।

दुग्धं बलकरं शीतं मधुरं वात पित्तजित् ॥ ५२ ॥
स्निग्धं रसायनं मेध्यं जीवनं धातुवर्द्धनम् ।
चेतोरक्त गदश्वासक्षयाशोंभ्रमनुद्गुरु ॥ ५३ ॥
बाल वृद्ध कृशादीनां स्त्रीसक्तानां प्रशस्यते ।
प्रायः प्राणभृतां साम्यं विशेषादो जसे हितम् ५४ [साधारण गुणाः]
गोक्षीरं मधुरं शीतं गुरु स्निग्धं रसायनम् ।
वृंहणं स्तन्य कृद्वर्ण्यं जीवनं वातपित्तनुत् ॥ ५५ ॥
कृष्णा गवां वरं क्षीरं श्वेतायाः श्लेष्मलं गुरु ।
बालवत् सा विवत्सानाञ्चवाक्क्षीरन्त्रि दोषकृत् ॥ ५६ ॥
पिण्याकाद्यशनाज्जातं क्षीरं गुरु कफ पहम् । [दुग्धनामगुणाः]
आजङ्गव्यगुणं ग्राहि विशेषाद्दीपनं लघु ॥ ५७ ॥
हन्ति च शार्शोऽतीसार प्रदराश्रम ज्वरान् ।
अजानामल्प कायत्वात्कटु तिक्तादिभक्षणात् ॥ ५८ ॥
स्तोकाम्बुपानाद्व्यायामात् पयः सर्वगदापहम् । [अजादुग्ध नाम]
आविकं मधुरं केश्यं स्निग्धं वात कफापहम् ॥ ५९ ॥
गुरु कासेऽनिलोद्भूते केवले चानिले वरम् । [मेषदुग्धनाम]
माहिषं मधुरं गव्यं स्निग्धं गुरु बल प्रदम् ॥ ६० ॥
निद्रा शुक्रकरं शीतं मलाभिष्यन्दि वह्निनुत् । [महिषदुग्धनाम]
नार्या लघु पयः शीतन्दीपनं वातपित्त जित् ॥ ६१ ॥
चक्षुः शूलाभिघातघ्नं नस्याश्च्योतनयोर्वरम् । [नारीदुग्ध नाम]
हस्तिन्याः स्वादु बल कृत् चक्षुष्यं शीतलं गुरु ॥ ६२ ॥
[हस्तिनीदुग्धनाम]

औष्ट्रं स्वादुरसं रूक्षं लवणं लघु दीपनम् ।
कृमि कुष्ठ कफानाह शोथोदर हरं सरम् ॥ ६३ ॥

[ उष्ट्रगन्ध दुग्धनाम गुणाः । ]

आम्बं उष्णं पयोरूक्षं बल्यं वातकफापहम् ।
लवणाम्लं लघु स्वादु सर्वमेक शफन्तथा ॥ ६४ ॥
धारोष्णन्दीपनं बल्यं लघु शीतं त्रिदोषनुत् ।
मुहूर्त्तं त्रितयादूर्द्ध्वं पयो भवति विक्रियां ।
तदेव द्विगुणे काले विषवद्गन्ति मानवम् ॥
तस्मात् शीत गुणं तस्मात् पयस्तात् कालिक पिवेत् ।
सुधा समन्तदेव स्यात् धारा शीतन्त्रिदोषकृत् ॥ ६५ ॥
धारोष्णं शस्यते गव्यन्धाराशीतन्तु माहिषम् ।
शृतोष्ण माविकं पथ्यं शृतशीत मजापयः ॥ ६६ ॥
शृतशीतञ्जयेत्पित्तं शृतोष्णं कफमारुतौ ।
अति पक्वं गुरु स्निग्धं वृष्यम्बलविवर्द्धनम् । ६७ ॥
आममामप्रदं क्षीरं अभिष्यन्दि करङ्गुरु ।
आममेवस्त्रियाः क्षीरं पथ्यं पक्वन्तु दोषकृत् ॥ ६८ ॥
प्राभातिकं पयः प्रायो विष्टम्भि गुरु वृंहणम् ।
रात्रौ चन्द्रगुणाधिक्यात् व्यायामपरिवर्जनात् ॥ ६९ ॥
प्रदोष अमतुदृबल्यं चक्षुष्यं वातपित्तहृत् ।
दिवाकर करःघातात् व्यायामानिल सेवनात् ॥ ६९ ॥
विवर्णमम्ल दुर्गन्धि लवणं ग्रथितं पयः ।
वर्जयेदम्ल लवण योगात्कुष्ठादि दोषकृत् ॥ ७१ ॥
सन्तानिकं परं रूक्षं शृत दुग्धोपरि स्मृतम् ।
सन्तानिका गुरुः शीता हृष्या पित्तास्र वातनुत् ॥ ७२ ॥
सप्त रात्रात्परं क्षीरम प्रसन्नन्तु मोरटम् ।
नष्ट दुग्धं भवेन्मस्तु मोरटं जैज्जटोऽब्रवीत् ॥ ७३ ॥

क्षीरन्तत्काल सूताया: पीयूषघन मुच्यते ।
पक्कं दध्नासमं क्षीरं विज्ञेया दधि कूर्चिका ॥ ७४ ॥
तक्रेण तक्र कूर्चीका तयो: पिण्ड किलाटक: ।
पाकं विना स एव स्यात् क्षीरं भक्त सितान्वित: ॥ ७५ ॥
मोरटस्तु सपीयूष: कूर्चिका दधि तक्रयो: ।
किलाटक्षीर शाकाभ्यामेते निद्रामपुष्टिदा: ॥ ७६ ॥
गुरव: श्लेष्मजा वृष्या हृद्या वाताग्निनाशिनी ।
वातजा दुर्जरा रूक्षा ग्राहिणी तक्रकूर्चिका ॥ ७७ ॥ [इति दुग्धम्]
दधिस्यानं पय: सम्यक् स्यानमीषत्तु मन्दकम् ।
तन्मिष्टम म्लमत्यम्ल मधुराम्लमिति स्मृतम् ॥ ७८ ॥
दध्युष्णं दीपनं स्निग्धं कषायानुरसङ्गुरु ।
पाकेऽम्लं ग्राहि पित्तास्र शोफमेद: कफप्रदम् ॥ ७९ ॥
मूत्रकृच्छ्रे प्रतिश्याये शीतके विषमे ज्वरे ।
अतीसारेऽरुचौ कार्श्ये शस्यते बलवर्द्धनम् ॥ ८० ॥
मन्दं त्रिदोषजननं मधुरं वातपित्तजित् ।
अम्लं पित्तास्र कफकृदत्यम्लं रक्तपित्तदम् ॥ ८१ ॥
मधुराम्लं गुणै र्मिश्रैर्दधि पूर्व्ववदादिशेत् ।
गव्यं दध्युत्तमं बल्यं पाके स्वादु रुचिप्रदम् ॥ ८२ ॥
पवित्रं दीपनं स्निग्धं पुष्टिकृत्पवनापहम् ।
आजं दध्युत्तमं ग्राहि लघु दोषत्रयापहम् ॥ ८३ ॥
शस्यते श्वासकासार्श: क्षयकार्श्येषु दीपनम् ।
आविकं दधि पुन्नाम कफ वातप्रकोपणम् ॥ ८४ ॥
अभिष्यन्दिरसं पाके स्वादु प्रायेण दोषलम् ।
माहिषं दधि सुस्निग्धं श्लेष्मलं वातपित्तनुत् ॥ ८५ ॥

वृष्यं विपाके मधुरं गुरु रक्तप्रदूषणम् ।
नार्य्या दधि त्रिदोषघ्नं चक्षुष्यं तर्पणं गुरु ॥ ८६ ॥
बल्यं विपाके मधुरं स्निग्धं वह्निकरं परम् ।
हस्तिन्या दधि वीर्य्योष्णं कटुपाकोऽग्निनाशनम् ॥ ८७ ॥
कषायानुरसं वर्च्चोवर्द्धनं कफवातजित् ।
औष्ट्रं विपाके कटुकं भेदि क्षाराम्लकं दधि ॥ ८८ ॥
निहन्त्युदर कुष्ठार्शः मूत्रबन्धानिलक्रमीन् ।
अश्वादेव शफं रूक्षं दध्यभिष्यन्दि दोषलम् ॥ ८९ ॥
दीपनं स्वादु चक्षुष्यं वातकृत्कफमूत्रनुत् ।
सर्वेषु दधिषु श्रेष्ठं गव्यमेव गुणावहम् ॥ ९० ॥
गालितं दधि सुस्निग्धं वातघ्नं श्लेष्मलं गुरु ।
बलपुष्टिकरं रुच्यं मधुरं नातिपित्तकृत् ॥ ९१ ॥
हृतक्षीरभवं रुच्यं दधि स्निग्धं गुणोत्तमम् ।
पित्तानिलापहं सर्वं धात्वग्नि बलवर्द्धनम् ॥ ९२ ॥
असारं दधि संग्राहि कषायं वातलं लघु ।
विष्टम्भि दीपनं रुच्यं ग्रहणीरोगनाशनम् ॥ ९३ ॥
सशर्करं दधि श्रेष्ठं तृष्णा पित्तास्र दाहनुत् ।
सगुडं वातनुद्वृष्यं बृंहणं तर्पणं गुरु ॥ ९४ ॥
वसन्ते शरदि ग्रीष्मे दधि प्रायेण निन्दितम् ।
हेमन्ते शिशिरे शस्तं वर्षासु च गुणावहम् ॥ ९५ ॥
शस्यते दधि नो रात्रौ शस्तञ्चाम्बु घृतान्वितम् ।
दध्युत्तरो दधिस्नेहो दध्यग्रः कटुकः सरः ॥ ९६ ॥
दध्नः सरो गुरुर्वृष्यो वातवह्नि प्रणाशनः ।
बस्ते विशोधनस्त्वाम्लः पित्तश्लेष्म विवर्द्धनः ॥ ९७ ॥

मस्तु क्लमहरं बल्यं लघु भक्ताभिलाषकृत्।
स्रोतोविशोधनं ह्लादि कफ तृष्णानिलापहम्॥ ९८॥
अवृष्यं प्रीणनं शीघ्रं भिनत्ति मलसंग्रहम्। [दधिनाम]
दण्डाहतं कालपेयं गोरसश्च विलोडितम्॥ ९९॥
सरसं निर्जलं घोलं मथितं रसवर्जितम्।
समोदकं श्वेतमथ मुदश्वित्त्वर्द्धवारिकम्॥ १००॥
पादोदकं भवेत्तक्र मर्द्धाम्भोऽन्येऽवभाषिरे।
तक्रं ग्राहि कषायाम्लं मधुरं दीपनं लघु॥ १॥
वीर्य्योष्णं बलदं रूक्षं प्रीणनं वातनाशनम्।
हन्ति शोथ गरच्छर्द्दि प्रसेक विषमज्वरान्॥ २॥
पाण्डु मेदो ग्रहण्यर्शो मूत्रग्रह भगन्दरान्।
मेहं गुल्म मतीसारं शूल प्लीह कफ कृमीन्॥ ३॥
श्वित्रकोष्ठ कफ व्याधि कुष्ठ तृष्णोदरापची:।
तक्रं निदाघे शरदि दौर्बल्ये भ्रम मूर्च्छयो:॥ ४॥
पित्तास्र मदशोफेषु कदाचिन्न प्रशस्यते।
शीतकाले ग्रहण्यर्श: कफ वातामयेषु च॥ ५॥
स्रोतोनिरोधे मन्दाग्नौ तक्रमेवामृतोपमम्।
तक्रन्तु मधुरं सर्वं श्लेष्मलं वातपित्तनुत्॥ ६॥
अम्लं वातहरं तक्रं रक्तपित्त प्रकोपनम्।
वातेऽम्लं सैन्धवोपेतं स्वादु पित्ते सशर्करम्॥ ७॥
पिबेत्तक्रं कफे रूक्षं व्योषक्षार समन्वितम्।
समुद्धृतं घृतं तक्रं पथ्यं लघु विशेषत:॥ ८॥
स्तोकोद्धृत घृतं तस्माद्वृष्यं गुरु कफापहम्।
अनुद्धृत घृतं शीतं गुरु पुष्टि कफप्रदम्॥ ९॥

यान्युक्तानि दधीन्यष्टौ तद्गुणं तक्रमादिशेत् ।
सरसं निर्जलं घोलं मथितं रसवर्जितम् ॥ १० ॥
दधिवद्घोलमथिते किञ्चित्तु लघु नीरतः ।
मण्डस्तक्रा लघुस्तक्र कूर्च्चिका दधि सम्भवः ॥११॥ [इति तक्रवर्गः]
हैयङ्गवीनं सरजं नवनीतन्तु मन्थनम् ।
नवनीतं लघु ग्राहि सद्यस्कं स्वादु शीतलम् ॥ १२ ॥
मध्यमीषत्कषायाम्लं वृष्यं पित्तानिलापहम् ।
अविदाह्यग्निकृच्चेत्यङ्गयार्शोव्रण कासजित् ॥ १३ ॥
नवनीत चिरोद्भूतं गुरु मेदः कफप्रदम् ।
शोथघ्नं बलकृद्वृष्यं विशेषाद्घृतं शिशोः ॥ १४ ॥
क्षीरोत्थं तदतिस्निग्धं चक्षुष्यं रक्तपित्तजित् ।
वृष्यं बलकरं ग्राहि मधुरं शीतलं परम् ॥१६॥ [इति नवनीतवर्गः]
घृतमाज्यं हविः सर्पिराधारमन्नताह्वयम् ।
घृतं रसायनं स्वादु चक्षुष्यं गुरु दीपनम् ॥ १७ ॥
शीतवीर्य्यं विषालक्ष्मीरातपित्तानिलापहम् ।
अत्यभिष्यन्दि कान्त्योजस्तेजोलावण्य बुद्धिकृत् ॥ १८ ॥
उदावर्त्त ज्वरोन्माद शूलानाह व्रणान् जेत् ।
स्निग्धं कफप्रदं रूक्षं क्षयवीसर्पं रक्तजित् ॥ १९ ॥
स्वर्यं क्षतहरं प्रायः शस्यते बालवृद्धयोः ।
घृतं क्षीरभवं ग्राहि शीतलं नेत्ररोगजित् ॥ २० ॥
निहन्ति पित्तदाहास्र मद मूर्च्छाभ्रमानिलान् ।
पुराणं कटुकं पाके सर्पिर्दोषत्रयापहम् ॥ २१ ॥
ओलनेत शिरः शूल कुष्ठापस्मार शोथजित् ।
योनिरोग ज्वरश्वास कुष्ठार्शो गुल्म पीनसान् ॥ २२ ॥

निहन्ति दीपनं वस्ति नस्यपूति प्रशस्यते ।
घृतमण्डोऽपि घृतवद् गुणैस्तीक्ष्णो लघुः सरः ॥ २३ ॥
दशवर्षात्परं सर्पिः कौम्भमित्यभिधीयते ।
रक्षोघ्नं लघु तस्मात्तु गुणैः श्रेष्ठं महाघृतम् ॥ २४ ॥
घृतस्य गुण दोषौ तु क्षीरतुल्यौ समादिशेत् ।
सर्वेषु गुणकृत् गव्यमाविकं निन्दितं पुनः ॥२५॥ [इति घृतम्]
तैलमुष्णं गुरु स्थैर्यं बलवर्णकरं सरम् ।
वृष्यं विकाशि विशदं मधुरं रसपाकयोः ॥ २६ ॥
सोष्णं कषायानुरसं तिक्तं श्लेष्मानिलापहम् ।
विपाके मधुरं तीक्ष्णं बृंहणं रक्तपित्तजित् ॥ २७ ॥
श्लेष्मणं कटु विण्मूत्र त्वक् गर्भाशय शोधनम् ।
दीपनं मतिदं केश्यं व्यायाम व्रण मेहनुत् ॥ २८ ॥
श्रोत्र योनि शिरः शूल नेत्ररोगविनाशनम् ।
मथिताच्युत विच्छिन्नभग्न व्याल विषादिषु ॥ २९ ।
क्षतेऽग्निदग्धे तत्पथ्यं पानाभ्यङ्गादिभिः सदा ।
घृतमब्दात्परं पक्वं हीनवीर्य्यं प्रजायते ॥ ३० ॥
तैलं पक्वमपक्वं वा चिरस्थायि गुणाधिकम् । [तैलनाम गुणाः]
एरण्डतैलं मधुरमुष्णं दीपन शोधनम् ॥ ३१ ॥
वृष्यन्त्वच्यं वयःस्थापि मेधाकान्तिबलप्रदम् ।
कषायानुरसं सूक्ष्मं योनिशुक्र विशोधनम् ॥ ३२ ॥
हन्ति वातोदरानाह गुल्माष्ठीलाकटिग्रहान् ।
वातशोणित शूलादि व्रण शोथामविद्रधीन् ॥३३॥ [एरण्डतैलम्]
पृथ्वीका मूलजीमूता दन्तीद्रवच शिग्रुजम् ।
निम्बातसीकरञ्जार्क हस्तिकर्णेङ्गुदीभवम् ॥ ३४ ॥

शङ्खिनी निम्बकं तैलं तैलं ज्योतिष्मतीकृतम्।
कुसुम्भ सर्षपोद्भूतं तैलं सौवर्च्चलन्तथा ॥ ३५ ॥
विपाके कटुकं तीक्ष्णमुष्णं तिक्तं रसं लघु।
हन्ति कुष्ठामयं श्लेष्म मेह मूर्च्छामयकृमीन् ॥३६॥ [कटुतैलनाम]
निम्बतैलं जयेत्कुष्ठं व्रण श्लेष्म ज्वर कृमीन्। [निम्बतैलम्]
अतसी तैलमाग्नेयं स्निग्धोष्णं कफ पित्तनुत्।
कटुपाकमचक्षुष्यं बल्यं वातहरं गुरु ॥ ३८ ॥ [अतसीतैलम्]
सार्षप कृमिनुत्तैलं कुष्ठकण्डूहरं लघु।
पित्तास्र दूषणं हन्ति मेह कर्ण शिरो गदान् ॥३९॥ [सार्षपतैलम्]
कौसुम्भं कटुकं तैलमचक्षुष्यं बलप्रदम्।
केवलानिलनुत्तीक्ष्णं विदाह्युष्णं त्रिदोषकृत् ॥४०॥ [कुसुम्भतैलम्]
ज्योतिष्मतीभवं तैलं पित्तलं स्मृतिबुद्धिदम् ॥ ४१ ॥
[ ज्योतिष्मतीतैलम्। ]
अक्षोटिकाहिमुक्ताद्य नारिकेलभवं हरेत्।
तैलं पित्तानिलं केश्यं गुरु श्लेष्मकरं हिमम् ॥४१॥ [नारिकेलतैलम्]
शिंशपागुरु गण्डीरसालामरदारुजम्।
तैलं कषायं कटुकं तिक्तं दुष्टव्रणापहम् ॥ ४२ ॥
वातरक्त विषश्लेष्म कण्डू कुष्ठानिलान् जयेत् ॥४३॥ [शिंशपातैलम्]
भल्लातकत्तौवरकं वीर्य्योष्णं स्वादु तिक्तकम्।
कुष्ठोद्भधिश्वित्रदोषास्र मेदो मेह कृमीन्हरेत् ॥४४॥ [भल्लातकतैलम्]
तैलं पालाशमधुकं पाटलाफलसम्भवम्।
कषायं मधुरं दाह पित्तश्लेष्मगदान् हरेत् ॥ ४५ ॥
[इति पालाशमाधुक पाटलतैलानि। ]
कूष्माण्डत्रपुसेर्वारु तुम्बीकालिङ्गतिक्तकैः।

घृतं प्रियालजीवन्ती श्लेष्मान्तकभवन्तथा ॥ ४६ ॥
तैलं गुरु स्वादु पाकं शीतं मूत्रप्रवर्त्तकम् ।
अदीपनमभिष्यन्दि कफदं वातपित्तजित् । [त्रपुस्यादि तैलम् ]
एकैषजं हिमं तैलं पित्तघ्नं श्लेष्म वातकृत् । [एकैषिजम् ]
यव तिक्तोद्भवं तैलमीषत् तिक्तं रसायनम् ॥ ४७ ॥
दीपनं लेखनं मेध्यं पथ्यं दोषत्रयापहम् । [यवतिक्तोद्भवम्]
आम्रतैल मनातिक्तं मधुरं नाति पित्तकृत् ।
कफ वातहरं रूक्षं सुगन्धि विशदं परम् ।४८॥ [आम्रतैलम्]
स्थावरा वातशमना स्नेहप्रोक्तास्तु तैलवत् ।
गौणमेतेषु तैलत्वं बलवर्णकरं पुनः ॥ ४९ ॥
मेदोमज्जावसा ज्ञेया ग्राम्यानूपौदकोद्भवा ।
गुरवो मधुराश्चोष्णाः समीरण विनाशना: ॥ ५० ॥
जाङ्गलैकशफादीनां सक्रव्यानां कषायका: ।
लघव: शीतला ज्ञेया रक्तपित्त निवर्हणाः ॥ ५१ ॥
प्रतुदा किष्किरादीनां ज्ञातव्या: कफकृन्तनाः ।
घृत तैल वसा मेदो मज्जानो वातनाशनाः ॥ ५२ ॥
यथोत्तरं परिज्ञेया विपाके स्वादवः परम् । [इति तैलम्]
मद्यं हाला सुरा शुण्डा मदिरा वरुणात्मजा ।
सुरा गन्धोत्तमा कल्या देवसृष्टा च वारुणी ॥ ५३ ॥
मद्यं पित्तकरं प्रायं सरं रोचन दीपनम् ।
विदाहि हृष्टविस्रत्वं तीक्ष्णं वात कफापहम् ॥ ५४ ॥
विधिनान्नयुतं पीतं तस्मादमृतसन्निभम् ।
अन्यथा कुरुते रोगानतिपीतं विषोपमम् ॥ ५५ ॥
द्राक्षोत्थमविदाहित्वाद्रक्तपित्तेषु शस्यते ।

बल पुष्टिकर मद्यं रक्तार्शोंहारि दीपनम् ॥ ५६ ॥
माध्वी कल्पगुणा किञ्चित् खर्जूरमनिलप्रदम् ।
तदेव विशदं रुच्यं श्लेष्मघ्नं कर्षणं लघु ॥ ५७ ॥
शालि षष्टिक पिष्टादि कृतं मद्यं सुरा मतम् ।
सुरा गुर्व्वी बलस्तन्य पुष्टिमेदः कफप्रदा ॥ ५८ ॥
ग्राहिणी शोथ गुल्मार्शो ग्रहणी मूत्रकृच्छ्रनुत् ।
पुनर्नवा शालिपिष्टै र्विहिता वारुणी मता ॥ ५९ ॥
सुरावद्वारुणी लघ्वी पीनसाध्मान शूलनुत् ।
प्रसन्ना स्यात्सुरामण्डस्तस्मात्कादम्बरी घना ॥ ६० ॥
जङ्गलस्तदधः प्रोक्तो जङ्गलान्मेदको घनः ।
पक्कशो जङ्गजः सारः सुराबीजन्तु किण्वकम् ॥ ६१ ॥
प्रसन्नानाह गुल्मार्श श्छर्द्यरोचक वातजित् ।
दीपन्याध्मान हृत्कुक्षि तोद शूल प्रणाशिनी ॥ ६२ ॥
कादम्बरी गुरु र्हृद्या दीपनी वातकृत्सरा ।
जङ्गलः कफनुद्ग्राही शोफार्शो ग्रहणीहरः ॥ ६३ ॥
मेदको मधुरो बल्यस्तम्भनः शीतलो गुरुः ।
पक्कशो हृतसारत्वात् विष्टम्भी वातवर्द्धनः ॥ ६४ ॥
किण्वकं वातशमनमहृद्यं दुर्ज्जरं गुरु ।
आच्छिकी सा सुरा या स्यादच्छ त्वक् शालि तण्डुलैः ॥ ६५ ॥
आच्छिकी पाण्डु शोफार्शः पित्तास्र कफ कुष्ठनुत् ।
किञ्चिद्वातकरा रूक्षा दीपनी रेचनी लघुः ॥ ६६ ॥
यवपिष्ट कृतं मद्यं प्रोक्तं यवसुरा च सा ।
काकोलिकी हली ज्ञेया मैरेयो धान्यजासवः ॥ ६७ ॥
आसवस्य सुरायाश्च द्वयोरप्येकभाजनम् ।

साधनं तद्विजानीयान्मैरेय सुभयात्मकम् ।
क्वचित्तु धातकीपुष्पं गुड़ धान्याम्बु साधितम् ॥ ६८ ॥
गुर्व्वी यवसुरा रूक्षा स्वादिष्टम्भ त्रिदोषकृत् ।
काकोली वृंहणी वृष्या दृष्टिमान्द्यप्रदा गुरुः ।
मैरेयं वृंहणं वृष्यं गुरु सन्तर्पणं सरम् ॥ ६९ ॥
मद्यं सर्वरसं जातं मधूलकमुदीर्य्यते ।
मधूलकं गुरु स्वादु स्निग्धं शुक्र कफप्रदम् ।
शार्करो दीपनः स्वादुः पाचनो रोचनो लघुः ॥ ७० ॥
स्त्रीविलासकरी वात शोष वस्ति विकारनुत् ६९ ॥
मध्वासवो लघू रूक्षः कुष्ठ मेहविषापहः ।
गौड़ोऽग्निवर्द्धनो वर्ण्य बलकृत्तर्पणः कटुः ॥ ७१ ॥
तिक्तको वृंहणः स्वादुः स्पष्टविण्मूत्र मारुतः ।
इक्षोः पक्वरसः पक्वः सीधुः पक्वरसः स्मृतः ।
आमैः स एव विहितो बुधैः शीतरसो मतः ॥ ७२ ॥
सीधुः पक्वरसः श्रेष्ठः स्वराग्नि बलवर्णकृत् ।
वात पित्तकरी हृद्यः स्नेहनो रोचनो जयेत् ।
विबन्ध मेह शोफार्शः शोफोदर कफामयान् ॥ ७३ ॥
तस्मादल्पगुणः शीतः रसः संलेखनः स्मृतः ।
जाम्बवः चौद्रसम्भूतः जम्बूरस गुड़ोद्भवः ।
जाम्बवो बद्ध निस्यन्दः कषायोऽनिलकोपनः ॥ ७४ ॥
अरिष्टासव सीधूनां गुणान् कर्माणि चादिशेत् ।
बुद्धा यथा स्वसंस्कारमवेक्ष्य कुशलो भिषक् ।
सान्द्रं विदाहि दुर्गन्धि विरसं क्रमिसङ्कुलम् ॥ ७५ ॥
अहृद्यं तरुणं रूक्षं उष्णं दुर्भोजने स्थितम् ।

अल्पौषधं पर्य्युषितमत्यर्थं पिच्छलञ्च यत् ।
कफप्रकोपि तन्मद्यं दुर्ज्जरञ्च विशेषतः ॥ ७६ ॥
पित्तप्रकोपि बहुलं तीक्ष्णमुष्णं विदाहि च ।
अहृद्यं पेशलं पूति कृमिलं विरसं गुरु ।
तथा पर्य्युषितं वापि विन्द्यादनिलकोपनम् ॥ ७७ ॥
सर्व्वदोषैरुपेतन्तु सर्व्वदोष प्रकोपनम् ।
चिरस्थितं जातरसं दीपनं कफवातजित् ।
रुच्यं प्रसन्नं सुरभिमेध्यं सेव्यं महाद्रवम् ॥ ७८ ॥
तस्मान्नेकप्रकारस्य मद्यस्य रसवीर्य्यनात् ।
स सौक्ष्म्यादौष्ण्यवातित्वा विकाशित्वात्च वह्निनुत् ।
समेत्य हृदयं प्राप्य धमनीरूर्द्ध्वमागधा ॥ ७९ ॥
विक्षुभ्येन्द्रिय चेतांसि मदयत्याशु वीर्य्यतः ।
चिरेण श्लेष्मके पुंसि पातनो जायते मदः ।
अचिराद्वातिके दृष्टः पैत्तिके शीघ्रमेव च ॥ ८० ॥
नवं मद्य मभिष्यन्दि त्रिदोषजनकं सरम् ।
अरिष्टं वृंहणं दाहि दुर्गन्धि विशदं गुरु ।
जीर्णं तदेव रोचिष्णु कृमिश्लेष्मानिलापहम् ॥ ८१ ॥
हृद्यं सुगन्धि सुगुणं लघु स्रोतोविशोधनम् ।
सात्विकं गीतहास्यादि राजसं साहसादिकम् ।
तामसे निन्द्यकर्माणि निद्रादि कुरुते तदा ॥ ८२ ॥
शुक्तं कफघ्नं तीक्ष्णोष्णं लघु रोचन पाचनम् ।
पाण्डु कृमिहरं रूक्षं भेदनं रक्तपित्तकृत् ।
गौड़ादि रसयुक्तानि मद्ये शूक्तानि यानि च ॥ ८३ ॥
यथा पूर्वं गुरुतरा स्नानभिस्यन्दिककारिणः ।

स्यात्काञ्जिकन्तु सौवीरमारनालं तु दोषकृत् ॥ ८४ ॥
काञ्जिकं शिशिरस्पर्शं पाचनं रोचनं लघु ।
तुषोदकं यवैरामं सतुषैः सकलैः कृतम् ॥ ८५ ॥
सौवीरकं कृतन्त्वामैः पक्वैर्वा निस्तुषैर्यवैः ।
सर्व्वैरसैरसाम्लं स्यात् सौवीरकमिति क्वचित् ॥ ८६ ॥
तुषाम्बु दीपनं हृद्यं पाण्डु कृमिगदापहम् ।
सौवीरकं ग्रहण्यर्शो नाशनं भेदि दीपनम् ॥ ८७ ॥
धान्याम्लन्धान्य योनित्वात्प्रीणनं लघु दीपनम् ।
स्पर्शदाह करं पानात्पाचनं श्लेष्म नाशनम् ॥ ८८ ॥
गण्डूषान्मुख वैरस्य दौर्गन्ध्यं कफकृन्तनम् । [मद्यभेदः]
मूत्रं गोनागमहिषीहयाजाविख रौष्ट्रजम् ।
नराणाञ्च भवेत्सर्वं पाचनं दीपनं लघु ॥ ८९ ॥ ८६ ॥
लवणानुरसं तिक्तं रूक्षं चोतीविशोधनम् ।
पित्तलं कटुकं हृद्यम्भेदि वातानुलोमतः ॥ ९० ॥
निहन्ति वात गुल्मार्शः शोफोदर कफकृमीन् ।
कुष्ठपाण्डु गदानाह विषशूलारुचिस्तथा ॥ ९१ ॥
गोमूत्रन्तेषु सर्वेषु मूत्रयोगे प्रशस्यते ।
हस्ति मूत्रं विषार्शोघ्नं कुष्ठगुल्म कृमीन्जयेत् ॥ ९२ ॥
माहिषं शोफगुल्मार्शः पाण्डु मेहेषु योजयेत् ।

[ इति गोहस्ति महिषमूत्र नाम गुणाः । ]

अश्वभेदि विशेषेण कफ दद्रुक्रिमीन् हरेत् ॥ ९३ ॥ [अश्वमूत्रनाम]
आजङ्कुष्ठ विषश्वासकामलापाण्डु दोषजित् । [अजामूत्रनाम]
आविकं शोफकुष्ठार्शोमेह वर्चोग्रहापहम् ॥ ९४ ॥ [आविकमूत्रनाम]
गर्दभं ग्रहणीमेह कुष्ठोन्माद कृमीन् जयेत् । [गर्द्दभमूत्रनाम]

औष्ट्रमुन्मादशोफार्श: कृमि शूलोदरापहम् ॥ ९५ ॥ [उष्ट्रमूत्रनाम]
नरमूत्रं सरं हन्ति सेवितं सुरसायनम् । [नरमूत्रनाम]
गोऽजाविमहिषीणाञ्च स्त्रीणां मूत्रं प्रशस्यते ॥ ९६ ॥
खरोष्ट्रेभनराश्वानां पुंसां मूत्रं हितं मतम् ।

इति श्रीमदन पाल विरचिते मदनविनोदे निघण्टौ पानीयनामविशेष वर्गोऽष्टमः ॥ ८ ॥

यङ्कृतानेन कृषेति वक्त्रे प्रसारिते वीक्ष्य ततो जगन्ति ।
सविस्मयं सादरमीक्ष्यमाणं यशोदया नन्दसुतं नमामि ॥ १ ॥
इक्षुर्महारसोवेणुर्नि:स्तो गुडपत्रक: ।
तृणराजो मधुतृणो गण्डीरी स्तपुष्पक: ॥ २ ॥
ह्रस्वमूलो लोहितेक्षु: पौण्ड्रक: पौण्ड्रकोऽपर: ।
रसाल: सुकुमारोऽपि कृष्णेक्षुर्भीरुकोमत: ॥ ३ ॥
इक्षु: स्वादुर्गुरु: शीतोष्ण्य: स्निग्धोबल प्रद: ।
जीवनो वातपित्तघ्न: कुर्य्यान्मूत्र कफ कृमीन् ॥ ४ ॥
स मूले मधुरोऽत्यर्थं मध्ये मधुर एवच ।
अग्र ग्रन्थिषु विज्ञेयो लवणो मूत्रलस्तथा ॥ ५ ॥
लोहितेक्षुर्गुरु: शीतोदाहपित्तास्रकृच्छ्रनुत् ।
पौण्ड्रक: शीतल: स्निग्धो बृंहण: कफ कृत्सर: ॥ ६ ॥
कृष्णेक्षुस्तद्गुणो वंश: क्षार: किञ्चित्तु तत्सम: ।
वंश वच्छतपोरोपि किञ्चिदुष्ण: समीरजित् ॥ ७ ॥
कान्तारतापसौ तद्वत् काष्ठेक्षुर्वातलो हिम: ।
कासकारी गुरु: शीतोरक्त पित्त क्षयापह: ॥ ८ ॥
सूचीपत्रोनील परो नैपालोदीर्घ पत्रक: ।
वातल: कफ पित्तघ्न: सकषायोऽतिदाहिन: ॥ ९ ॥ [इक्षुभेदा:]

दन्तनिष्पीडितस्तेषां रसः पित्तास्त्रनाशनः ।
शर्करासमवीर्यं स्यादविदाही कफ प्रदः ॥ १० ॥
गुरुर्विदाही विष्टम्भी यान्त्रिकस्तु प्रकीर्त्तितः। [इक्षुरस गुणाः]
सिता मत्स्यण्डिका पल्लीमत्स्यण्डी बलकस्तथा ॥११॥
अन्या विषपलोद्भवा शिग्रुका क्षत्तिकामला ।
खण्डमन्यत् खण्डसिता माधवी मधु शर्करा॥ १२ ॥
यवा सशर्कराऽन्या सा यवासक्काथ सम्भवा ।
अन्या पुष्पसिता प्रोक्ता पुष्प संभृत शर्करा ॥ १३ ॥
फाणितं क्षुद्र गुडको गुड़स्त्विक्षुरसोद्भवः ।
मत्स्यण्डी ग्राहिणी बल्या गुरुः पित्तानिलापहा ॥१४॥ [पोटरी]
सितोपला सरा गुर्वी वातपित्तहरा हिमा। [मिसिरी]
खण्डमप्येव सुद्दिष्टं रुच्यं पुष्टिबलप्रदम् ॥ १५ ॥ [ खण्ड ]
माधवी शर्करा रूक्षा कफपित्तहरा गुरुः । [मधु शर्करा]
यवा सशर्करा शीता वातला कफपित्तजित् ॥१६॥ [यवासशर्करा]
सितपुष्प सिता हृद्या रक्तपित्तहरा गुरुः । [पुष्पवाशितकराः]
फाणितं गुर्वभिष्यन्दि दोषलं मूत्रशोधनम् ॥ १७ ॥ [राव]
मधूकं फाणितं वस्तिदूषणं वात पित्तलम् । [मधूकाख]
गुडः क्षारोगुरुः स्वादुर्वात पित्ताग्निकृत्सरः ॥ १८ ॥
बल्यः कृमिश्लेष्म करोमूत्र रक्तविशोधनः ।
जीर्णो हृद्यो लघुः पथ्योनाभिष्यन्द्यग्नि पुष्टिकृत्॥१९॥ [गुड़]
इक्षोर्विकारा विमला यथा कुर्युर्गुणास्तथा ।
तृड्दाह मूर्च्छापित्तास्त्रकृविषमेहहरा हिमाः ॥ २० ॥
गुरवो मधुरा बल्याः स्निग्धा वातहराः सराः। [इक्षुवर्गः]
मधु पुष्पासवः पुष्परसे माक्षि कमीरितम् ॥ २१ ॥

माक्षिकं पैत्तिकं क्षौद्रं भ्रामरं मधुविस्तरात् ।
माक्षिकं तैल संकाशं पैत्तिकं घृत सन्निभम् ॥ २२ ॥
क्षौद्रं कपिल वर्णं स्यात् भ्रामरं स्फटिकोपमम् ।
मधु शीतं लघु स्वादु रूक्षं ग्राहि विलेखनम् ॥ २३ ॥
चक्षुष्यं दीपनं स्वर्यं व्रणशोधन रोपणम् ।
वर्ण्यं मेधाकरं वृष्यं विशदं रोचनं जयेत् ॥ २४ ॥
कुष्ठार्शः कास पित्तास्रक् कफ मेह क्लम क्रिमीन् ।
मद तृष्णा वमिश्वासहिक्कातीसार हृद्ग्रहान् ॥ २५ ॥
दाह क्षतक्षयघ्नन्तु योगवाह्यल्प वातलम् । [मधुः]
माक्षिकं मधुषु श्रेष्ठन्नेत्रामय हरं लघु ।
पैत्तिकं मधु रूक्षोष्णं पित्त दाहास्र वातकृत् ॥ २६ ॥
क्षौद्रं माक्षिकमप्येव विशेषान्मेह नाशनम् ।
भ्रामरं रक्त पित्तघ्नं मूत्र जाड्यकरं गुरु ॥ २७ ॥
नवीनं मध्वभिष्यन्दि स्निग्धं श्लेष्महरं सरम् ।
पुराणं ग्राहि तद्रूक्षं मेदोघ्नमतिलेखनम् ॥ २८ ॥
विषादि पुष्ट पुष्पेभ्यः सविषा माक्षिकादयः ।
मधु चिन्वन्ति तस्मात्तत् स्वभावात्सविषं स्मृतम् ॥ २९ ॥
तस्मादग्न्यात पात्तप्तं तद्युक्तं हन्ति मानवम् ।
उष्णे काले च देशे च द्रव्यैरुष्णैश्च योजितम् ॥ ३० ॥
निरूहे छर्दने तज्ज्ञैः तदुक्तं न निवार्यते ।
तस्मात्पाक मलब्धैव तयोस्तद्धि निवर्त्तते ॥ ३१ ॥
आमामये जले नापि तद्द्रवेण विरुध्यते ॥ [मधुगुण]
मदनं मधुजं सिक्थं मधूच्छिष्टं मधूत्थितम् ॥ ३२ ॥
मदनं मृदु सुस्निग्धम्भूतघ्नं व्रणरोपणम् ।

भग्न सन्धान कृद्वात कुष्ठवीसर्प रक्त जित् ॥ ३३ ॥

योराज्ञां मुखतिलकः कटारमल्लस्तेन श्रीमदनन्नृपेण निर्मितेऽत्र।
ग्रन्थेऽभून्मदन विनोद नाम्नि पूर्णोवर्गोऽयं मधुररसै रिक्षुकादिः।

इति मधुरवर्गो नवमः ॥ ९ ॥

अजन्ममृत्युं बहु जन्म मृत्युं तमालभासं वियद प्रकाशम्।
मुक्तिप्रदोबन्धमुलूखलेन त्रैलोक्यतातं शिशुमाश्रयामि ॥ १ ॥

शालयो रक्तशालाद्याः ब्रीहयः षष्टिकादयः।
मुद्गादि वैदलं शैलं कङ्ग्वादि तृण धान्यकम् ॥ २ ॥
क्षुद्रधान्यङ्कुधान्यन्तु शूकधान्यं यवादिकम्।
रक्तशालि र्लोहितः स्यात् गरुड़ः शकुनीहृतः ॥ ३ ॥
सुगन्धिको महाशालिः कलमस्तु कलामकः।
रक्तशालि दीर्घशूकः पुण्ड्रो महिषमस्तकः ॥ ४ ॥
पूर्णचन्द्रो महाशालिः पुण्डरीकः प्रमादकः।
पुष्पाण्डकः शीतभीरुः काञ्चनः शकुनीहृतः ॥ ५ ॥
पाण्डुगौरः शारिवाख्यो रोध्रपुष्पः सुगन्धकः।
हायनो दीर्घलातश्च महादूषक दूषकौ ॥ ६ ॥
शालयो मधुराः स्निग्धा बल्याःकद्धयवर्चसः।
पित्तघ्नाल्पानिलकफा मूत्रला लघवो हिमाः ॥ ७ ॥
रक्तशालि र्वरस्तेषां बल्यो वर्ण्यस्त्रिदोषजित्।
चक्षुष्यो मूत्रलः स्वर्यः शुक्रलस्तृट्ज्वरापहः ॥ ८ ॥
विषव्रणहरः किञ्चित्तस्मादल्पगुणाः परे।
महाशालि र्वृष्यो बल्यो रक्तशालिगुणैः समः॥ ९ ॥
कार्म्मुकः पीत आमोदो लघु वृष्यो मुकुन्दकः।
महाषष्टिककेदारं पुष्पाङ्कुरवकादयः ॥ १० ॥

षष्टिका मधुरा शीता लघवो बद्धवर्चसः ।
वातपित्त प्रशमनाः शालीनां सदृशा गुणैः ।
षष्टिकः प्रवरस्तेषां लघुः स्निग्ध स्त्रिदोषजित् ॥ ११ ॥
पाके स्वादु र्मृदुर्ग्राही स्थैर्य्यकारी बलप्रदः ।
रक्तशालिगुणैस्तुल्यास्तस्मादल्पगुणाःपरे ।
कृष्णव्रीहिस्तुरितकः कुक्कुटाण्डक पाटलः ॥ १२ ॥
शलामुख राजीवाख्यो नन्दीजन्तु मुखादयः ।
व्रीहयो मधुराः शीताः षष्टिकानां गुणैः समाः ।
कृष्णव्रीहि र्वरस्तेषां तस्मादल्पगुणाः परे ॥ १३ ॥
शालयो दग्धभुञ्जाना लघुरूक्षाः कफापहाः ।
स्थूलजाः स्वादवः पित्तकफघ्ना वातवह्निदाः ।
कैदारा वातपित्तघ्ना गुरवः कफशुक्रलाः ॥ १४ ॥
रोप्यातिरोप्या लघवो मूत्रलास्ते गुणोत्तराः ।
छिन्नरूढा हिमा रूक्षाः पित्तघ्ना लघुपाकिनः ।
पुराणं नेत्रमन्धान्यं कौवातृस्तत्र प्रयत्नतः ॥ १५ ॥
पुनर्विशोषितं सम्यग्घर्मे रूक्षं लघु स्मृतम् ।
दीपनं पाचनं मेध्यं वातश्लेष्महरं परम् ॥
शोहित्वं षष्टिकस्यापि भिन्नत्वं शीघ्रपातकः ॥१६॥ [इति शाल्यादि]
गोधूमः सुमनः चुद्रो मधूली रूपशीतला ।
नन्दीमुखोऽल्पगोधूमोलोकेशी पासिकोच्यते ।
गोधूमो मधुरः शीतो वातपित्तहरो गुरुः ॥ १७ ॥
कफ शुक्रप्रदो बल्यः स्निग्धसन्धानकृत्सरः ।
जीवनो वृंहणो वर्ण्यः स्यन्दी रुच्यो स्थिरत्वकृत् ।
मधूली शीतला स्निग्धा पित्तघ्नी मधुरा लघुः ॥ १८ ॥

Centre for the Arts

शुक्ला वृंहणी पथ्या तद्वन्नन्दीमुखी मता ॥
एतस्मात् स्थूलगोधूमात् चाद्रो हीनतरो गुणैः । [गोधूमनाम]
यवः शुचिस्तीक्ष्ण शूको निःशूकोऽतियवोऽपरः ॥ १८ ॥
यवः कषायो मधुरः शीतः पित्त कफास्त्रजित् ।
व्रणेषु तिलवत्पथ्यो रूक्षो मेधाग्निवर्द्धनः ॥ २० ॥
लेखनो बहुनिस्यन्दः स्वर्य्यो मेह तृषापहः ।
बहुवातमलः स्थैर्य्यं वर्णकारी स पिच्छलः ॥ २१ ॥
अस्मादति यवः किञ्चिद्गुणै न्यूनतरः स्मृतः । [यवनाम]
शिम्बी मुद्गवणो माषः सतीनः सकलायकः ।
मसूरस्वकमङ्गल्यौ मकुष्ट त्रिपुटादयः ॥ २२ ॥
वैदला मधुरा रूक्षाः कषायाः कटुपाकिनः ।
वातला कफपित्तघ्नाः बद्धमूत्रबला हिमाः ॥ २३ ॥
ऋते मुद्ग मसूराभ्यां अन्ये त्वाध्मानकारकाः ।
शिम्बा विष्टम्भिनी मेहहष्टिघ्ना वातपित्तलाः ॥ २४ ॥
विशदा गुरवो हृद्या रूक्षाः कटुविपाकिनः ।
सितासितादि भेदेन बहुधास्ते प्रकीर्त्तिताः ॥२५॥ [दालनाम]
मुद्गो बलाढ्यो मङ्गल्यो हरितः शारदोऽपरः ।
पीतः प्रचेतो वलाको माधवः परिकीर्त्तितः ॥ २६ ॥
वनमुद्गस्तुवरकौ राजमुद्गस्तु खण्डकः ।
मुद्गो रूक्षो लघु ग्राही कफपित्तहरो हिमः ॥ २७ ॥
स्वादुरल्पानिलो नेत्र्यो वर्ण्योऽप्ये तद्गुणः स्मृतः ।
हरितः प्रवरस्तेषां तच्छाकं तिक्तमुत्तमम् ॥ २८ ॥ [मुद्ग]
माषो जीर्णकरो धारि धवलो राजमाषकः ।
माषो गुरुः स्वादुपाकः स्निग्धो हृद्योऽनिलापहः ॥ २९ ॥

उष्णः स तर्पणो बल्यः शुक्रलो बृंहणः परम्।
भिन्नमूत्र कफस्तन्य मेदः पित्त कफप्रदः॥ ३० ॥
गुदकीलार्दित श्वास पङ्क्ति शूलानि नाशयेत्। [मूगउदर]
राजमाषः स्वादु रूक्षः कषायस्तर्पणो लघुः।
ग्राही वातकफः स्तन्य बद्धवर्चोरुधिप्रदः॥३१॥ [राजमाषनाम]
मसूरिका मसूलः स्यान्निष्पावो बल्लकः स्मृतः।
मसूरो वातलो ग्राही कफपित्तहरो गुरुः॥ ३२ ॥
वान्तिजिन्मधुरः पाके कृमि कुज्वरनाशनः। [ मसूरनाम ]
निष्पावोऽनिलपित्तास्र मूत्रस्तन्य करः सरः॥ ३३ ॥
विदाह्युष्णो गुरुः श्लेष्म शोफकृच्छुक्रनाशनः। [काङ्गुनी]
वर्त्तुलस्तु सतीनः स्याद्धरेणुः स्वल्पवर्त्तुलः।
वर्त्तुलः शीतलोग्राही कफपित्तहरो लघुः॥ ३४ ॥
विपाके मधुरो रूक्षोहरेणुस्तद्गुणः स्मृतः। [वरतुलम्]
कलायः खण्डिकः प्रोक्त स्त्रिपुरः क्षुद्रखण्डिकः।
कलायः कफपित्तघ्नो ग्राही शीतोऽतिवातलः॥ ३५ ॥
त्रिपुटोऽपि गुणैरेवं तच्छाकं कफपित्तजित्। [मटरनाम]
चणको हरिमन्थः स्याद्वाजिमन्थश्च जीवनः॥ ३६ ॥
चणकः शीतलो रूक्षः रक्तपित्त कफापहः।
लघुः कषायो विष्टम्भी वातलः कुष्ठनाशनः॥ ३७॥ [चणा]
मसूरिकारि मसूरि मंङ्गल्या पाण्डुरापलः।
मसूरि मंधुरः पाकेसं ग्राही शीतलो लघुः।
कफपित्तास्रजिद्बल्यः तच्छाकं लघु तिक्तकम्॥३८॥ [मसूर]
कुलत्थश्चक्रकाश्चकः कुलाली वनजः परः॥
अपरा दृक्प्रसादा च चक्षुष्या च कुलत्थिका।

कुलाली लोचनहिता कुम्भकारी मलापहा ॥ ३९॥
कुलत्थ: कटुक: पाके कषायो रक्तपित्तजित्।
लघुर्विदाही वीर्य्योष्ण: श्वासकास कफानिलान् ॥ ४० ॥
हन्ति हिक्काश्मरी शुक्र हगानाहान् सपीनसान्।
स्वेद सङ्ग्राहको गुल्म मेद: कृमिहरस्मर: ॥ ४१ ॥
वन्यो विशेषत: शीतो नेत्रामय विषापह:। [ कुरथी ]
तिलष्युलस्तैल फलस्तिल पिञ्जोऽपर: सित: ॥ ४२ ॥
जातिलो वनजात:स्या दाढकी तुवरीमता।
तिल: कषायो मधुरस्तिक्तक: कटुको रसे।
तिल: ग्राही गुरु: स्वादु: स्निग्धोऽस्य कफपित्तल: ॥ ४३ ॥
बल्य: केश्यो हिम स्पर्शोस्त्वच्यो व्रणहित:परम्।
वन्योऽल्पमूल कृद्वातुनाशनोऽग्निमतिप्रद: ॥ ४४ ॥
कृष्ण: श्रेष्ठतमस्तेषु शुक्लो मध्यम: सित:।
अन्ये हीनतरा: प्रोक्तास्तज्ज्ञै: रक्तादयस्तिला: ॥ ४५ ॥ [तिल]
तुम्बरी ग्राहिणी शीता लघु: कफविषास्त्रजित्। तुम्बरी]
अतसीमसृणा नील पुष्पचेलूत्तमा चमा ॥ ४६ ॥
अतसी शुक्रदृष्टिघ्नी स्निग्धावातास्रजिद्गुरु: ॥४७॥[अतसी]
कौसुम्भं षाड्गकी पीतमलक्त वस्त्ररञ्जनी।
तद्बीजं किरटी लघ्वी शुद्धपयोत्तरा तथा ॥ ४८ ॥
कुसुम्भ वातल रूक्ष रक्तपित्त कफापहम्।
किरटातसीवदुद्दिष्टा विशेषाद्विषनाशनी ॥ ४९ ॥[कुसुम्भ]
सर्षप: कटुक: स्नेहो भूतघ्नो रक्तिताफल:।
तुर्तुभोऽन्य: स उद्दिष्ट: सिद्धार्थ: श्वेतसर्षप: ॥ ५० ॥
राजिका वा सुरीराजी सुतीक्ष्ण: कृष्णसर्षप:।

सर्षप: कफवातघ्नो तीक्ष्णोष्णो रक्तपित्तकृत् ।
किञ्चिद्रूक्षोऽग्निद: कण्डू कुष्ठकोष्ठ क्रिमीन् हरेत् ॥५१॥
राजिकास्तद्गुणा ज्ञेया: तीक्ष्णा: तीव्रा विशेषत:। [तरिशव राई]
शण: प्रोक्तो मातुलानी जन्तु तन्तुमहाशणा: ।
शणो हिमो गुरुर्ग्राही तत्पुष्पं प्रदरास्रजित् ॥५२॥ [शण]
कङ्गुश्यामाकनीवार वरकोद्दाल नर्त्तका: ।
वरट्टिका तोदपर्णी कोद्रवश्च मधुलिका ॥ ५३ ॥
नन्दीमुखी वेणु यवा प्रियङ्गु: कोरदूषक: ।
गवेधुका नलो नाली मुकुन्दं वारिकादिकम् ॥ ५४ ॥
तृण धान्यं लघु स्वादु कटुपाकि विलेखनम्।
रूक्षोष्णं बद्धनिस्यन्दं वातपित्तप्रकोपनम् ॥ ५५ ॥
पीततण्डुलिका कङ्गु: प्रियङ्गु: कर्कटीमता ।
सितकङ्गुस्तु मुसटी रक्तकङ्गुस्तु शोधिका ।
चीनाक: काककङ्गु: स्यात् श्यामाक:शणकङ्गुक: ॥ ५६ ॥
शालादय: कङ्गुभेदा: कोद्रव: कुरस:स्मृत: ।
कोद्रव: कोरदूष:स्यात् उद्दालो वनकोद्रव: ।
प्रियङ्गु: पित्तजिद्वृष्यो भग्नसन्धानकृद्गुरु: ॥ ५७ ।
श्यामाक: शोषण: शीतो रूक्ष: पित्तकफापह: ।
कोद्रव: शीतलो ग्राही विषपित्त कफान् जयेत् ॥५८॥ [कोद्रव:]
नीवार उटिकानाड़ी मुनिव्रीहि र्मुनिप्रिय: ।
नीवार: शीतलो ग्राही पित्तघ्न: कफवातकृत् ॥५९॥ [साउकनाम]
यवनालो देवधान्यञ्जुर्ण लिर्जुर्ह्नलोऽनल: ।
यवनाल: स्वादु शीतो वातल: कफपित्तजित् ॥६०॥ [जोढरी]
गवेधुकाकर्षणी स्यात् गोजिह्वाकर्षिणी मता ।

गवेधुका कटुः स्वादी कार्श्यकृत् कफनाशिनी ॥६१॥ [गवेधुका]

अपर्याप्तं व्याधिहतं अनार्त्तवम भूमिजम् ।

नवं जन्त्वादिभिर्जुष्टं न धान्यं गुणवन्मतम् ॥ ६२ ॥

धान्यं नवमभिस्यन्दि गुरु स्वादु कफ प्रदम् ।

वर्षोषितं सर्वधान्यं गौरवं परिमुञ्चति ॥ ६३ ॥

न मुञ्चति तदा वीर्यं क्रमान्मुञ्चत्यतः परम् ।

विदाहि गुरु विष्टम्भि विरूढं दृष्टिदूषणम् ॥ ६४ ॥

एतेषु यवगोधूमतिलमाषा नवा हिताः ।

रूढाः पुराणविरसा न तथा गुणकारिणः ॥ ६५ ॥

योराज्ञामित्यादि धान्योऽयं ललितपदे सुधान्य वर्गः ।

इति धान्यवर्गो दशमः ॥ १० ॥

---

राधा हरिं चरणयोः पतितं कराभ्यां

कोपाज्जघान तमुदीक्ष्य पुनर्हसन्तम् ।

तत् पादयोः समपतच्चकिताभियातां ।

उत्थापयन् जयति कैतव गोपवेषः ॥ १ ॥

आहारं भोजनं जग्धिर्नित्यशोजीवनं तथा ।

आहारो बल कृत्सद्यः प्रीणनो देह धारकः ॥ २ ॥

ओजस्तेजः स्वरोत्साह स्मृति स्मृतिमति प्रदः । [आहारः]

भक्त मन्धस्तु भिस्सोहं करन्दीर्ि द विरोदनः ।

भक्तं वह्निकरं पथ्यन्तर्पणं मूत्रलं लघु ॥ ३ ॥

सुधौतं प्रस्रुतश्चोष्णं विशदङ्गुणवन्मतम् ।

अधौतमस्रुतं शीतं गुरु रुच्यं कफ प्रदम् ॥ ४ ॥

भ्रष्टतण्डुलकं रुच्यं सुगन्धि कफ जिल्लघु ।

भक्तं मांसं फलक्षीरं वैदलाम्लादि साधितम् ।
स्नेहं शाकैश्च गुरुतातृप्यं बल्यं कफ प्रदम् ॥ ५ ॥
रसोदनो गुरुर्हृद्यो बल्योवात ज्वरा पहः ।
घोलम्भक्तं ग्रहण्यर्शः श्रमघ्नं पाचनं हिमम् । [भात]
अत्युष्णानां बलहरं शीत मुष्णञ्च दुर्ज्जरम् ॥ ६ ॥
अतिक्लिन्नं ग्लानिकरं दुर्ज्जरं तण्डुलान्वितम् ।
सौमनस्यं बलं पुष्टि उत्साहं हर्षणं सुखम् ।
स्वादु सञ्जनयत्युन्नं मासस्वादु विपर्य्ययम् ॥ ७ ॥

अथ ओदननामगुणाः ।

यवागूः षड्गुणे तोये संसिद्धा विरलद्रवा ।
चतुर्गुणे तुसं सिद्धाविलेपीघन सिक्थिका ।
पेयासिक्थान्विता तोये चतुर्दश गुणीकृता ॥ ८ ॥
मण्डश्चतुर्दश गुणे सिद्धस्तोयेत्व सिक्थकः ।

[ इति पेयादि लक्षणम् ]

यवागूर्ग्राहिणी तृष्णा ज्वरघ्नी वस्तिशोधनी ॥९॥ [यवागू]
विलेपी दीपनी वल्या हृद्या संग्राहिणी लघुः ।
व्रणाक्षिरोगिणां पथ्या तर्पणी तृट्ज्वरा पहा ॥१०॥ [विलेपी]
पेयाकुक्षिगदः क्लीति ज्वरस्तम्भाति सारजित् ।
कृच्छ्राग्नि कृत् लघु र्दोषमलस्वेदानु लोमनी॥११॥ [पेया]
मण्डोग्राही लघुः शीतो दीपनो धातु साम्य कृत् ।
स्रोतोमार्दव कृत्पित्त ज्वर श्लेष्मा श्रमापहः ॥१२॥ [मण्ड]
याव्य मण्डोयवैर्भृष्टै र्लाजमण्डस्तु शालिभिः ।
याव्य मण्डोलघु र्ग्राहीशूलानाह त्रिदोषजित् ॥१३॥
नव ज्वरेऽपि पथ्योऽयं पटोलमागधान्वितः ।

लाजामण्डोलघु र्ग्राहीसद्य: पाचन दीपन: ॥१४॥

[ याव्यमण्डलाजमण्ड । ]

तण्डुलैर्दर्द्ध मुद्गांद्यै: किञ्चिद्भृष्टैस्तु पाचितै: ।
हिङ्गु सिन्धूत्थधनि कापर्त्ति कटुसंस्कृत: ॥ १५ ॥
मेय: सोऽष्टगुणोमण्डो ज्वरदोषत्रयापह: ।
रक्त: चुद्बोधक: प्राणादीपन: शीतलो लघु: ॥१६॥ [अष्टगुणमण्ड]

यूष: स्मृतोवैदलानां अष्टादश गुणेऽम्भसि ।
मुद्गाना मुत्तमो यूषोदीपन: शीतलो लघु: ॥१७॥
व्रणोर्द्ध जन्तु रुग्दाह कफ पित्त ज्वरास्त्र जित् । [मुद्गयूष:]

दाडि मामलकै र्यूष:पित्त वातहरो लघु: ॥ १८ ॥

[दाडिमाममलक यूष: ]

मुद्गामलकै र्यूषस्तु भेदन: कफपित्तजित् ।
तृड्दाह शमन: शीतोमूर्छाभ्रममदापह: ॥१९॥ [मुद्गामलकयूष:]

कुलत्थयूषो गुल्मार्श कफ वाताश्मशर्करा ।
हनी प्रहनीमेदांसिमेहनं त्वग्नि हत्सर: ॥ २० ॥ [कुलत्थयूष:]

सूप्यमूलकजो यूषोगलग्रह कफ ज्वरान् ।
हन्ति श्वास प्रतिश्यायकासमेदो रुचि क्रमीन् ॥ २१ ॥

[इति सूप्यमूलक यूष:]

चणकै र्विहितो यूषो ऽनुष्णस्तुवरको लघु: ।
रक्तपित्त प्रतिश्याय कासपित्त कफा पह: ॥२२॥ [चणकयूष:]

मकुष्ठ यूष: संग्राही पित्तश्लेष्म ज्वरापह: ।
लघु: सन्तर्पण:पथ्योहृद्य: पीन सकास जित् ॥२३॥ [मकुष्ठयूष ]

यूष: कृताख्योऽ लवणा स्नेह कट्वादि साधित: ।
अकृतस्तैर्विनासिद्ध: क्रमादुगुरु लघूच तौ ॥ २४॥ [कृता कृतयूष:

यूषा गोरस धान्याम्लफलाम्लादिभिरन्विता: ।
यथोत्तरं गुरुतरा वातघ्ना रुचिकारिण: ॥ २५ ॥ (यूषकथन)
यैरन्नैरौषधैर्यश्च कृता मण्डादयो बुधै: ।
विचार्य तद्गुणानेतांस्तद्गुणानेव निर्दिशेत् ॥२६॥ (यूष)
सूपन्तु सूपकोभ्रष्टै: सिद्धिजैर्निस्तुषै: कृता । (दालिनाम)
सूप विष्टम्भिरूक्षं स्यात् निरम्लन्तु विशेषत: ।
निस्तुषं भ्रष्ट सिद्धं तल्लाघवं सुतरां व्रजेत् । २७ ॥ (सूप)
क्वचित्स माषै: काप्येवं कृशरातिल तण्डुलै: ।
कृशरा बलकृत् ग्राह्या सिद्धातण्डुलवैदलै: ॥ २८ ॥
कृशरा शुक्रला बल्यागुरु: पित्त कफ प्रदा ।
दुर्जरा पुष्टिविष्टम्भमल हृद्वातनाशिनी ॥ २९ ॥ यारम्भि )
चिप्रापि तद्गुणा सैवा सुधान्य गुणकारिणी । (खिचडी)
क्षीरेच परमान्नं स्यात् पायसं क्षीरतण्डुलै: ॥३०॥
क्षीरेयीदुर्जरा बल्या धातु पुष्टि प्रदा गुरु: ।
विष्टम्भिनी हरेत्पित्त रक्ताग्ण्याग्निमारुतान् ॥ ३१ ॥ (क्षीर)
गुडादि पक्वं कथितं आमम्राम्र फलं पुन: ।
स्नेहैलानागरैर्युक्त: ज्ञातव्योराज खाण्डव: ॥ ३२ ॥
सितारुचक सिन्धूत्थै: स वृक्षाम्लपरूषकै: ।
निम्बूफल रसैर्युक्तोरागोराजिकया कृत: ॥ ३३ ॥
खाण्डवा मधुराम्लादि रससंयोग संभवा: ।
दीपना बृंहणा रुच्यास्तीक्ष्णाहृद्या: श्रमापहा: ॥३४॥(खाण्डव:)
आम्रा मलकलेहाद्या हृद्या वृद्धि बल प्रदा: ।
तर्पणा रोचना:स्निग्धा मधुरा गुरवस्तथा ॥ ३५ ॥
( खण्डाम्र खण्डामलक: )

सपितं दधिसघ्राज्य नरिचैलादिसंस्कृतं।
मथितं कान्तमानिन्याकर्पूर परिवासितम् ॥ ३६ ॥
रसालाशिखरा पक्का मार्ज्जिका माञ्जिकाबुधैः।
रसाला शुक्रला वल्या रोचनो वात पित्त जित् ॥ ३७ ॥
स्निग्धा गुरुः प्रतिश्यायं विशेषेण विनाशयेत्। [शिखरिणी।]
द्राक्षा म्लिका परूषादि जलं खण्डादि मिश्रितम्।
मरिचार्द्रक कर्पूरचातुर्जातादि संस्कृतम् ॥ ३८ ॥
पानकं द्विविधन्तस्मादम्लानम्ल विभेदतः।
द्राक्षाखर्ज्जूर काश्मर्य्य समधूकपरूषकैः ॥ ३९ ॥
पञ्चसाराभिधं पानं चन्द्र सूर्य्याधि वासितम्।
पानकं मूत्रलं हृद्यं प्रीणनन्तु श्रमापहम् ॥ ४० ॥
यथा द्रव्यगुणान्तत्तु गुरु लघ्वादि निर्द्दिशेत्।
पञ्चसाराभिधं पित्तदाहतृषादाह श्रमापहम्॥ ४१ ॥
मृद्वीकं श्रमदाहाश्र पित्त क्लमतृषापहम्।
रूचाणां कोमलं हृद्यं पाचनञ्च बलप्रदम् ॥ ४२ ॥
अम्लिकायाः रसस्तृषाक्लमिदाह श्रमापहम्। (पाना)
निःस्नेहं दधिनिर्मथ्य पचेत् शर्करयान्वितम्।
सव्योष दाडिमाजाजि सट्कोऽय मुदाहृतः ॥ ४३ ॥
सट्को रोचनः स्वर्य्यः पित्तानिलहरो गुरुः।
दीपनस्तर्पणो बल्यः श्रम क्लम तृषापहः ।४४॥ [सट्कगुणाः]
[अथ मिष्टान्न] कुकूलकर्पट भ्राष्ट्रकं ङ्गारविपाचितम्।
मण्डकाद्या यथापूर्वं गुरवो वृंहणा मताः ॥ ४५ ॥
मण्डकः सूचितः सूक्ष्मः कर्पूरादिषु पाचितः।
सएव किञ्चिच्छूलस्तु बुधैः पूपलिकामता ॥ ४६ ॥

अङ्गार कर्कटी सैव विज्ञेयाङ्गारपाचितः ।
अत्युष्णोमण्डकः पथ्यः शीतः स गुरुरुच्यते ॥ ४७ ॥
अङ्गारमण्डको ग्राही लघुर्दोषत्रयापहः ।
पोलिका कफकृद्बल्या पित्तला वातनुद्गुरुः ॥ ४८ ॥
अङ्गार कर्कटी बल्या वृंहणी शुक्रला लघुः ।
दीपनी कफहृद्रोग पीनस श्वासवातजित् ॥४९॥ [पोली]
शालिपिष्ट कृता भक्ष्या नातिबल्या विदाहिनः ।
अवृष्या गुरवः श्लेष्म कफपित्तप्रकोपणाः॥५०॥[शालिभक्षण]
गोधूम विहिता भक्ष्या बल्याः पित्तानिलापहाः ।
वैदला वातला भक्ष्या गुरवस्तुवरा हिमाः॥५१॥[गोधूमभक्ष्यका]
माषपिष्टकृता भक्ष्या बल्याः पित्तकफप्रदाः। [माषभक्ष्याः]
विचार्य्यान्नगुणान् भक्ष्या नन्यानपि विनिर्दिशेत् ।
गौड़िका गुरवो भक्ष्या वातघ्नाः कफशुक्रलाः॥५२॥[गुड़युक्तभक्ष्याः]
घृतपाचित भक्ष्यास्तु बल्याः पित्त कफापहाः।[घृतपक्वभक्ष्या]
तैलजा दृक्समीरघ्नास्तूष्णापित्तास्र दूषणाः॥५३॥(तैलपक्व)
दुग्धलोड़ित गोधूम शालिपिष्टादि निर्म्मिता ।
वातपित्तहरा भक्ष्या हृद्या शुक्र बलप्रदा ॥५४॥(दुग्धभक्ष्य)
विचार्य्यान्नगुणान् भक्ष्या नन्यानपि विनिर्दिशेत् ।
क्षीरेण मर्द्दितं चूर्णं गोधूमानां सुगालितम्॥ ५५ ॥
विस्तार्य्य सर्पिषा युक्ता ततः श्वेतविमिश्रितम् ।
घृतपूरोऽयमुद्दिष्टः कर्पूर मरिचान्वितः ॥ ५६ ॥
समिता मर्द्दिता क्षीर नारिकेलसितादिभिः ।
अवगाह्य घृते पक्वे घृतपूरोऽपरः स्मृतः ॥ ५७ ॥
घृतपूरो गुरुर्वृष्यो हृद्यः पित्तानिलापहः ।

सद्यः प्राणप्रदो बल्यः चतजित् बृंहणः परः ॥५७॥(घेवर)
समितां सर्पिषा भृष्टां खण्डतां मरिचमिश्रिताम्।
एला लवङ्ग कर्पूर चूर्णादि परिसंस्कृताम् ॥ ५८ ॥
चिप्त्वान्य समिताजन्म पुटेषु सुघृते पचेत्।
ततः खण्डेन्यसेत्पक्कं संयावोऽयमुदाहृतः ॥ ६० ॥
समिता मधुदुग्धेन मर्दयित्वा सुशोभनम् ।
पचेद्घृतोत्तरे खण्डेन्यसेत्पक्कं नवे घटे ॥ ६१ ॥
ततो मरिचचूर्णैला खण्डचूर्णावचूर्णितम् ।
कुर्य्यात्कर्पूरसंयुक्तं संयावममृतोपमम् ॥६२॥ (गूझा संयाव)
मर्द्दयित्वा तु समितामपूपास्तनवः कृताः ।
पक्का घृतेऽग्निना पाके मण्डिता मधुशीर्षिका ॥ ६३ ॥
घृतेन मर्द्दितान्तोयैः समितां मृदुमर्द्दयेत् ।
मातुलुङ्गत्वचा खण्ड पक्कं सार्द्रकर्पूरितम् ॥ ६४ ॥
विधाया पूपकं हृद्यं गन्धाढ्यं केशरान्वितम् ।
पक्का सर्पिषि खण्डे च मलितो मधुशीर्षकः॥६५॥(खाभा)
समितां गुड़तोयेन मेलयित्वा सुगालितम् ।
घृते विस्तार्य्य विपचेत्सुवृत्तान् मृदुपूपकान् ॥६६॥ (पुआ)
शालिपिष्टं युतं दध्ना मर्द्दयित्वा घृते पचेत् ।
वेष्टयेत् पक्वखण्डेन सुवृत्तान् दधिपूपकान्॥६७॥(दधिवड़ी)
संयावा मधुशीर्षाद्याः पूपका दधिसम्भवाः ।
गुरवो बृंहणा हृद्या वृष्याः पित्तानिलापहाः ॥ ६८॥
एते संस्कारभेदेन विविधास्तेऽपि तद्गुणाः ।
दधि चीर समेपक्वा त्वर्द्धभागावशेषिते ॥ ६९ ॥
आपचेद्रक्तशालीनां तण्डुलान् तिलसंयुतान् ।

प्रियाल पनसादिभ्यां वीजमुष्टिः समापचेत् ॥ ७० ॥
क्षीरतुल्यं घृतञ्चैव शर्कराचैव तत्समा ।
सिद्धस्त्रिकटुकोपेतः कर्पूरेणाधिवासितः ॥ ७१ ॥
एष विस्यन्दनो नाम देवलोकेऽपि दुर्लभः ।
यस्मात्पक्केऽपि हि घृतं स्यन्दते सर्वतो मुखम् ॥ ७२ ॥
तस्मात् सूपविधानज्ञै र्विस्यन्दो विधिवत् स्मृतः ।
विस्यन्दो वृंहणो हृद्यः पित्तानिलहरो गुरुः ॥ ७३ ॥
[ विस्यन्दपाटूदा इति लोके । ]
समितां भर्जयेत्तप्ते घृते श्वेतान्ततो न्यसेत् ।
वारिमज्जादि संयुक्तां पयसा योजयेत्तदा ॥ ७४ ॥
एवैलादियुता तज्ज्ञैर्लप्सिका ललिता मता ।
लप्सिका वृंहणी हृष्या वातपित्तहरा गुरुः ॥ ७५ ॥ (लप्सी)
फेनिका पुटिनी शुभ्रा वातपित्तहरा लघुः ।
लक्षणं फेनिकादीनां सूपशास्त्राद्विचारयेत् ॥ ७६ ॥ [ फेनी ]
मोदका लड्डुकाः प्रोक्तास्ते चानेकविधा मताः ।
तस्मामत्र त्व प्राप्तानां मसेन्नोधमगालिताम् ॥ ७७ ॥ [ कुण्डल ]
दधि क्षीरं सुष्टिजुष्टं समिता माषपिष्टकः ।
सूरणार्द्रक कूष्माण्ड शालूकामिषमत्स्यकाः ॥ ७८ ॥
इत्यादिभिर्बहुविधा कल्पास्ते सूपशास्त्रतः ।
द्रव्यं विचार्य्य मतिमान् तद्गुणानपि निर्दिशेत् ॥ ७९ ॥
मोदका दुर्ज्जरा हृष्या बल्याः पित्तानिलापहाः । [ लड्डू ]
माषमुद्गादि पिष्टोत्था कटुका वटिकादयः ।
तत्कारणगुणान् ज्ञात्वा तद्गुणानपि निर्दिशेत् ॥ ८० ॥
माषाणां वटको हृद्यो बल्यो वातहरो गुरुः ।

विष्टम्भी घोल वटको विदाही पवनापहः ॥ ८१ ॥ [वड़ा]
शाण्डको वटको दृष्टिनाशनो दोषलो गुरुः । [काञ्जीवड़ानाम]
तुषाम्बु वटको रुच्यः पित्तलः कफवातजित् ॥ ८२ ॥
दुण्डली शुक्रला रूक्षा विष्टम्भी कफवातकृत् ॥ ८३ ॥ [दुण्डरी]
सोमालिका गुरु र्वृष्या रोचनी पित्तनाशिनी । [सुहारी]
द्विप्रस्थां शुद्धसमितां प्रस्थं गोधूमगालितम् ॥ ८४ ॥
विमर्द्य पयसा स्थाप्यं व्रजे द्यावत्तदम्लताम् ।
सच्छिद्रे नारिकेलस्य पात्रे निश्चिप्य निर्म्मले ॥ ८५ ॥
परिभ्राम्य घृते तप्ते मन्दाग्नौतु विपाचयेत् ।
कर्पूरवासिते पक्वे विज्ञेया नृपवल्लभा ॥ ८६ ॥
सुपक्वं कङ्कणाकारां सितालेहे विनिश्चिपेत् ।
सा तु कुण्डलिका नाम्ना पुष्टिकान्ति बलप्रदा ।
धातुवृद्धिकरा वृष्या हृद्या चेन्द्रिय तर्पणी ॥ ८७ ॥

कुण्डलिका जलेवीति लोके ।

तस्यामम्लत्वमाप्नायां न्यसेद्गोधूमगालितां । [कुण्डिलिका]
गोधूमाद्यास्तु कुल्माषा अर्द्ध स्विन्ना मताः क्वचित् ।
कुल्माषा गुरवो रूक्षा वातला भिन्नवर्चसः ॥ ८८ ॥ [घूघुरी]
नवीन निस्तुषीदृभ्रष्टा यवचूर्णश्च शक्तवः ॥ ८९ ॥ [सक्तु]
शक्तवस्तु घृता भ्यक्ताः शीतवारि विलोडिताः ।
नाति द्रवो नाति सान्द्रो मन्थः सद्भिः प्रकीर्त्तितः ॥ ९० ॥
मन्थो बलकरः सद्यः परिणामे बलावहः ।
मोह तृष्णात्यय छर्द्दि कुष्ठदाह श्रमान् जयेत् ॥ ९१ ॥
द्राक्षा सितेक्षु स्वरसैर्मिश्रा पित्तास्त्र दाहजित् ।
द्राक्षा मधुयुता बल्याः कफश्रममदापहाः ॥ ९२ ॥

वर्गत्रय समायुक्तो दोषवर्चोऽनुलोमतः । [ मन्थ ]
शक्तवो यवजाः शीता दीपना लघवः सराः ।
कफ पित्तहरा रूक्षा लेखनाः पानतस्तु ते ॥ ६३ ॥
सद्यो बलप्रदा पथ्या घर्मादि क्लान्तदेहिनः ।
निस्तुषैर्भर्जितैः पिष्टैश्चणकैः सयवैः कृताः ॥ ९४ ॥
शक्तवः शर्करा सर्पिर्युक्ता ग्रीष्मेऽति पूजिताः ।
पिण्डी प्रोक्ता गुरुस्तेषां द्रवत्वाल्लेहिका लघुः ॥ ९५ ॥
न भुक्त्वा नरदो खित्वा न निशायां न वा बहून् ।
न जलान्तरितान्नद्यि शक्तू नद्यान्न केवलान् ॥९६॥ [ शक्तू ]
भ्रष्टशाल्यादिजा लाजाधान्य भ्रष्टयवोद्भवाः ।
लाजा लघुतराः शीता बल्याः पित्त कफच्छिदः ॥ ९७ ॥
छर्द्यतीसार दाहास्र मेह मेद तृषापहाः । [ यवोद्भवा ]
धान्या विष्टम्भिनी रूक्षा कफ मेदोहरा गुरुः । [धाणा]
पक्वार्द्रा व्रीहयः सम्यक् पीड़िताः पृथुका मताः ॥ ९८ ॥
पृथुका गुरवो बल्याः श्लेष्मला वातनाशनाः । [ चूड़ा ]
शिवधान्यैरर्द्धपक्वैः सुभ्रष्टैर्होलकोमतः ॥ ९९ ॥
होलकोऽल्पानिलो मेदः कफदो पक्वभावतः । [ होल ]
अपक्व भ्रष्टैर्गोधूमै रुलच्चोलस्वलम्बिका ।
लम्बी कफप्रदा बल्या लघु पित्तानिलापहा ॥१००॥ [कुरी]
हिङ्गुपक्वे घृते दत्वा मांसमालोड्य भर्जितम् ।
मात्रयोष्णाम्बु निक्षिप्य पचेत्तस्यग्विचक्षणः ॥ १०१ ॥
मरिचार्द्रकसंयुक्तं सुगन्धिद्रव्यवासितम् ।
गतद्रव्यं सुधातुल्यं परिशुष्कन्तदुच्यते ॥१०२॥ [जले मांसम्]
घनद्रव्योपलिप्तन्तत् प्रदिग्धमिति कीर्त्यते ।

प्रदिग्धं वातजित् बल्यं गुरु शुक्र विवर्द्धनम् । [प्रलिग्ध]
रसेनयुक्तं सरसंशूल्यं शूलेन संस्कृतम् ॥ १०३ ॥
परिशुष्कं स्थितं स्निग्धं रोचनं तर्पणं गुरु ।
बलमेधाग्नि मांसौजः शुक्रवृद्धिकरं परम् ।
तदेवोल्लिप्तपिष्टत्वा दुल्लिप्तं परिकीर्त्यते॥१०४॥[पिष्टभ्रष्टमांसम्]
उल्लिप्तं गुरु पथ्यं तत् परिशुष्कसमं गुणैः ।
प्रदिग्धं वातजिद्‌बल्यं गुरु शुक्र विवर्द्धनम् ॥ १०५ ॥
सरसं तद्गुणं ज्ञेयं विशेषाल्लघु दीपनम् ।
प्रोतं शूलेन पिसितं सौरभाद्यम्बुना बङ्क ॥ १०६ ॥
लिप्तं विधूमैरङ्गारैः पाचितं शूल्यमुच्यते ।
शूल्यं सर्व्वोत्तमं मांसं लघु पथ्योत्तमं मतम् ॥१०७॥ [शूलपक्व]
अङ्गारादिषु यत्पक्वं प्रतप्तं तदुदाहृतम्।(अङ्गार प्रतप्तम्)
मांसं दाड़िम सिन्धूत्थं सौरभादि समन्वितम् ॥ १०८ ॥
पिष्ट्वा पूपादिसङ्कल्पा पक्वं पिष्टमिति स्मृतम्।(पिष्टमांसपूपादि)
भर्जितं स्यात् घृतादौ तु भ्रष्टा यत्साधितं पुनः ॥ १०९॥
(घृतादि साधितम् ।)
मांसं सौरभसंलिप्तं तन्दुपक्वं मधुप्रभम् । ( तन्दूरपक्वम्)
प्रदिग्धं सरसं पक्वं भर्जितं मृदुपाचितम्॥ ११० ॥
प्रतप्तं परिशुष्कञ्च शूल्यं यच्चान्यदीदृशम् ।
मांसं तैले न सिद्धन्तद्वीर्य्योष्णं गुरु पित्तलम्॥१११॥(तैलपक्वमांसम)
घृतपक्वं तदेव स्यात् लघु रुच्यमपित्तलम् ।
अत्युष्णं वीर्य्यं बलदं हृद्यं दृष्टि प्रसादनम् ॥११२॥ (घृतपक्वम्)
गोरस सेेेच धान्याम्ल फलाम्ल कटुकादिभिः ।
सिद्धं मांसं भवेद्‌बल्यं रोचनं दीपनं गुरु ॥११३॥ (तक्रादिपक्व)

मांसमतिरसं रूक्षं विलसं वातलं गुरु। (बद्धखिन्नमांसम्)
गतास्थि मांसं सुस्विन्नं पुनर्दृषदि पेषयेत् ॥ ११४ ॥
व्योषादि संस्कृतं कृत्वा पचेद्गुड़ यो घृतान्वितम्।
वेसवारोऽयमुद्दिष्टो बल्यो वातहरो गुरुः ॥११५॥ (वेसवार)
खिन्नमुद्गादि कल्कोऽपि वेसवारोऽपरः स्मृतः।
हरिद्रा व्योष सिन्धूत्थ हिङ्गुधान्यक दाड़िमैः ॥ ११६ ॥
सजाजिभि र्वेसवारः सौरभोऽयमुदाहृतः। ( सौरभ )
मुद्गादि वेसवारस्तु यथा द्रव्यगुणान् वदेत्।
पिष्टमांस समुद्भूतः स्मृतो मांस रसो रसः ॥ ११७ ॥
सौरवः सौरसः स्यात्तु यो रसो लवणान्वितः। (सौरव)
संयुक्तो वेसवारेण रसः खानिष्कमुच्यते ॥११८॥ (खानिष्क)
रसो हृद्यः श्रमश्वास वातपित्त क्षयापहः।
प्रीणनो व्रणयुक्तानां क्षीणानामल्परेतसाम् ॥ ११९ ॥
विश्लिष्ट भग्नसन्धीनां शुद्धाना शुद्धकाङ्क्षिणाम्।
शस्यते स्वरहीनानां दृष्ट्यायुः श्रवणार्थिनाम् ॥१२०॥ (मांसरस)
सदाड़िमादि बलदो दोषघ्नस्तु कृतस्तु सः ॥ १२१ ॥

दाड़िमयुक्त मांसरस गुणाः।

सौवीरः प्रीणनः शीतो मुखशोष श्रमापहः।
दीपनः क्लमवातघ्नः सर्वधातु विवर्द्धनः।
खानिष्कस्तु गुरुः पथ्यो दीप्ताग्नीनां विशेषतः ॥ १२२ ॥
अल्पमांसादि संयुक्तो लवणाम्बु विपाचितः।
दकलाचणिका ज्ञेया रसाद्या लघवो मता।
तक्रादि क्वाथसम्भूता कथिता कथिता बुधैः ॥ १२३ ॥
कथिता पाचनी हृद्या रुच्या वह्निप्रदा लघुः।

कफानिल विबन्धघ्नी किञ्चित्पित्तप्रकोपनी ॥ १२४ ॥ (कटी)
शाकं तक्रादिभिः सम्यक् साधितं क्वथितं मतम् ।
क्वथितं दीपनं रुच्यं वातश्लेष्म श्रमापहम् ॥ १२५ ॥
त्यक्त्वा स्वहेतु शाकस्य गुणानेतद्गुणं भवेत् । (क्वायिली)
पर्प्पटा लघवो रुच्या लघीयान् चारपर्प्पटः ॥ १२६ ॥ (पापड़)
पिण्याकस्तिलकिट्टः स्यात् पललं तिलपिष्टकम् ।
पिण्याको लघवो रूक्षो विष्टम्भी दृष्टिदूषणः ॥१२७॥(खरी)
पललं हंहणं स्निग्धं कफपित्तकरं गुरु । ( लोधि )
द्रव्यकाल क्रियायोग देहादीनि विचार्य्य तु ॥ १२८ ॥
अन्येषामप्यनुक्तानां एषामपि गुणान् वदेत् ।
यो राज्ञा मित्यादि धान्यनामोऽवतसमः कृतान्नवर्गः ॥१२९॥

Indira Gandhi National Centre for the Arts

---

मुखेन्दु पद्म प्रतिबोधलुब्धं विधुन्तुदालिभ्रममादधानम् ।
लक्ष्मीकपोल प्रतिबिम्बिताङ्गं नीलाब्जनीलं कलयामि तेजः ॥
हस्तीमतङ्गजोदन्ती मातङ्गोऽनेकपः करी ।
सिन्धूरः कुञ्जरः पद्मीवारणोद्विरदोद्विपः ॥ १ ॥
इभो दन्तावलोनागः कुम्भिस्तम्बेरमो गजः ।
हस्तिनी धेनुका प्रोक्ताकरेणुः करिणी च सा ॥ २ ॥
हस्ती कफा निलौ हन्यादुष्ण पित्ता स्त्रकोपनः । ( हस्ती )
घोटकः सैन्धवो वाजीतुरङ्ग स्तुरगो हयः ।
तुरङ्गमोऽश्वोगन्धर्व्वोवाहः सप्ति यजुर्जवी ॥ ३ ॥
घोटिका वड़वा वामी प्रसूताश्वाच वाजिनी ।
घोटकः कटुकः पाके दीपनः कफ पित्त हृत् ॥ ४ ॥

वात हृद् बृंहणो बल्यश्चक्षुष्यो मधुरो लघुः ॥ ५ ॥ ( घोड़ा )

तज्जोघोश्वामश्वतरो शीघ्र वेगोऽङ्ग पूजितः ।

बल्य माश्वतरं मांसं बृंहणं कफ पित्तलम् ॥ ६ ॥ ( खच्चर )

उष्ट्रः क्रमेलको वक्रग्रीवः शाखाशनोमयः ।

महाङ्गः करभोदीर्घ जङ्घोधूम्रोमरुत्प्रियः ॥ ७ ॥

उष्ट्र मांसं लघु स्वादु चक्षुष्यमनिला पहम् ।

उष्ट्र मांसं प्रशमनं मेदपित्त कफ प्रदम् ॥ ८ ॥ ( ऊंट )

गर्द्दभोरासभोभार वाहीदूरगमः खरः ।

गार्द्दभं पित्तलं बल्यं बृंहणं कफ पित्त कृत् ॥ ९ ॥

कटु पाके लघु श्रेष्ठं तस्मादन्य खरोद्भवम् ॥ ( गर्दभ )

महिषः सौरभः श्रृङ्गी वाह वैरीघनाशनः ।

कांसरी गवलोदंशीलुलायः काल वाहनः ॥ १० ॥

माहिषं मधुरं मांसं स्निग्धोष्णं वात नाशनम् ।

निद्रा रेतोबलस्तन्य तनु दार्ढ्यकरङ्गुरु ॥ ११ ॥

तद्ददारण्यजं विद्या द्विशेषाच्छोषिणे हितम् । ( माहिष )

ऋच्छोऽच्छभल्लोभाल्लूकः खड्गीखङ्गश्च गण्डकः ।

ऋक्षः स्निग्धोगुरु र्वृष्य स्वादूष्णः पवना पहः ॥ १२ ॥ ( भालू )

गण्डको बहुविण्मूत्र पवित्रोऽनिलनाशनः । ( गैण्डा )

सिंहः पञ्चाननो हर्य्यक्षोमृगेन्द्रः केसरी हरी ॥ १३ ॥

शार्दूलः स्यात्पञ्च नखो मृगनाथः सकृत्प्रजः ।

सिंह शार्दूलयोर्मांस मुष्णं वाताक्षिरोगजित् ॥ १४ ॥ सिंहशार्दूल

व्याघ्रो मृगारिर्व्वगद्धा व्यालोभीम पराक्रमः । ( व्याघ्र )

चित्रकोवेगवांश्चित्रीद्वीपी स्याद्दीर्घदंष्ट्रकः ॥ १५ ॥ ( चित्ता )

वृकदेह वृकः कोकस्तरक्षुस्तु मृगादनः । ( वृक )

कुक्कुरः शुनकः श्वा स्यात्कौलेयः सुनकः शुनः ।
सारमेयः श्वतश्चश्च भषणो श्वगदंशकः ॥१६॥ ( कुत्ता )
व्याघ्र चित्र तरक्षुश्च वृकाणां पललञ्च ।
उष्णं वातहरं स्वर्यं हितमक्षिविकारिणाम् ॥ १७ ॥
सूकरो रोमशः पोत्रीकोलः घोणिः किरिः किटिः ।
दंष्ट्रीक्रोष्टस्तूर्द्धरोमा भूदारश्च वराहकः ॥ १८ ॥
सौकरं पिशितं स्वादु वल्यं वातापहं गुरु ।
स्निग्धोष्णं शुक्रलं रुच्यं निद्रास्थूल त्वदाद्र्यं कृत् ॥१९॥(सूकर )
छागीगलस्तनी मण्डा सर्वभक्ष्यात्वजा भजा ।
वर्कारिः छागलः छागोवस्तेयः कालकंः पशुः ॥२० ॥
छागमांसं गुरु स्निग्धं लघु पक्वन्त्रिदोष जित् ।
अदाहि हंहणं नाति शीतं पीनसनाशनम् ॥ २१ ।
देहधातु समानत्व दनभिस्यन्दि बृंहणम् । ( वकरेनाम)
मेषोभेडोडडोमेढ्रुउरभ्र उरणोविकः ।
ऊर्णा युरडकोवृष्णिमेंदः पुच्छस्तु डुम्बुकः ॥ २२ ॥
मेषमांसं गुरु स्निग्धं वल्यं पित्त कफ प्रदम् । ( मेढा )
मेदः पुच्छामिषं वृष्यं कफ पित्त करं गुरु ॥२३॥ ( मेढपुच्छभेद )
हरिणस्ताम्र वर्णः स्यात् कुरङ्ग श्चारुलोचनः ।
सारङ्गो जिनयोनिश्च वातायुश्चपलो मृगः ॥ २४ ॥
एणः कृष्णोऽपरः कृष्ण कुरङ्गः कृष्णसारकः ।
एणमांसं हिमं रूच्यं ग्राहि दोषत्रयापहम् ॥ २५ ॥
षड्रसं वलदं पथ्यं लघु हृद्यं ज्वरास्त्रजित् । ( हरिण )
गोकर्णाविकटः शृङ्गीविद्धश्चोऽन्यस्तुशं वरः ॥ २६ ॥
गोकर्णेयं वरौ शीतौ गुरुस्निग्धौ कफ प्रदौ ॥ २७ ॥

रसे पाकेच मधुरी रक्तपित्त विनाशनी ॥२८॥ (गोकर्णशाम्बर)

रूढोनीलाण्डको नीलो गवयश्चाल्पदर्शन: ।

गवयो मधुरो वृष्य: स्निग्धोष्ण: कफ पित्तल: ॥२९॥ ( रोझस्य )

कस्तूरी हरिणी गन्धी मुण्डनी मृगमातृका ।

कस्तूरी हरिण: स्वादुर्वह्नविट् दीपनो लघु: ॥ ३० ॥

मुण्डनी ज्वरकासास्त्रक्षय श्वासापहा हिमा: ।

(कस्तूरी मृग मुण्डायणी)

शतमालो वर्ण चर: पृषतो विन्दुचित्रक: ।

वात प्रमीवात मृग: छिक्कार: श्वेत पुच्छक: । ३१ ॥

शतमालादिजं मांसं मधुरं ग्राहि दीपनम् ।

हृद्यं शीतं लघु श्वास ज्वरदोषत्रयास्त्रजित् ॥ ३२ ॥

( चित्तलाचे शशाछिक्कारो )

रुरु: शरम्बुत्त मृगो न्यङ्कुर्वङ्कविषाणक: ।

रुरोर्मांसं गुरु स्वादु वृष्यं पित्तानिला पहम् ।

न्यङ्कु: स्वादुर्लघुर्बल्यो हृष्यो दोषत्रयापह: ॥३३॥ (हरिण भेद)

शश: स्थूली रोमकर्णो लम्बकर्णोविलेशय: ।

शश: शीतो लघु स्वादुर्ग्राहीपथ्योऽग्नि दीपन: ।

सन्निपात ज्वरश्वास रक्त पित्त कफा पह: ॥३४॥ ( शशनाम )

काश्मीरदेशे सरसोऽष्टपात्स्यात्

उत्साह युक्तं चतुरूर्द्ध पाद: ।

उष्ट्र प्रमाण: समहा विषाण:

ख्यातोवनस्थ:सम्रगो महाख्य: ॥ ३५ ॥

शल्लक: शल्ली श्वाविड्रमेधाश्वात्सूचिनी खरा ।

शल्लक: श्वासकासास्त्रशोफदोषत्रयापह: ॥ ३६ ॥

मेधा तथैव विज्ञेया विशेषाद्‌बल वर्द्धिनी। ( शल्लकः )

विडालस्तु मार्ज्जारो विषदंशक आखुभुक्।

नकुलः पिङ्गलो वभ्रुः सर्पारिः सर्वभक्षकः॥ ३७॥

मार्जारो मधुरः स्निग्धोवीर्योष्णः कफ वातजित्।

क्षयतांश्वासकासघ्नो नकुलोऽपि समोगुणैः ॥३८॥ (बिल्ली नकुल )

वानरोमर्कटः कीशो वनौकाश्च बली मुखः।

हरिः शाखामृगः शाखीप्लवङ्गः प्लवगः कपिः॥ ३९॥

वानरो पवनश्वास भेदः पाण्डुक्रमीन् जयेत्। ( वानरः )

शृगालो जम्बुकः फेरुर्गोमायुः फेरवः शिवः ॥४०॥

शिवेशो वञ्चकः क्रोष्टुः लेपालः स्वल्पजम्बुकः।

शृगालो वलदो हृष्यः सर्ववातक्षयापहः ॥४१॥ [शृगालः]

मूषकः खनकस्तेयी वृष चन्दुरुराखुकः।

मूषको बहुविण्मूत्रो बल्यो वृष्योऽनिलापहः। [मूषा]

इति चतुष्पदः।

पक्षीविहङ्गमः पत्रीशकुन्तीर्विहगः खगः॥ ४२॥

अण्डजो विः पतत्रथः पतत्री शकुनिर्द्विजः। [पक्षीनाम]

तित्तिरश्चित्रपक्षः स्यात् कृष्णो गौरः कपिञ्जलः।

तित्तिरिर्वर्णदोग्राही हिक्कादोषत्रयापहः ॥४ ॥

श्वासकास हरः पथ्य स्तस्माद्गौरोऽधिकोगुणैः। [तित्तिर]

वर्त्तीरो वर्त्तिकाश्चैव स्ततोऽल्पवर्त्तिकामता।

वर्त्तीरोऽग्निकरः शीतो ज्वरदोषत्रयापहः॥ ४४॥ [वटेर]

लावश्चैव स्वितनुः स चतुर्द्धा मतो बुधैः।

पांशुलो गैरिकोऽन्यस्तु पौण्ड्रकोदर्भरस्तथा ॥४५॥

लावा हृद्या हिमाः स्निग्धा ग्राहिणो वह्निदीपनाः।

पांशुलः श्लेष्मलस्तेषां वीर्य्योष्णोऽनिलनाशनः ॥४६॥
गैरिकः कफवातघ्नो रूचोवह्निप्रदः परम् ।
पौण्ड्रकः पित्तकृत् किञ्चित् लघु श्लेष्मानिलापहः ॥
दर्भरी रक्तपित्तघ्नो हृदामयहरो हिमः ॥४७॥ (लावा)
चटुकः कलविङ्कः स्यादन्यो ग्राम्यस्तु पुण्ड्रकः ।
चटकः शीतलः स्निग्धः स्वादु शुक्रकफप्रदः ॥४८॥
सन्निपातहरोवेश्म चटकः शुक्रलः परम् । (गरगैया)
वार्त्तिकी मधुरः शीतः सरूचः कफपित्तनुत् ॥४९॥ (वटेर)
पारावतः कलरवो मञ्जुघोषोमदोत्कटः ।
कपोता घुघुकस्तार्क्षुरन्यः काण्डकपोतकः ॥५०॥
पारावतो गुरुः स्निग्धो रक्तपित्तानिलापहः ।
सङ्ग्राही शुक्रलः शीतः कपोतोऽपि समोगुणैः ॥५१॥
किञ्चित् लघुः परंकामः कपोतः सर्वदोषकृत् ।

(इति पारावतप्रभृतयः)

मयूरश्चन्द्रकी केकी मेघरावो भुजङ्गभुक् ॥५२॥
शिखीशिखावलोवर्ही शिखण्डी नीलकण्ठकः ।
शुक्लापाङ्गः कलापीच मेघनादो तुलाश्यपि ॥५३॥
मयूरो बृंहणः श्रोत्र शिरोरुग्वातशोषजित् ।
उष्णो वलायुर्मेधाग्नि केशदृक्स्वरवर्णदः ॥५४॥
सेव्यं मयूरजं मांसं हेमन्ते शिशिरे मधौ ।
न शरत्ग्रीष्मयोः पथ्यं वर्षास्वप्यहि भक्षणात् ॥५५॥ (मयूर)
कुक्कुटो विकिरः शौण्डी कालज्ञश्चरणायुधः ।
कृकवाकुस्ताम्रचूड़ः स्यादन्योऽरण्यकुक्कुटः ॥५६॥
कुक्कुटो बृंहणः स्निग्धो वीर्य्योष्णोऽनिलजिद्गुरुः ।

चक्षुष्य: शुक्रकफकृद्वन्यो रूक्ष: कषायक: ॥ ५७ ॥
पानीयकुक्कुट: स्निग्धो बृंहण: श्लेष्मलो गुरु: । [मुर्गा मुर्गाबी]
शुको रक्तमुख:कीरो वाग्मी सुन्दरदर्शन: ।
सारिका रसिता दूती सुमति: प्रियवादिनी ॥५८॥
शुक: शीतो लघुर्ग्राही क्षतकासक्षयापह: ।
रूक्षस्तद्वन्मता सारी स्निग्धाबुद्धि बलाग्निकृत् ॥५९॥[तोतासा०]
कोकिल: कलकण्ठ: स्यात् परपुष्टो वनप्रिय: ।
पिक: परभृताचारी ताम्राक्षो मधुदूतक: ॥६०॥
कोकिलो दीपनो ग्राही चक्षुष्य: क्षयकासजित् । [कोकिल]
काकोध्वांक्षो गूढकामी बलिपुष्ट: सकृत्प्रज: ।
वायसो बलिभुक्काण: करटश्चतुरो द्विज: ॥६१॥ [काक]
भासाशिखावाभ्रसतो गृध्राकारो रज: प्रज: । (भासनाम )
काकाभासभवं मांसं चक्षुष्यं दीपनं लघु ।
आयुष्यं बृंहणं बल्यं क्षतदोषक्षयापहम् ॥६२॥ (काकभासमांसं)
गृध्र: सुदृष्ट: शकुनी वक्रदृष्टिश्च दूरदृक् ।
गृध्रस्य काकवत् मांसं विशेषात् नेत्ररोगजित्॥६३॥(गृध्र)
हंसा:श्वेतगरुत्मान: सौकारक्तौपदाननौ ।
राजहंस: स्मृत: कृष्णै: धार्त्तराष्ट्रोऽथमालिक: ॥६४॥
मलिनै: कलहंसस्तु पीतै: कादम्ब उच्यते ।
कारण्डव: प्लवो मञ्जुवरटा हंसयोषित: ॥६५॥
हंस: स्निग्धो गुरुर्वृष्यो वीर्य्योष्ण: स्वरवर्णकृत् ।
वातास्त्रपित्तशमनो बृंहणो बलवह्निद: ॥६६॥ (हंसनाम)
सारसो लक्ष्मणो रक्तमूर्द्धा स्यात् पुष्कराह्वय: ।
चक्रवाक: पत्ररथ चक्रश्चक्रीसुकामुक: ॥६७।

रथाङ्गनामा कोकोऽथ कङ्कः स्याल्लोहपृष्ठकः । (चक्रवाक)

बको बकोटो धवलो बलाका विसकण्ठिका ॥६८॥ (बकनाम)

आडिः शरारिरातिश्च विचित्रा जलचारिणी । ( आडि )

चक्रकङ्कबकोटादि मांसं स्निग्धं हिमं गुरु ।

मधुरं सृष्टविण्मूत्रं वातपित्तास्रनाशनम् ॥६९॥ (चक्रवाकआदि

कारेडुकः कर्करेटुः करकः कङ्कणस्तथा ।

कङ्कणो बृंहणो बल्यो वातपित्तहरो लघुः ॥७०॥ (ककरः)

खञ्जरीटः खञ्जनकश्च खनामाकिकी द्विजः । ( कैलाखञ्जरी )

चातकस्तु घनरवः सारङ्गस्तोकको भ्रमाः ॥७१॥( पपीहा)

भरद्वाजः कक्कराटो व्याघ्राटो हि कुटिः परः ।

खञ्जरीटो भरद्वाजश्चाथ श्लेष्मानिलापहः ॥७२॥

वातकोऽनिलपित्तघ्नो भरद्वाजः कफास्रजित् ॥७३॥

( खञ्जरीटादिपपीहा मांसगुणाः )

श्येनः समादनः पत्री चिरश्चिल्लोचिरिल्लिका ।

श्येनचीरीभवं मांसं प्रायो दोषकरं गुरु ॥७४॥ (सीचाननाम)

उलूकः कौशिकः काकवैरी घूको निशाचरः ।

उलूकपललं भ्रान्ति कारं वातप्रकोपदम् ॥७५॥( उलूकः )

चकोरश्चन्द्रिकापायी जीवञ्जीवः सुलोचनः ।

चकोरो बृंहणो बल्यः स्निग्धोष्णो वातनाशनः॥७६॥चकोरनाम

क्रौञ्चकः पेचकोऽन्यस्तु पुच्छाधोभागलोहितः ।

बकोशः कुररोऽथान्यः कोयष्टिष्टिट्टिभस्तथा ॥ ७७ ॥

क्रौञ्चपित्तानिलहरः पेचकः कफवातजित् ।

कुररः क्रौञ्चवत् ज्ञेयः टिट्टिभोऽल्पमलत्करः ॥ ७८ ॥

मत्स्योभक्षस्तिमिर्मीनः कण्ठी वैसारिणोद्रवः ।

पृथुरोमाभिसारःस्यादिसारः शकुली तथा ॥ ७९ ॥
रक्तोदरोरक्तमुखो रोहितो मत्स्यपुङ्गवः ।
सहस्रदंष्ट्रः पाठीनः कृष्णवर्णो महाशिराः ॥८०॥
शफरः क्षुद्रमत्स्यः स्यात् प्रोष्टीतु शफरी स्मृता ।
नलमीनश्चिलिचिमस्तिमिः स्यात् समुद्रजः ॥८१॥
मत्स्या बलप्रदा हृष्या गुरवः कफपित्तलाः ।
उष्णाभिष्यन्दिनः स्निग्धा बृंहणाःपवनापहाः ॥ ८२ ॥
नादेया बृंहणा मत्स्या गुरवोऽनिलनाशनाः ।
कौप्या हृष्या कफाष्ठीला मूत्रकृष्छविबन्धदाः ॥८३॥
ताडागा गुरवो हृष्याः शीतला बलमूत्रदाः ।
तडागवन्निर्झरजा बलायु र्मतिहृद्बराः ॥ ८४ ॥
सरोजा मधुरा स्निग्धा बल्या वातनिवर्हणाः ।
सामुद्रा गुरवो नाति पित्तलाः पवनापहाः ॥८५॥
तत्रापि लवणाम्भोजा ग्राहिणो दृष्टिनाशनाः ।
चुद्रोद्भवा बलकरा नतु स्वच्छजलोद्भवाः ॥८६॥
हेमन्ते कूपजा मत्स्याः शिशिरेःसारसा हिताः ।
मधुग्रीष्माम्बुकालेषु नदीचुण्डी तडागजाः ॥८७॥
शरत्सु नैर्झराः सर्वे वर्षौघ्याः सर्वदोषदाः ।
रोहितः प्रवरस्तेषु नातिपित्तकरो लघुः ॥८८॥
कषायानुरसो बल्यः पाठीनोःश्लेष्मलो गुरुः ।

( इति रोहीमत्स्य गुणाः )

चुद्रमत्स्याः स्वादुरसा दोषत्रयनिवर्हणाः ।
सूक्ष्माः परं पुंस्त्वकरा रुच्या कासानिलापहाः ॥ ८९ ॥
त्रिदोषघ्नश्चिलिचिमा स्तिमिर्बल्यः परं मतः ।

मत्स्यगर्भः परं वृष्यः स्निग्धः स्थैर्यकरो गुरुः ॥९०॥
कफमेदः प्रदो बल्यो ग्लानिकृन् मेहनाशनः । ( मत्स्याण्ड)
शिशुमारो इतेस्तुल्यो मकर स्तिमिदंष्ट्रकः ॥ ९१ ॥
शिशुमारो गुरुर्वृष्यः कफकृद्वातनाशनः ।
बृंहणो बलदः स्निग्धस्तद्वन्मकरमादिशेत् ॥९२॥ ( शिशुमार )
कच्छपो गूढपात्कूर्मः कमठो दृढपृष्ठकः ।
कच्छपो बलदः स्निग्धो वातजित् पुंस्त्वकारकः ॥ ९३॥ (कच्छपः)
मण्डूकः प्लवको भेको वर्षाभूर्दर्दूरो हरिः ।
मण्डूकः श्लेष्मलो नाति पित्तलो बलकारकः ॥९४॥ (मण्डूक)
कर्कटः कुरुचिल्लः स्यात् कुलीरः षोड़शाम्बिकः ।
कर्कटो बृंहणो वृष्यः शीतलोऽसृक्प्रदरापहः ॥९५॥ (कर्कट)
सर्पो भुजङ्गोभुजगः फणीभोगी भुजङ्गमः ।
कुण्डलीकञ्चुकीचक्री पन्नगः पवनाशनः ॥९६॥
गूढपादुरगो नागो जिह्मगश्च सरीसृपः ।
चक्षुःश्रवा दीर्घपृष्ठो व्याल आशीविषस्त्वहिः ॥९७॥
दर्वीकरो विषधरो दन्दशूको विलेशयः ।
कुम्भीनसः पृदाकुः स्यात् दंष्ट्री काकोदरो विषी ॥९८॥ ( सर्प )
डिण्डिभो राजिलः प्रोक्तोऽजगरोवाहसः शयुः ।
जलसर्पोगलार्दः स्यात् ति लित्स्यो गोनसः स्मृतः॥९९॥(सर्पभेदः)
सर्पाणां स्नेहनं मांसं चक्षुष्यं बृंहणं गुरु ।
दूषीविषक्रमिहरं मेधाग्निबलवर्द्धनम् ॥१००॥ ( सर्पमांसगुणाः )
गोधा घोर फटापश्च नखरा जनिपस्तथा ।
कृष्णसर्पेण गोधेयो गोधेरः सु महा गुणाः ॥१०१॥
गोधाग्निजननी बल्या वृष्या पित्तानिलापहा ।

( इति गोह्नाम तद्गुणाः )

सद्योहतं भजेन्मांसं व्याधिवारिविषैर्मृतम् ।
वयस्थमकृशं बल्यं अन्यथा परिवर्जयेत् ॥ १०२॥

[इति सद्योहतमांसगुणाः]

वृद्धानां दोषलं मांसं बालानां बलदङ्कुरु ।
च्युतगर्भा गुरुर्योषिद्गर्भा गर्भवती तथा ॥१०३॥

[इति च्युतगर्भा गर्भगुणाः]

स्वयं मृतमबल्यं स्यात् अतिसारकरङ्कुरु । [स्वयं मृतमांसं]
विषाम्बुरुक् मृतं मृत्युदोषत्रयरुगावहम् ॥१०४॥ [अखाद्यमांस]

विहगेषु पुमान् श्रेष्ठः स्त्री चतुष्पदजातिषु ।
पश्चार्द्धं लघु पुंसां स्यात् स्त्रीणां पूर्वार्द्धमादिशेत् ॥१०५॥

तुल्यजातौ स्थूलदेहो महादेहेषु पूजितः ।
अल्पदेहेषु शस्यन्ते तथैव स्थूलदेहिनः ॥१०६॥

चेष्टावतां परं मांसमलसेभ्यो लघुः स्मृतः ।
देहमध्यङ्कुरुः प्रायः सर्वेषां प्राणिनां मतम् ॥१०७॥

पक्ष्मो चेपाद्दिहङ्गानां तदेव समसुच्यते ।
गुरुण्यङ्गानि सर्वेषां गलग्रीवञ्च पक्षिणाम् ॥१०८॥

ये मृगाविहगास्तोय दूरावासः प्रचारकाः ।
तेनाभिष्यन्दिनः सर्वे विपरीतान्यतोऽन्यथा ॥१०९॥

जलानूपभवाः सर्वे जलानूपचराश्च ये ।
गुरुभक्ष्या गुरुतरं तेषां मांसमुदाहृतम् ॥११०॥

धन्वोत्पत्तिप्रचाराणां लघु स्याल्लघुभोजिनाम् ।
उरुस्कन्धोदरं मूर्द्धा पाणिपादौ कटीतथा ।
पृष्ठत्वक् यकृदन्त्राणि गुरूणि हि यथोत्तरम् ॥१११॥

इति मांसवर्गो द्वादशः ।

गोपालवालैः सह मल्लविद्या विनोददचं धृतकाकपचम् ।
उपास्म हेवाङ्मनसातिदूरं महः परं नीलमचिन्त्यनीयम् ॥१॥

वातेऽनुपानं स्निग्धोष्णं रूक्षोष्णं श्लेष्मणि स्मृतम् ।
पित्ते स्निग्धं हितं स्नेह पाने तोयमशीतलम् ॥ २ ॥
भल्लातकः स्नेह मूर्च्छा व्याम्रानां शीतलं जलम् ।
शालिमुद्गादि भक्ष्याणां यूषो मांस रसस्तथा ॥ ३ ॥
माषादिभाजिनामस्तु धान्याम्लं दधि वा स्मृतम् ।
मद्यं शोषि विषार्त्तानां मत्स्याम्नीनाञ्च शस्यते ॥ ४ ॥
क्लान्तानामुपवासाध्व भाष्यस्त्री सुरतादिभिः ।
पयः सुधासमं प्रोक्तं चीणानां रक्तपित्तिनाम् ॥ ५ ॥
असात्म्यं दोषलं शीतमति मात्रमथो गुरुः ।
उक्तानुपानतो भुक्तं सुखमन्नं प्रजीर्य्यते ॥ ६ ॥
तदादौ कर्षयेत्पीतं स्थापयेन्मध्य सेवितम् ।
पश्चात्पीतं वृंहयति तत्समीक्ष्य प्रयोजयेत् ॥ ७ ॥
न पिवेच्छ्वास कासार्त्तो जन्तुरोगः चतातुरः ।
पीत्वाभिभाष्याध्ययन निद्रां न त्वरया भजेत् ॥ ८ ॥
तत्कफानिल पित्तेषु चैकद्वि त्रिपलोन्मितम् ।
वारि शस्यमुषः काले दृष्टिकारि रसायनम् ॥ ९ ॥
वलीपलितवैस्वर्य्य पीनस श्वास शोषजित् ।
पानीय प्रसृतीरष्टौ यः पिवेदरुणोदये ॥ १० ॥

धान्येषु मांसे सकलेषु चैवं शाकेषु चानुक्तमिह प्रमादात् ।
आस्वादितो भूतगुणै र्स्वतीत्वातदादिशेत् द्रव्यमनल्पबुद्धिः ॥११॥

षष्टिका यव गोधूमा लोहितायाश्च शालयः ।
मुद्गाढकी मसूराश्च धान्येषु प्रवरा स्मृता ।
स जरा व्याधिनिर्मुक्तो जीवेद्वर्ष शतं सुखी ॥ १२ ॥
भुक्तोपविशतस्तुन्दि बलमुत्तानशायिनः ।
आयुर्वामकटिस्थस्य मृत्युर्धावति धावतः ।
रात्रौ जागरणं रूक्षं स्निग्धं प्रस्वपनं दिवा ॥ १३ ॥
न तेषां स्वपतान्दोषो जाग्रताश्चोपजायते ।
भोजनानन्तरं निद्रा वातघ्नी कफपुष्टिकृत् ॥ १४ ॥
कफ मेदो विषार्त्तानां रात्रौ जागरणं हितम् ।
दिवास्वप्नश्च तृट्शूल हिक्काजीर्णातिसारिणः ॥ १५ ॥
दन्तधावनमुद्दिष्टं आस्यवैशद्यकारकम् ।
प्रसेकारुचि दौर्गन्ध्य मल पित्त कफापहम् ॥ १६ ॥
मदा तुरः कृशः श्रान्तो दन्त ताल्वोष्ठ रोगवान् ।
हिक्का छर्दि शिरःपीड़ा मूर्च्छा शोषी न तच्चरेत् ॥ १७ ॥
मुखप्रक्षालणं शीत पयसा रक्तपित्तजित् ।
मुखस्य पिडका शोष नीलिकाव्यङ्गनाशनम् ॥ १८ ॥
पादप्रक्षालनं दृष्टिकरं वृष्यं श्रमापहम् ।
पादाभ्यङ्ग करो वृष्यो बलोत्साह विवर्द्धनः ॥ १९ ॥
निद्रा सुखकरः स्वप्नि श्रम नेत्र रुगापहः ।
स्नेह गण्डूषकरणं मुख शोष हिजामयान् ॥ २० ॥
स्वरघातौष्ठ पारुष्य रक्त वातान् विनाशयेत् ।
सुखोष्णोदक गण्डूषः कफारुचि मलापहः ॥ २१ ॥
विष मूर्च्छा मदार्त्तानां शोषिणां रक्तपित्तिनाम् ।
कुपितोऽक्षि मलक्षीणां रूक्षाणां न प्रशस्यते ॥ २२ ॥

Indira Gandhi National Centre for the Arts

अञ्जनं नेत्रनैर्मल्यं दृष्टिकारि रुगापहम्।
रात्रौ जागरितः श्रान्तः छर्दितो भुक्तवांस्तथा॥ २३॥
ज्वरातुरः शिरः स्नातः कदाचिन्न तदाचरेत्।
व्यायामः कर्म सामर्थ्य स्थैर्य्य दोष क्षयाग्निकृत्॥ २४॥
स सदा गुणमाधत्ते बलिनां स्निग्धभोजिनाम्।
व्यायाम दृढचित्तानां व्याधिर्नास्ति कदाचन॥ २५॥
विरुद्धं वा विदग्धं वा भुक्तं शीघ्रञ्च पच्यते।
भवन्ति शीघ्रं नै तस्य बली शिथिलिता जरा॥ २६॥
वसन्ते शीतसमये सुतरां समतो हितः।
अन्यदापि स कर्त्तव्यः शक्त्यर्द्धेन बलाबलम्॥ २७॥
तनुं समीक्ष्य वा खेदि कण्ठे ग्रीवा ललाटयोः।
भुक्तवान् कृतसंयोगः कासी श्वासी क्षयी कृशः॥ २८॥
रक्तपित्ती क्षयी शोषी न तं कुर्य्यात् विचक्षणः।
अति व्यायामतः कासो ज्वरश्छर्दिश्च जायते॥ २९॥
मर्द्दनं श्रम वातघ्नं निद्रा पुष्टि बलप्रदम्।
केशश्मश्रु नखानाञ्च कल्पनं शुचि रूपकृत्॥ ३०॥
अभ्यङ्गो वातरोगघ्नो धातु साम्यं बलं सुखम्।
निद्रा वर्ण मृदुत्वानि कुरुते दृष्टि पुष्टिकृत्॥ ३१॥
केशप्रसाधनी केश्या रजोजन्तु मलापहा।
शिरोऽभ्यङ्गः शिरस्तृप्ति केशदार्ढ्याक्षि पुष्टिकृत्॥ ३२॥
उच्चैः श्रवणबाधिर्य्य मलमन्या हनुग्रहान्।
कदापि कर्णरोगाणां कुरुते कर्णपूरणम्॥ ३३॥
सिक्तस्याङ्घ्रिर्यथा मूले तरूणां पल्लवादयः।
वर्द्धन्ते हि तथा नृणां स्नेह सिक्तस्य धातवः॥ ३४॥

स्नेहावगाहनं वात शमनं धातुपुष्टिदम् ।
मात्राभिस्त्रि चतुः पञ्च षड्‌ सप्ताष्टभिराव्रजेत् ॥ ३५ ॥
रस रक्त मांस मेदो मज्जा धातून्यथा क्रमम् ।
वान्तो नवज्वरोऽजीर्णी विरिक्तः केवलामरुक् ॥ ३६ ॥
निरूह तर्पणं यस्य स्नेहाभ्यङ्गादि वर्जयेत् ।
उद्वर्त्तनं वातहरं भ्राजकानल दीपनम् ॥ ३७ ॥
गात्रस्थिरत्वसुखिता त्वक्‌ प्रसाद मृदुत्व कृत् । [उबटन]
स्नानं वात श्रमा लक्ष्मीपामा कण्डू मलापहम् ॥ ३८ ॥
हृद्यं कासकरं वह्नि सर्वेन्द्रिय विबोधनम् ।
न तदुष्णेन शिरसो योज्यं नेत्रा हितं यतः ॥ ३९ ॥
कफ वातप्रकोपे तु भेषजार्थं तदाचरेत् ।
तच्चातिसार ज्वरित कर्णशूलानिलार्त्तिषु ॥ ४० ॥
आध्मानारोचकाजीर्ण भुक्तवत्सु च गर्हितम् ।
अनुलेप तृषा मूर्च्छा दौर्गन्ध्यं श्रम वातजित् ॥ ४१ ॥
सौभाग्य तेजस्त्वग्वर्ण प्रीत्योजो बलबर्द्धनः ।
कुसुमाम्बर रत्नानां धारणं कान्तिकारणम् ॥ ४२ ॥
पापरक्षो ग्रहहरं कामोजः श्रीविबर्द्धनम् ।
पादत्राधारणं नेत्र्यमायुष्यं पादरोगनुत् ॥४३॥ [पानही]
उष्णीषं शुचिदं केश्यं रजो वातातपापहम् । [पाग]
छत्र धारणमोजस्यं चक्षुष्यं हिम घर्मजित् ॥ ४४ ॥
बालव्यजनमोजस्यं मक्षिकादि निवारणम् ।
व्यजनस्यानिलः शोष मूर्च्छा स्वेद श्रमापहः ॥४५॥ [पङ्खा]
यष्टिधारणमुत्साह स्थैर्य्या विष्टम्भ वीर्य्यकृत् ।
रक्षः सर्पादि भयजित् विशेषात् स्थविरे मता ॥ ४६ ॥

अस्थास्थौल्यरुचि: श्लेष्म सौकुमार्य्यं सुखप्रदम् ।
यत्त्वचङ्क्रमणं नापि देहपीड़ाकरं भवेत् ॥ ४७ ॥
तदायुर्बलमेधाग्निप्रदमिन्द्रिय बोधनम् । [लाठी]
त्रिदोष शमनीशय्याद्वली वात कफापहा ।
सुखशय्यासमं निद्रा पुष्टीन्द्रिय बलप्रदा ॥ ४८ ॥
आतप: खेद मूर्च्छास्र तृष्णा दाह श्रम क्लमान् ।
कुरुते पित्तवैवर्ण्यं स्वेदां छायां व्यपोहति ॥४९॥
अग्नि: शीतानिलस्तम्भ कफ वेपथु नाशन: ।
रक्तपित्त प्रदूषी स्यात् आमाभिस्यन्द पाचन: ॥ ५० ॥
धूम: पित्तानिलौ कुर्य्यादवश्याय: कफानिलौ ।
ज्योत्स्ना शीतानिलस्तम्भप्रदा तृट् पित्त दाहजित् ॥५१॥
तमोभयावहं मोह कफ पित्त क्लमप्रदम् ।
दृष्टि र्वृथा हिमा निद्रा भिस्यन्दालस्यकारिणी ॥ ५२ ॥
प्रवातं रूक्ष वैवर्ण्यस्तम्भकृद्दाह पित्तनुत् ।
स्वेद मूर्च्छा पिपासाघ्नमप्रवात तमोऽन्यथा ॥५३॥
सुखं प्रवातं सेवेत ग्रीष्मे शरदि चान्तरा ।
निवातमायुषे सेव्यमारोग्याय च सर्वदा ॥ ५४ ॥
सद्यो मांसं नवं चान्नं बाला स्त्री क्षीरभोजनम् ।
घृतमुष्णोदक स्नानं सद्य प्राण कराणि षट् ॥ ५५ ॥
पूतिमांसं स्त्रियो वृद्धा बालार्क स्तरुणं दधि ।
प्रभाते मैथुनं निद्रा सद्य: प्राणहराणि षट् ॥ ५६ ॥
अन्नादष्टगुणं पिष्टं पिष्टादष्टगुणं पय: ।
पयसोऽष्टगुणं मांसं मांसादष्टगुणं घृतम् ॥ ५७ ॥
घृतादष्टगुणं तैलं अभ्यङ्गे न तु भोजने ।

लङ्घनं कफ मेदोघ्नम् आमज्वरहरं लघु ॥ ५८ ॥
पाचनं दीपनं वातहरं शूलातिसारजित् ।
तन्न युक्तं नवे बाले गर्भिण्यां स्थविरे कृशे ॥ ५९ ॥
शोक काम भय क्रोध मार्ग श्रम चिरज्वरे ।
पूर्व्वानिलो गुरुः स्वादुः स्निग्धः पित्तास्र वर्द्धनः ॥६०॥
रोगकृत् विषजुष्टानां व्रतव्रण विलासिनाम् ।
विदाही वातलः श्रान्त कफ शोफवतां हितम् ॥ ६१ ॥
दक्षिणः पवनः स्वादु रक्तपित्तहरो लघुः ।
अविदाहप्रदो बल्यः चक्षुष्यो नच वातलः ॥ ६२ ॥
पश्चिमः पवनो रूक्षस्तीक्ष्णः स्नेह बलापहः ।
विशदः शोषणो नृणां कफमेदोहरो लघुः ॥ ६३ ॥
उत्तरो मारुतः शीतः स्निग्ध दोषप्रकोपकृत् ।
क्लेदनः प्रकृतिस्थानां बलदो मधुरो मृदुः ॥ ६४ ॥
क्षय क्षीण विषार्त्तानां विशेषाद्गुणकारकः ।
रसो मधुरकः शीतो धातुस्तन्य बलप्रदः ॥ ६५ ॥
चक्षुष्यो वातपित्तघ्नः कुर्य्यात् स्थौल्य कफ कृमीन् ।
सोऽतियुक्तो ज्वर श्वास गलगण्डार्वुदादि कृत् ॥ ६६ ॥
रसोऽम्लः पाचनो रुच्यः पित्तश्लेष्मकरो लघुः ।
लेखनोष्णोवहिः शीत क्लमदः पवनापहः ॥ ६७ ॥
सोऽतियुक्तः परं देहे रक्तपित्तादि रोगकृत् ।
कटुकः पित्तलः श्लेष्म कृमि कण्डू विषापहः ॥ ६८ ॥
वमनं श्लेष्म पित्तघ्नं विरेको रक्तपित्तहा ।
वस्तिर्वातहरा ज्ञेया स्वेदे मान्द्योऽपकारकः ॥ ६९ ॥ [जनका]
आग्नेयो वातलस्तन्य मेदः स्थौल्यहरो गुरुः ।

सोऽतियुक्तो भ्रमास्थौल्य तालुशोषातिदाहदः ॥ ७० ॥

तिक्तः शीतस्तृषा मूर्च्छा ज्वर पित्त कफान् जयेत् ।
वातलोऽग्निकरस्तन्य शोधनः शोषणो लघुः ॥ ७१ ॥

सोऽतियुक्तः शिरः शूलमन्यास्तम्भ भ्रमार्त्तिकृत् ।
लवणः शोधनो रुच्यः पाचनः कफपित्तदः ॥ ७२ ॥

पुंस्त्वं वातहरः कायः काय शैथिल्यकारकः ।
सोऽतियुक्तोऽक्षिपाकास्त्र पित्तकोठाक्षि तापकृत् ॥ ७३ ॥

कषायो रोपणो ग्राही शोषणो वातकोपनः ।
सोऽतियुक्तो ग्रहाध्मान हृत्पीड़ा क्षेपणादिकृत् ॥ ७४ ॥

प्रसन्न दृष्टिर्दृढदन्त केशः शशाङ्कवक्त्रः पलितैर्विहीनः ।
पिकाभकण्ठः कमलास्य गन्धो तस्योपसेवी भवतीह मर्त्यः॥७५॥

काशोपलेपः स्वरभेद निद्रातथास्यदौर्गन्ध्य विषोपसर्गः
कफप्रसेको ग्रहणीप्रदोषा भवन्ति जन्तो र्वमिते न नूनम्।

बुद्धेः प्रसादं बलमिन्द्रियाणां धातुःस्थिरत्वं बलमग्नि दीप्तिम्।
चिराच्च पाकं वयसः करोति विरेचनं सम्यगुपास्यमानम्॥७६॥

वास्तिर्वाते च पित्ते च कफे रक्ते च शस्यते ।
संसर्गे सन्निपाते च वस्तिरेव हितः सदा ॥ ७७ ॥

मूले निषिक्तो हि यथा द्रुमः स्यात् नीलच्छदः कोमलपल्लवाग्रः।
काले महत्पुष्प फलप्रदश्च तथा नरः स्यादनुवासनेन ॥ ७८ ॥

त्वग्दोषा ग्रन्थयः शोफा रोगाः शोणितसम्भवाः ।
रक्तमोक्षण शीलानां न भवन्ति कदाचन ॥ ७९ ॥

( पञ्चकर्म रक्तमोक्षणम् । )

संहर्षात् कुपिता भवन्ति हिमला वर्षासु वातादयः
क्लिन्नत्वाद्वपुषोऽनले कृशतरे वैद्येन देयं ततः ।

अन्नं दीपन पाचनञ्च मलहृत् क्लेदापहोष्णद्रवं
रूक्षं नातिकषाय तिक्त कटुकः स्निग्धश्च किञ्चिद्रसैः ॥८०॥
दिव्यं चौड्ड्यमथाम्बु तन्नशिशिरं स क्षौद्रमल्पं पिबेत्
गच्छन्त्योषधयो विदाहमधिकं तारुण्ययोगात्तदा ।
व्यायामार्क मरीचि मैथुन सुखावस्थावर्जेत्ततः
भूवाष्मान्तु भुजङ्गदंश मशकैर्वर्जे शयीतालये ॥ ८१ ॥
शीतोद्वति वात वृष्टिर्जनते साङ्गारयाने गृहे
निर्वाते चितिपः शयीत मधुरं किञ्चिच्च पीत्वासवम् ।
काश्मीरा गुरु लेपभूषित तनुर्नागाङ्गनाभिर्व्रजेत्
यत्नान्न व्यजनावगाहनरतिं स्वापन्दिवा च त्यजेत् ॥८२॥
सेव्याः स्वादु कषाय तिक्त विशदा वर्षा त्यजेज्जाङ्गलम्
द्राक्षा क्षीर शीतेक्षु शालिमधुरा गोधूममुद्गादयः ।
नैर्मल्यादखिलं जलं लघुतरं वासः स्रजश्चन्दनम्
सेवेतिन्दुकरान् प्रदोषसमये गाहेत साब्जं सरः ॥ ८३ ॥
वर्षा सूपचितं विरेच विधिना पित्तं हरेद्द बुद्धिमान्
युक्ता रक्त विमोक्षणे न हविषस्तिक्तस्य पानैस्तथा ।
रात्रौ जागरणं व्यवायमधिकं घर्मं तुषारं दधि
क्षाराम्लोष्ण विदाहि तीक्ष्ण कटुकं निद्रां दिवा च त्यजेत् ॥८४॥
हेमन्ते लवणाम्ल तिक्त कटुका क्षारोत्कटं हंहणम्
सर्पिस्तैल समेतमुष्णमशन तीक्ष्णानि पानानि च ।
सेवेता गुरु रूषितोऽम्बु शिशिरङ्गाहेत तैलप्लुतः
कौशेयास्तरणे शयीत शयने साङ्गारपाने गृहे ॥ ८५ ॥
श्यामापीनपयोधरो रुजघनामाश्लिष्य धन्योऽङ्गनाम्
वाह्लीकागुरुलेपभूषित तनुर्धूपैर्वरैर्धूपितम् ।

कामं मैथुन मतर्पितवपुः सेवेत बल्यैरसैः
कर्त्तव्यः शिशिरेऽयमेव नितरां शीताधिकत्वाद्विधिः॥८६॥
तीक्ष्णक्षारकषाय रूक्षकटुकं कोष्णं वसन्तेऽशनं
तन्मध्यं मधुमुद्गजाङ्गलयवप्रायां हितं चाद्रवम्।
व्यायामं विपिनञ्च कोकिलकलालापाकुलं कामिनी।
स्नानोद्वर्त्तन चन्दनानि नृपतिः सेवेत रम्याः स्रजः॥८७॥
हेमन्तानिचितः प्रकुप्यति कफो भानोः करैराहृत
स्तस्मात् तीक्ष्णशिरो विरेकवमनैः गण्डूषधूपादिभिः॥
तं प्राज्ञो विजयेत् विशुष्कजलदक्वाथैरथोष्णाम्बुभिः
शीतस्निग्ध गुरुद्रवाम्लमधुरं निद्रान्दिवाच त्यजेत्॥८८॥
ग्रीष्मे शीतसरोवरान् सरांसि सरितोर्वापीर्वनानि स्रजो
हारान् शीतलतालवृन्तपवनान् सेवेत निद्रान्दिवा।
वासां स्वच्छ लघुन्यनुष्णमधुरं चान्नं ससर्पिर्द्रवम्
मस्यक्षीरसुपानकानि च सिता दिग्धान्यसीतान्यपि॥८९॥
शुभ्रे हर्म्यतले शयीत शयने प्रत्यग्रपुष्पार्च्चिते
वातैश्चन्दन चन्द्रचर्च्चिततनुः संस्पृश्यमानः सुखैः।
व्यायामं परिशोषिमैथुनरतिं घर्मं तथोष्णं रसः
नाग्नेयान् परितस्त्यजेन्मति मतोवैद्यस्य वाक्येरतः॥९०॥
टीकाग्रे महति भूमिभुजां विशुद्धे
काञ्चीति नाम नगरं जयति प्रसिद्धम्।
येद्वसाविहित मादरतः स्रष्टे
रत्नष्टतानि शयपुञ्जदिदृ चयेव॥ ९१॥
तत्र श्रीरत्नपालः समजनि जनता नन्द वृन्दै ककन्दः
कुलेन्दुः स्वच्छकीर्त्तिः परमददलनोद्दाम दीक्षैकदक्षः।

यस्या कर्ण्यं प्रभूतं प्रथित गुणगणं कर्णसाफल्यभाजो
दैवन्नि न्दन्ति लोकानयन विफलताखेदमाविदयन्त: ॥८२॥

जन नयन सुधां शुस्तस्य शुद्रस्तनूजो
जगतिभरण पालेचोणि पालोवभूव।
सकल सकलवाञ्छा सिद्धि हेतोर्विधाता
सुरतरु वरचक्रे यत्करच्छ्मनैव ॥ ८३ ॥

हरिश्चन्द्रस्तस्मात् समजनि जनानन्द जननो
हरिश्चन्द्रो लोके परद्रव परितापज्वलन:।
परं विश्वामित्रे ष्व हितमय माधत्त मतिमान्
विशिष्टो नैतस्माज्जगति महितोऽन्द: सुकृतिन: ॥ ८४ ॥

तस्माद् भूदद्भुत कृत्यमान्य: साधारणो भूमिपतिर्वदान्य:।
दारिद्र सुन्मूल्य पुन:स्ववैरि स्वस्यापि कामं कृपयैव येन ॥८५॥

कामो धर्ममहेश्यमान्य उदयो नास्तं प्रयात: क्वचित्
क्वचिन्नोदानं मधुप: प्रियन्तन मन: सन्तापरुक्रूरता।
सचक्राति विचित्र मित्र सुखिता हृद्वि प्रदाचन्द्र दा
चातुर्येण महेन्द्रता कविमना किञ्चित् न यस्माद्भुतम् ॥ ८६ ॥

अजनि सहज पालस्तस्य पूर्व्वस्तनूज:
सकल गुणनिधानं शास्त्रधर्मैकवेत्ता:।
प्रथित पुरुष रत्नं यंसमालोक्य लोक्य लोका:।
बहुविधिषु विधातु: कान्ततां मन्यतेस्म॥ ८७ ॥

योराज्ञां सुख तिलक:कटारमल्लस्तेन श्रीमदन नृपेण निर्मितेऽत्र।
ग्रन्थेऽस्मिन् मदन विनोदनाम्नि पूर्णो
वर्गोऽयङ्गुणगणमिश्रमिश्रकोऽयम् ॥

इति श्रीमदन पाल विरचिते मदन विनोदनाम्नि निघण्टौ मिश्रवर्ग: त्रयोदश:।

IGNCA RAR
R-343
ACC No.

Indira Gandhi National
Centre for the Arts